In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 3

ब्रह्मश्रीः श्रीमदज्जाडादिभट्टनारायणदासमहाकविविरचितम्

तारकम्

ब्राह्मीभूषणेन राम्भट्ल लक्ष्मीनारायणशास्त्रिणा रचितया
भावार्थदीपिकाख्यव्याख्यसंवलितम्
(राष्ट्रियसंस्कृतसंस्थानस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

आङ्ग्लानुवादः
श्रीमती सूरपराजु लता

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादिका
डा के वरलक्ष्मीः
उपनिदेशिका

सहसम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी
(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2020

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 3

ब्रह्मश्रीः श्रीमदज्जाडादिभट्टनारायणदासमहाकविविरचितम्

तारकम्

ब्राह्मीभूषणेन राम्भट्ल लक्ष्मीनारायणशास्त्रिणा रचितया
भावार्थदीपिकाख्यव्याख्यसंवलितम्
(राष्ट्रियसंस्कृतसंस्थानस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

आङ्ग्लानुवादः
श्रीमती सूरपराजु लता

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादिका
डा के वरलक्ष्मीः
उपनिदेशिका

सहसम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी
(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2020

In Public domain. Digitization Muthulakshmi Research Academy

Tārakam
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Rashtriya Sanskrit Sansthan, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
osmania.ac.in\sanskritacademy

Data Entry by
Smt. Bhavanam Sridevi

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Tārakam
ISBN – 978-93-80171-46-3

© Sanskrit Academy

Year	:	2020
Copies	:	300
Pages	:	xxxii+247
Price	:	Rs 400
		$ 40

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamala - 3

Brahmaśrī Śrīmadajjāḍādibhaṭṭanārāyaṇadāsa Mahākaviviracitam

Tārakam

Brāhmībhūṣaṇena Rāmbhaṭla Lakṣmīnārāyaṇaśāstriṇā Racitayā Bhāvārthadīpikākhyavyākhyasaṃvalitam
(Published under 'Re-printing rare books project' of Ashtadashi Scheme of Rashtriya Sanskrit Sansthan)

English Translation
Smt. S Latā

Chief Editor
Prof K Neelakantham
Director

Editor
Dr K Varalakshmi
Deputy Director

Associate editors and Project Investigators
Dr V Subrahmanyam, Deputy Director
Dr Joshi Santosh Kumar, Research Assistant

Sanskrit Academy
Adarsha Shodha Sansthan
(Recognised by Rashtriya Sanskrit Sansthan, New Delhi)
Osmania University Campus, Hyderabad – 500 007
2020

In Public domain. Digitization Muthulakshmi Research Academy

Tārakam
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Rashtriya Sanskrit Sansthan, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
osmania.ac.in\sanskritacademy

Data Entry by
Smt. Bhavanam Sridevi

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Tārakam
ISBN – 978-93-80171-46-3

© Sanskrit Academy

Year	:	2020
Copies	:	300
Pages	:	xxxii+247
Price	:	Rs 400 $ 40

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिज्ञा

अस्मिन् ग्रन्थे श्लोकेषु पादपूरणमात्रफलकपदमुपसर्गस्य वोपसर्गसमानाकारस्य पुनरुक्तिरप्रसिद्धोपसर्ग उताप्रसिद्धोपसर्गसमानाकारो भिन्नलिङ्गवचनसादृश्यं लोकातीतपदार्थवाचकशब्दो विना दिव्धातुघटितं नास्ति, लुङ्लङ्लिटोऽधिक्रियन्ते क्रमशः प्रथमद्वितीयतृतीयसर्गेषु, द्वितीयतृतीयसर्गयोर्भूतेतरक्रियावाचकतिङन्तरूपं न विद्यते। पाणिनीयसूत्राणामवैदिकानामुदाहरणमेतत्काव्यम्।

Pledge

There are no Avyaya words such as तु, हि, च, स्म, ह, वै which are usually used to complete the lines in a poem in this Kavya. Prefixes and the words similar to them have never been repeated here. Not even the prefixes which are not popular are used here. Propriety is maintained well when genders and numbers are compared. Unusual and uncommon words are not employed here in the book. Only the words related to the root दिव् are used. And only the verbal forms of लुङ् (aorist), लङ (imperfect), लिट् (reduplicative) are used in the first, second and third cantos respectively. In the second and third cantos, there are no verbs other than the verbal forms of past tense, This kavya is an example of Panini sutras which belong to classical Sanskrit only.

In Public domain. Digitization Muthulakshmi Research Academy

जानाते यन्न चन्द्रार्कौ जानते यन्न योगिनः ।
जानीते यन्न भर्गोऽपि तज्जानाति कविः स्वयम् ।।

वचः सुधामयं काव्यं पीत्वाहं तृप्तमानसः ।
कृतज्ञः अभिप्रशंसामि भवन्तं कविशेखरम् ।।

Year
1929

Prof. GELDNER
Marts Burg University
West Germany

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

ओऽम् श्री गुरुभ्यो नमः

।। श्री शङ्करभगवत्पादाः विजयन्ते ।।

महाकविः, बहुभाषानिष्णातः, सङ्गीतसाहित्यसार्वभौमः, अष्टावधानी, हरिकथापितामहः, समाजसेवकः श्रीमदज्ञाड आदिभट्ल नारायणदासपण्डितः 1864 तमे वर्षे आगस्ट् मासस्य 31 तमे दिनाङ्के स्वजनिं लेभे। पुण्यदम्पत्योः श्री लक्ष्मीनरसमाम्बा-वेङ्कटचयनयोः सन्ताने अयं कनिष्ठः। अस्मात् ज्येष्ठाः चत्वारः भातरः, चतस्रः स्वसारश्चासन्। आन्ध्रप्रदेशे ''बोब्बिलि'' राज्यस्य समीपे पवित्रस्वर्णमुखीनदीतीरे स्थितस्य ''अज्ञाड'' इत्याख्यग्रामवासिनः एते। बाल्ये महाकवेरस्य नाम सूर्यनारायण इत्यासीत्, किन्तु तदनन्तरकाले हरिकथाकथने पटुरयं नारायणदास नाम्ना ख्यातिमलभत। बाल्ये अस्य तेलुगु-संस्कृतपद्यानां गानशैलीं दृष्ट्वा प्रीतोऽस्य मातामहः साधारणविद्यया सह सङ्गीतविद्यामप्यशिक्षयत्।

तेलुगु, संस्कृतम्, तमिलम्, हिन्दी, बङ्गला, उर्दू, अरबिक्, पर्शियन् आङ्गलम् इत्यादिभाषाः अधीत्य नैकेषां ग्रन्थानाम् अनुवादं चकारायं हरिदासः। तेलुगुभाषायां कविपण्डितानां कृते प्रसिद्धा प्रक्रिया वर्तते अष्टावधानम्। अत्र तेलुगुसाहित्ये असामान्यपण्डितोऽयं नारायणदासः बहूनि अष्टावधानानि कृत्वा आन्ध्रदेशे विदुषां, कविमूर्धन्यानाञ्च प्रशंसापात्रो बभूव। अपि च तदानीन्तनकाले ''उमर् खयूम्'' कवेः रुबायीकविताः अनुवदितुं भारते कवयः तस्य ग्रन्थस्य आङ्गलानुवादानाश्रयन्ति स्म। किन्तु श्रीमान् नारायणदासः पर्शियन् भाषामभ्यस्य ग्रन्थान् परिशील्य रुबायीकविताः तेलुगुभाषया संस्कृतभाषया च 1932 तमे वर्षे अनूदितवान्। तत्पूर्वमेव 1922 तमे वर्षे महाकवेः कालिदासस्य, पाश्चात्यकवेः षेक्स्फियरस्य च रचनाभ्यः रससम्बन्धिसन्निवेशान् सङ्गृह्य ''नवरसतरङ्गिणी''ति नाम्ना तेलुगुभाषया खण्डकाव्यमरचयत्। ततः भारतीयतात्त्विकसिद्धान्तान् तेलुगुभाषया

In Public domain. Digitization Muthulakshmi Research Academy

विशदीकर्तुं ''जगज्ज्योतिः'' नाम प्रसिद्धं ग्रन्थं रचयामास। एवमेव ऋग्वेदात् प्रायः त्रिशतं ऋचः सङ्कलय्य तेलुगुभाषया अनूद्य कर्नाटकसङ्गीतमाध्यमेन स्वयं गात्वा वीणावादनेन संयोजयितुं शिष्येभ्यः अशिक्षयत्।

हरिकथामृतम्, रामचन्द्रशतकम्, काशीशतकम्, तारकम् इति चत्वारि काव्यानि संस्कृते अरचयदयं पण्डिताग्रणीः। एतेभ्यः वयमिदानीं ''तारकम्'' नाम शास्त्रकाव्यं संस्कृत अकाडमी पक्षतः प्रसिद्धप्राचीनग्रन्थानां पुनर्मुद्रणयोजनाद्वारा सहृदयानां पुरस्तात् आनेतुं प्रयतामहे।

प्राचीनकालात् शास्त्रपारदृश्वानः शिष्यवत्सलाः विपश्चितः केचन व्याकरणादि शास्त्राणि लोकम्प्रत्यवगमयितुं बहुविधानुपायान् पर्यकल्पयन्। दुरूहाणि शास्त्राणि सरलीकर्तुं बालानां सुखबोधाय नैकान् ग्रन्थान् रचयामासुः। तत्रापि केचन व्याकरणोदाहरणानि सङ्गृह्य पाणिनीयम् अवबोधयितुं रुचिरया शैल्या काव्यानि निबबन्धुः। **''काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत्।**
उत्सवः सुधियामेव हन्त दुर्मेधसो हताः।।''

इत्यादिना यद्यपि भामहादयः आलङ्कारिकाः शास्त्रदुरवगाहत्वं अमन्यन्त तथापि

''व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम्'' इति

रावणवधकाव्ये स्वशास्त्रकाव्यौचित्यं भट्टिमहाकविः न्यरूपयत्। एवं स्थिते महाकवयः अनेके पाणिनीयमाधारीकृत्य शास्त्रकाव्यानि प्रणिन्युः। तत्र पाणिनेः जाम्बवतीजयम्, व्याडेः बलदेवचरितम्, वररुचेः स्वर्गारोहणम्, पतञ्जलेः महानन्दमयम्, भूमभट्टस्य रावणार्जुनीयम्, भट्टिमहाकवेः रावणवधम्, हलायुधस्य कविरहस्यम्, विनयप्रभसूरेः श्रेणिकचरितम्, हेमचन्द्राचार्यस्य कुमारपालचरितम्, शाकल्यमल्लस्य उदारराघवम्, वासुदेवकवेः वासुदेवविजयम्, नारायणभट्टस्य धातुकाव्यम्, इलत्तूर रामस्वामिनः सुरूपराघवम् इत्यादीनि शास्त्रकाव्यानि प्रसिद्धानि वर्तन्ते। काव्यान्येतानि सर्वाण्यपि प्राचीनेतिहासकथासम्बन्धीन्येव। श्रीमान् आदिभट्ल नारायणदासः वेदाः, षडङ्गानि, उपनिषदः, भारत-भागवत-रामायणादीनि, पुराणानि, दृश्य-श्रव्यकाव्यानि

In Public domain. Digitization Muthulakshmi Research Academy

सर्वाण्यधीतवान्। अत एव प्राचीनकाव्यसम्प्रदायमनुसरन् कविरयं नवीनां सामाजिकीं कथां कल्पयित्वा तारककाव्यं व्यरचि।

काव्यमिदं महाकविः 1910 तमे वर्षे प्रणिनायेति ज्ञायते। भट्टिकाव्यस्य विपुलाध्ययनेन समकालीनविदुषां प्रेरणया च पञ्चसर्गात्मकं तारकम् व्यरचयत्। "पाणिनीयसूत्राणाम् अवैदिकानाम् उदाहरणम् एतत् काव्यम्" इति काव्यस्यारम्भे कविः शब्दशास्त्रस्योदाहरणात्मकं काव्यं निबध्नामीति प्रतिज्ञातवान्। (इयं प्रतिज्ञा स्वव्याकरणशास्त्रवैदुष्यस्य विषये शङ्कितचित्तान् तत्कालीनान् पण्डितम्मन्यानवबोधयितुमेवेति MONARCH OF RHYTHM: A biography of A. Narayana Das by Dr. G. Srirama Murty इति ग्रन्थस्याध्ययनेन ज्ञायते) काव्यस्यास्य रचनायाः पूर्वं कविरयं तत्समये लोके वैयाकरणिषु लब्धप्रतिष्ठेन श्रीमता महामहोपाध्याय ताता सुब्बराय शास्त्रिवर्येण सह व्याकरणशास्त्रचर्चां निरन्तरमकार्षित्। श्री सुब्बराय शास्त्रिवर्योऽपि तारककाव्यं, कविं नारायणदासं च बहुधा अभ्यनन्दत्।

तारकं पञ्च सर्गात्मकं काव्यम्। अस्मिन् अष्टनवत्युत्तरद्विशतं श्लोकाः (298) वर्तन्ते। अतिस्वल्पा कथा। भारतदेशे विन्ध्यप्रदेशे चञ्चन्नदीतीरे संश्रितकल्पो नाम्नि ग्रामे महेश्वरो नाम कश्चन श्रोत्रियः द्विजः पत्न्या सह वसति स्म। तयोः दम्पत्योः तारको नाम पुत्रः देवतांशसम्भूतः बभूव। अष्टादशसु विद्यासु, षोढश कलासु च प्रावीण्यम् अध्यगच्छत् स कुमारः। विदेशयात्राभिलाषी तारकः कदाचित् विबुधनगरमगच्छत्। तत्रोद्याने सञ्चरन्तमेनं तद्देशराजकुमारोऽमिलत् अपि चानुपदमेव राज्ञः सकाशमनयत्। ततः कदाचित् तारकराजकुमारौ समुद्रयानेन चन्द्रद्वीपं गत्वा चन्द्रमतीनगरे भारतचक्रवर्तिनं ददृशतुः। एतयोः मित्रयोः वैदुष्येन सौशील्येन चाकृष्टः राजा ताभ्यां राजभवने आवासमकारयत्। तत्र आपद्भिः खिन्नं चक्रवर्तिनः अनुजम् एतौ ररक्षतुः। राजा स्वपुत्र्याः राजकुमारेण सह पाणिग्रहणमकारि। राज्याधिकारमपि ददौ। तारकमपि बहुधा सम्मानयामास। ततः तारकराजकुमारौ स्वदेशम्प्रति ययतुः।

In Public domain. Digitization Muthulakshmi Research Academy

यथा अल्पपरिमाणायाः अपि कस्तूरिकायाः सुगन्धः अधिको भवति जनान् आह्लादयति तथा अल्पीयस्या कथया युक्तं पञ्चसर्गात्मकं काव्यमिदं लुङ्, लङ्, लिडादि क्रियापदप्रयोगेण, तीर्थध्वाङ्क्षः, गेहेशूरः, अहंयुः, खट्वारूढः, किम्पचानः इत्यादि पाणिनीयोदाहरणैः, अशिश्रयत्, अमम्रदत्, अदद्रढत्, अचक्रशत् इत्यादि शताधिकात्युत्कृष्टानां तिङन्तानां प्रयोगेण, साहित्यशास्त्रप्रतिपादितानां गुणानां, रीतीनाम्, अलङ्काराणाम्, अष्टादशवर्णनानां, विविधवृत्तानां प्रयोगेण च कालिदासस्य मेघसन्देशकाव्यमिव भारते विदेशेषु च महत् स्थानं प्राप। एतादृशस्य प्रबन्धस्य काचन सरला व्याख्या त्वपेक्ष्यत एव। न केवलं शास्त्रपण्डिताः अपि तु अन्ये साहित्यसुधापिपासवोऽपि तारकस्य माधुर्यं जानीयुरिति विचिन्त्य ''ब्राह्मीभूषणाः'' राम्भट्ल लक्ष्मीनारायण शास्त्रिवर्याः भावार्थदीपिकेति नाम्ना सुरुचिरां व्याख्यां रचयामासुः। काव्यस्य व्याख्यानस्य च वैशिष्ट्यं ''व्याकरणसार्वभौमाः'' आचार्याः पेरि सूर्यनारायण शास्त्रिवर्याः ''महोपकारस्मृतिः'' इत्याख्यां विपुलां व्याख्यां लिलिखुः। तदत्रास्य काव्यस्यादावस्माभिः यथातथं प्रस्तुतीकृतमिति धिया भिया च इतोऽप्यधिकं लिखितुं न प्रयतामहे सहृदयांश्चानुरुन्धामहे तदध्ययनाय।

काव्यमिदं प्रथमं तावत् सप्ताशीत्युत्तर एकोनविंशतितमे वर्षे (1987) दासभारतीसंस्थायाः पक्षतः श्रीमान् कर्रा ईश्वररायः भावार्थदीपिकाख्य संस्कृत व्याख्यानेन तेलुगु अनुवादेन सह मुद्रापयत्। अस्माकं सौभाग्यवशात् श्रीमतः नारायणदासस्य प्रदौहित्री श्रीमती उपाध्यायुल राजराजेश्वरी काव्यमिदम् अकाडमी पक्षतः देवनागरीलिप्या पुनर्मुद्रापयितुमङ्गीकृतवती। अस्माकम् उपनिदेशिका परिशोधनकलानिपुणा डा. के. वरलक्ष्मीः काव्यमिदं सम्यगधीत्य उद्यमस्फूर्त्या सम्पादयितुं सन्नध्दा अभवत्। तस्याः श्रध्दां कार्यसाधनपटुताम् अभिनन्दामि। अकाडम्याः परिशोधनकार्यवर्गस्य समावेशे काव्यस्यास्य आङ्ग्लानुवादं, श्लोकानुक्रमणिकां च संयोजयाम इति निश्चितम्। तदा आङ्ग्लानुवादकुशला श्रीमती सूरपराजु लता अस्मदभ्यर्थनामङ्गीकृत्य संस्कृतकाव्यानुगुणया आङ्ग्लभाषया अनूद्य दत्तवती। अस्मिन् सन्दर्भे श्रीमत्यै राजराजेश्वरीमहोदयायै कार्तज्ञ्यम्, एवञ्च श्रीमत्यै लतामहोदयायै शुभाभिनन्दनानि वितरामि।

In Public domain. Digitization Muthulakshmi Research Academy

अष्टादशीयोजनायां प्राचीनविशिष्टग्रन्थानां पुनर्मुद्रणावकाशं संस्कृत परिषदे कल्पयित्वा अस्मान् प्रोत्साहितवन्तः नवदेहलीस्थ केन्द्रीय संस्कृत विश्वविद्यालयस्य (राष्ट्रीयसंस्कृतसंस्थानस्य) कुलपतिवर्याः आचार्याः परमेश्वर नारायणशास्त्रिमहोदयाः, कुलसचिवाः आचार्याः सुब्रह्मण्यशर्ममहाशयाः, तेभ्यः सश्रद्धं प्रणामाञ्जलिं निवेदयामः। अपि च उस्मानिया विश्वविद्यालयस्य कुलसचिवेभ्यः परिशोधने सततम् अस्मान् प्रचोदयितृभ्यः आचार्य गोपाल् रेड्डिवर्येभ्यः धन्यवादान् वितरामः।

अस्माकं संस्कृत अकाडम्याः उपनिदेशकः निरन्तराध्ययनाध्यापनरतः युवा विद्वान् डा. वि. सुब्रह्मण्यः, एवञ्च शोधसहायकः अनुसन्धानरतः डा. जोशी सन्तोषकुमारः अस्याः परियोजनायाः समवेक्षकौ। एतयोः कार्यदीक्षां प्राचीनग्रन्थान्वेषणपटुतां चाभिनन्दामि। काव्यस्यास्य मुद्रणं Karshak Art Printers समुचितरीत्या कृतवन्तः। तेभ्यः संस्कृत अकाडमी धन्यवादान् प्रकटयति।

शार्वरि नाम्नि संवत्सरे
आषाढपूर्णिमा
5th July, 2020.

बुधजनविधेयः
आचार्यः के. नीलकण्ठः
निदेशकः
संस्कृत अकाडमी, हैदराबाद्

In Public domain. Digitization Muthulakshmi Research Academy

तारकम् - Grammatico-lexical poem

Literary creation has Four fold division i.e., शास्त्रम्, काव्यम्, शास्त्रकाव्यम् and काव्यशास्त्रम्, according to सुवृत्ततिलकम् of क्षेमेन्द्र। ''शास्त्रम् काव्यम् शास्त्रकाव्यम् काव्यशास्त्रम् च भेदतः । चुतःप्रकारः प्रसरः सतां सारस्वतो मतः''क्षेमेन्द्र mentioned भट्टि and भौमक as the authors of काव्यशास्त्र. **''भट्टिभौमककाव्यादि काव्यशास्त्रं, प्रचक्षते''।** The term काव्यशास्त्रम् is used by क्षेमेन्द्र in the sense of Sanskrit compositions instructive in specific subjects like grammar, prosody, poetics etc. But the term काव्यशास्त्रम् is used in its conventional sense of Sanskrit poetics in the history of Sanskrit literature. The instructional poems like भट्टिकाव्यम् and others are mentioned as शास्त्रकाव्यम् in the history of classical Sanskrit literature.

"History of Classical Sanskrit poetry" gives a list of शास्त्रकाव्यs. रावणववधम् or भट्टिकाव्यम् by भट्टि illustrates aphorisms of grammar and Sanskrit poetics; कविरहस्यम् of हलायुध illustrates verbal roots; अर्जुनरावणीयम् of भट्टभौमक of 11 century, कुमारचपालचरितम् of होमचन्द्र (1088-1172), धातुकाव्यम् of मेलपुत्तर नारायणभट्ट of 16th Century, वासुदेवविजयः by वासुदेव of 16th Century, नक्षत्रमाला of त्रिपाठि शिवराम of 18th Century, सुरूपराघवम्, सुगलार्धमाला of पेरुन्तान नारायणशर्मा, श्रीचिह्नकाव्यम्, सुभद्राहरणम्, ब्रह्मदत्तनारायणः रामवर्ममहाराजचरितम् परमेश्वरशिवद्विजय, गजेन्द्रमोक्षम्, रासक्रीडा, कंसवधमहाकाव्यम् of मोहनभट्ट, दशाननवधकाव्यम् of योगीन्द्रनाथ तर्कचूडामणि, लक्ष्मणदर्शः of दिवाकर, यदुवंशकाव्यम् of काशीनाथ and कौमुदीकथाकल्लोलिनी गद्यकाव्यम् of श्रीगयाचरणत्रिपाठि are the famous शास्त्रकाव्याs. तारकम् can also be categorized as शास्त्रकाव्यम् since the author श्रीमदज्ञाड आदिभट्टनारायणदास himself stated his work to be an

In Public domain. Digitization Muthulakshmi Research Academy

instructional literary piece. The author stated that the purpose of composing this work is to illustrate the aphorisms related to the classical literature, of Paninian grammar, in a poetic way. श्री पेरि सूर्यनारायणशास्त्री, an accomplished grammarian wrote elaborate foreword to this master piece highlighting the author's mastery over Sabdasastra.

The author composed this poetic composition not only to illustrate the aphorisms of Paninian grammar but also the science of prosody.

सुवृत्ततिलकम् क्षेमेन्द्र states: 'As the pearls duly put in garlands of gold, become charming, similarly the metres employed properly in the right context, become exceedingly graceful'.

''सुवर्णार्हप्रबन्धेषु यथास्थाननिवेशिनाम् ।
रत्नानामिव वृत्तानां भवत्यभ्यधिका रुचिः'' ।। (३.३७ सु.ति.)

Following the rules of Sanskrit poetics, श्रीमदज्ञाड आदिभट्टनारायणदास in his metrical composition 'तारकम्' deployed उपजाति metre in first canto replete with philosophical ideas and मालिनी metre in the concluding verse. मालिनी metre was employed in the second canto abound in cultural aspects and censure of atheism and अनुष्टुप् metre in the concluding verse. अनुष्टुप् metre was employed in the third canto which consists of beautiful description of nature and voyage to चन्द्रद्वीपा and उपजाति metre in concluding verse. The verses of fourth canto which described the fierce battle, were composed in 44 different metres and the last verse was in प्रहर्षिणी. The fifth canto which describes the victory of two heroes of valor and marriage ceremony of the prince and princess, was composed in प्रहर्षिणी metre

In Public domain. Digitization Muthulakshmi Research Academy

and the last verse in शार्दूलविक्रीडितम्. श्रीमदज्ञाड आदिभट्टनारायणदास did grotesque experiment of composing the concluding verse of the composition in चक्रबन्धः, i.e. in the shape of wheel.

हेमेन्द्र, *the author of* सुवृत्ततिलकम् suggests to employ metres suitable for various emotions and descriptions of the poetic compositions .

काव्ये रसानुसारेण वर्णनानुगुणेन च ।
कुर्वात सर्ववृत्तानां विनियोगं विभागवित् ।। (३.७ सु.ति)

The poet Aptly employed metres suitable for the principal sentiment of heroism and other subordinate sentiments of love, sorrow, anger, fear, disgust, wonder and tranquility. उपजाति metre was employed for the culmination of sentiment of tranquillity; सालिनी metre was employed in the second canto suitable for injunctions of स्मृति texts to evoke the emotion of tranquillity; प्रहर्षिणी metre was deployed for the culmination of emotions of heroism and love.

Metrical organization of the fourth canto which describes the fierce battle is noteworthy. Forty four different metres employed in the fourth canto are स्रग्धरा वसन्ततिलका पुष्पिताग्रा अनुष्टुप् द्रुतविलम्बितम् भुजङ्गप्रयातम् पृथ्वी शिखरिणी हारिणी मन्द्राक्रान्ता उपस्थिता गीतिः मत्ता पञ्चचामरम् चन्द्रलेखा हरिणीप्लुतम् श्येनिका शुभद्रकम् स्रग्विणी आर्यागीतिः शम्बुनाटकम् क्रौञ्चपदा तन्वी मत्तक्रीडा मत्तेभम् सुमुखी मत्तमयूरम् अपस्थितम् मौक्तिकमाला लक्ष्मीः चञ्चरीकावली चन्द्रलेखा तोटकम् अलोता भुजङ्गविजृम्भितम् वातोर्मिः वैश्वदेवी शुद्धविराट् वितानम् मौक्तिकमाला and प्रहर्षिणी । In this canto, the poet, with his erudition in prosody, employed all these metres for the culmination of five emotions of anger, heroism, fear, disgust and wonder (रौद्रवीरभयानकबीभत्साद्भुतरसाः)

In Public domain. Digitization Muthulakshmi Research Academy

The Academy hopes that this instructional poetic composition 'तारकम्', an epitome of the literary prowess of श्रीमदज्ञाड आदिभट्टनारायणदास in the शब्दशास्त्रम् and छन्दश्शास्त्रम्, will cause literary delight, which is the perfect fruition of the literary compositions, to the readers of refined tastes.

I express my sincere gratitude to Hon'ble Director Prof. K. Neelakantham, a guiding force in our daily endeavor. I am also thankful to my colleagues Dr. V. Subrahmanyam, (Deputy Director) Principal Investigator and Dr. Santosh Kumar Joshi, (Research Asst.) Co-principal Investigator of the project entitled "Reprinting of rare Sanskrit books" and Sri K. V. Suryaprakash, (Research Asst.) for extending their help in publishing this work.

I also remain grateful to Smt. Upadhyayula Rajarajeswari, the great grand daughter of श्रीमदज्ञाड आदिभट्टनारायणदास for providing the Sanskrit works of her great grand father. I also thank Smt. Bhavanam Sridevi for her assistance in DTP work.

Dr. K. Varalakshmi
Editor
Deputy Director

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

गुण्डेराव हक्करिवर्यः, अनुमुल वेङ्कटशेषकविवर्यः, अल्लंराजु रङ्गशायिकविवर्यः, अष्टकाल नरसिंहरामशर्मवर्यः, आणिविल्लि वेङ्कटशास्त्रिवर्यः, एलेश्वरोपाध्यायुलुवर्यः, ओगेटि परीक्षिच्छर्मवर्यः, काशी कृष्णाचार्युलुवर्यः, श्रीभाष्यं विजयसारथिवर्यः, कुण्टिमद्दि शेषशर्मवर्यः, गडियारं वेङ्कटशेषशास्त्रिवर्यः, गरिकपाटि मल्लावधानिवर्यः, गोल्लापिन्नि वासुदेवशास्त्रिवर्यः, तेल्कपल्लि रामचन्द्रशास्त्रिवर्यः, दुव्वूरि वेङ्कटरमणशास्त्रिवर्यः, दोर्भल विश्वनाथशर्मवर्यः, दोर्भल प्रभाकरशर्मवर्यः, पञ्चाग्नुल आदिनारायणशास्त्रिवर्यः, पल्ले पूर्णप्रज्ञाचार्युलुवर्यः, पिण्डिप्रोलु लक्ष्मणकविवर्यः, पुष्पगिरि तिम्मन्नवर्यः, पोराल भरतशर्मवर्यः, मण्ड कामेश्वरकविवर्यः, मण्डपाक पार्वतीश्वरशास्त्रिवर्यः, मल्लम्पल्लि शरभय्यशर्मवर्यः, मेडवरमु सुब्रहमण्यशास्त्रिवर्यः, मेडेपल्लि वेङ्कटरमणाचार्युलुवर्यः, विक्राल शेषाचार्युलुवर्यः, वेदान्तदेशिकुलुवर्यः, वेदान्तं कुमारस्वामिवर्यः, सामवेदं राममूर्तिशर्मवर्यः, पुल्लेल श्रीरामचन्द्रुडुवर्यः इत्यादयो महान्तो मूर्धन्याः तेलुगुदेशीयाः संस्कृतकवयः बहवो विलसन्ति। अमीषु चतुष्पञ्चान् विहाय अन्ये संस्कृतजगति अप्रसिद्धाः। कारणं तावत् तेषां संस्कृतकृतयः तेलुगुलिप्या मुद्रिताः। अतस्ताः कृतयः तेलुगुदेशे एव प्रचुरं प्राचुर्यं लेभिरे।

तेषु अन्यतमः महाकविः, हरिकथापितामहः, लयब्रह्मा, ब्रह्मश्रीः अज्ञाड आदिभट्ल नारायणदासुवर्यः। तेन विरचितासु षट्चत्वारिंशतिकृतिषु तारकमिति कृतिः चन्द्रायते। अनया कृत्या कवेः भाषापरिणतिः, भावविन्यासः, अलङ्कारचमत्कृतिः धातुप्रयोगपद्धतिः सर्वोत्कृष्टं सत् नान्यतो दर्शनीयं विभाति। यथैव कौमुदी मन आह्लादयति तथैव कृतिरियं काव्य-शास्त्रपिपासूनां मनो रञ्जयति। यथैव पक्षी स्वयंप्रतिभया नीडं निर्माति तथैव कविरयं स्वयंप्रतिभया अपूर्वामिमां काव्यप्रभां चकार। कविरस्यां सङ्गीतसाहित्यनृत्यादितत्त्वानि न्ययूयुजत्। यद्यपि परिमाणरीत्या लघुकृतिरियं तथापि प्रौढतायाम् उत्कृष्टतमा।

In Public domain. Digitization Muthulakshmi Research Academy

एतादृशान् कवीन् परिचाययितुं संस्कृतपरिषदा अष्टादशीति परियोजनामाध्यमेन प्रकाशनानि विदधाति। इयं परियोजना राष्ट्रियसंस्कृतसंस्थानमिति पूर्वनाम्नः केन्द्रियसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। परियोजनायाः अस्याः आवाम् अनुसन्धातारावितिति आत्मानं धन्यौ मन्यावहे। ईदृगवसरं दत्तवते परिषन्निदेशकाय आचार्याय नीलकण्ठवर्याय आदौ कार्तज्ञं विन्दावहे।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यश्च नमोवाकान् वितरावः। अस्मानियाविश्वविद्यालयस्य कुलपतये, कुलसचिवाय च आधमर्ण्यं प्रकटयावः। अनर्घां कृतिमिमां परिचाययन्ती अस्याः सम्पादनकर्मणि आत्मानं व्यापारितवत्यै वरलक्ष्मीवर्यायै कृतज्ञतां आविष्कुर्वः। संस्कृतपरिषदः सहकारिसदस्येभ्यः धन्यवादान् विदध्मः।

इत्थं बुधजनविधेयौ परियोजना अनुसन्धातारौ

सन्तोषसुब्रह्मण्यौ

षष्ट्यब्दग्रन्थमालापराख्या दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

In Public domain. Digitization Muthulakshmi Research Academy

महोपकारस्मृतिः

"व्याकरणसार्वभौम"
पेरि सूर्यनारायणशास्त्री
राजमहेन्द्रवरम्

गुरवे सर्वलोकानां भिषजे भव रोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ।।

श्रीमद्भारतीयालङ्कारिकाणां मूर्धन्यः, सकलदार्शनिकसिद्धान्तवेत्ता, जगन्नाथपण्डितनरेन्द्रः रमणीयार्थप्रतिपादकशब्दः काव्यमिति काव्यलक्षणं न्यरूपयत्। इदमेव लक्षणमद्यतनैराद्रियते, तस्य च लक्षणस्य श्रीमतां जन्मसिद्धसकलविद्यानां पुम्भावसरस्वतीनां सर्ववेदवेदाङ्गशास्त्रार्थपारदृश्वनामज्ञाडादिभट्टनारायणदासमहाकवीनां प्रबन्धाः सर्वात्मना उदाहरणं भवितुमर्हन्ति, यतः पण्डितराजेन काव्यस्य तद्घटनानुकूल-शब्दार्थोपस्थितिरूपा कविगता केवला प्रतिभा कारणत्वेन प्रत्यपादि। तेनैव महाशयेन देवतामहापुरुषप्रसादादिजन्यमदृष्टं प्रतिभाया हेतुत्वेन प्रादर्शि च, नारायणदास-महोदयानां विनैव गुरोस्सकाशादध्ययनं परदेवताप्रसादजन्येन अदृष्टेन काव्यकरणानुकूला प्रतिभा समुदपादि, प्रतिज्ञातञ्च नारायणदासमहाकविना स्वीयतारककाव्यप्रारम्भे।

"स्वभावपाण्डित्यबलेन कुर्वे" इति एवमेव काशीशतकेऽपि।
व्यरचीत्थं मया काशीशतकं नैजधीमता
श्रीनारायणदासेन कवितागानशालिना" इति। यद्वशेन एते महोदया न्यायव्याकरणालङ्कारवेदान्तमीमांसादिशास्त्रपारदृश्वनामपि विस्मयजनकान् नवरसभरितान् प्रबन्धराजान् निरमासिषुः। ते च प्रबन्धा आन्ध्राङ्ग्लसंस्कृतभाषासु विराजन्ते, तद्ग्रन्थावलोकने श्रीमतां महाकवीनां कियती व्याकरणमर्मज्ञता? कियती अलङ्कार-विन्यासपद्धतिः? कियद्वा वेदान्तशास्त्रवैदुष्यम्? कीदृशो वा भारतीयमतकुलादितत्त्वेषु विश्वासः? कियान्वा भावाविष्करणपथः? कियद्वा व्यङ्ग्यार्थप्रकाशनम्? इत्यादि। सर्वं स्पष्टीभवति विश्वेषां विपश्चिदपश्चिमानाम्।

In Public domain. Digitization Muthulakshmi Research Academy

एवं स्थिते महात्मनश्चरिते ''तदीयप्रबन्धानां मध्ये तारकाख्यं महाकाव्यं प्रति किञ्चिदवलोकयामः - पाणिनिमहर्षिणा लौकिकानां वैदिकानाञ्च शब्दानां साधुत्वं प्रतिपादितम्। तेषां मध्ये लौकिकशब्दानां साधुत्वप्रतिपादकानि यानि सूत्राणि तेषामुदाहरणतया काव्यमिदं मया निर्मीयते, इति प्रतिज्ञाऽकारि। ''अनेन ज्ञायते'' इदं काव्यं व्याकरणशास्त्रोदाहरणभूतमिति। सा च प्रतिज्ञा पञ्चसर्गात्मके अत्र काव्ये साकल्येन महाकविना निर्व्यूढा, पाणिनीये सनादयः -१२ विकरणाः -२३, लकाराः -१०-, तङः -१८, कृतः प्रायेण शतं -१००, सुपः-२१ टाबादिस्त्री-प्रत्ययाः -९, तद्धिताः प्रायेण द्विशतं-२०० इत्याहत्य अष्टविधाः प्रत्यया-स्तृतीयचतुर्थपञ्चमात्मकेऽध्यायत्रये पाणिनिकविना उपादिश्यन्त।

एतेषां प्रत्ययानां प्रकृत्या संयोजने प्रयोगार्हाश्शब्दा निष्पाद्यन्ते, प्रकृतिश्च धातुप्रातिपदिकरूपेण द्वेधा प्रादर्शि मुनिना'' प्रकृतिप्रत्ययसंयोजनेऽपेक्षितं कार्यजात-मतिरिक्तमध्यायपञ्चकं बोधयति निरुक्ताष्टविधप्रत्ययान्तैर्निष्पन्नशब्दो अत्र काव्ये प्रादर्शिषत, तेषां सर्वेषां शब्दनामात्र प्रदर्शने पौनरुक्त्यभिया विरम्यते। परन्तु इदमेकमवश्यं वक्तव्यमस्ति - व्याकरणशास्त्रे लिङ् प्रक्रिया बहुला दुरवगाहा च, तत्रापि लुङ्, लिटोः प्रक्रिया दुर्धरा दुरवबोधा च ''भूतमात्रे लुङ्'' अनद्यतनभूते लङ्, भूतानद्यतनपरोक्षे लिट् एषा प्रक्रिया अतिक्लिष्टेति मन्यानास्तत्प्रयोगेणैव मम पाण्डित्यप्रकर्षाविष्करणमावश्यकमित्यवगच्छन्तश्च नारायणदासमहाकवयः प्राथमिके सर्गत्रये लुङ्, लङ्, लिङन्तानि शब्दरूपाणि प्रायुञ्जत इति तैः प्रथमत एव प्रतिज्ञा कृता।

१. सर्गे, लुङ् प्रयोगाः

पाणिनीये-लुङि शबाद्य वादतया लाघवेन प्रक्रियानिर्वहणाय'च्लि' प्रत्ययो विकरणो विहितः, स च क्वापि न श्रूयते। तस्य स्थाने पञ्च प्रत्यया आदेशाविकिताः।

१. च्लेः सिच् - एष च अनेकधा विपरिणमितः

(१) क्वचिल्लुगादिना लुप्तः

श्लो. १. प्रथमसर्गे, २०. अभूत्, २८. अगात्, ३२. अशक्त

In Public domain. Digitization Muthulakshmi Research Academy

(२) क्वचित्तस्य इडागमः -

श्लो. १-१८ अयोदिष्ट, ३६. अलोकिष्ट-४, अजनिष्ठाः ३१ अगटीत्।

(३) क्वचिदिडभावः -

श्लो. १-४ अवात्सीत् ८ अन्वसार्षीत्

(४) क्वचित्सिच इट् धातोः सक्

श्लो. १-५४ अहासीत्

२. फीचोऽवादतया च्लेश्श्रिण्

श्लो. १-७, अनायि १० अभ्राजि

३. तथा, चङ्

श्लो. १-१८ अजीजनः ५८ अमम्रदत्, अचक्रिशत्

४. तथा अङ्

श्लो. १-३० अपप्तत् ९ अशकत् ३० अरुदत्

५. तथा क्सोऽपि विहितः परन्तु स प्रकृतेनोपयुयुजे।

३. सर्गे लिट्प्रयोगाः

धातोर्नैयत्येन द्वित्वं लिटि व्यधायि

तत्र विचित्राः प्रक्रियाः कल्पिताः

१) लिटि परतः क्वचित् 'आम्' विकरणः लिटो लुकि ततः लिङ्परकाणां कृभ्वस्तीनामनुप्रयोगः

सर्गः -१ श्लो-१ कोलाञ्चक्रतुः २. प्रबोधयामास ३. वैद्यामास एषु आमन्तं भिन्नं पदमव्ययम्।

२) आकारान्तधातोः परस्मैपदे लिटि औकारः

४ श्लो. अन्तर्दधौ ७. आबभौ २५ अधितष्ठौ

अन्यत्र अकारः ६. जगाम ८ आट

आत्मनेपदे एकारः २ निन्ये

In Public domain. Digitization Muthulakshmi Research Academy

३) अदधातोः 'घस्लादेशः' स. १-२० जघास

४) धातोर्लिटि द्वित्वमेत्वाभ्यासलोपश्च।

३- सर्गः २३-श्लोकः रेजे ३१- श्लोकः रेजिरे

अत्र सर्गे आमन्तात्कर्तरि कर्मणि च लिट्पराः कृभ्वस्तयः बहुधा प्रायोजिषय।

श्रीमतां महाकवीनामेष स्वभावः - यत् स्वपरिचितानां पदार्थानां तत्स्वरूपेणैव स्वकाव्येषूपनिबन्धनम्। ते च पदार्थाः लौकिकाः शास्त्रैकगम्या वा भवन्तु नाम। तत्रापि द्वयी गतिः स्वाभ्यस्तानां शास्त्राणां तद्रूपेणैव प्रदर्शनेन स्वकाव्यशोभा जननमित्येका रीतिः। शास्त्रार्थान् स्वस्वरूपेणाप्रदर्श्य केवलं तद्विषयसंयोजनमात्रेण काव्यस्य शोभाजननमित्यन्या रीतिः।

आद्या रीतिः - मुरारिश्रीहषदिः अन्या रीतिः कालिदासादेः आद्यां रीतिं परिशीलयामः। अनर्घराघवे'' - शूर्पणखामाल्यवतोस्संवादे ''नहि स्थानिवद्भावेन जहाति क्षत्रियत्वम्'' चन्द्रोदयवर्णने ''जयति जनिकर्तुः प्रकृतिता''।

श्रीहर्षं पश्यामः

१) समवायिकारणगुणाः कार्ये सङ्क्रामन्ति न निमित्तकारणगुणाः
इति नैयायिकसमयः, व्यभिचरितो वा? इत्युत्प्रेक्षते दमयन्तीस्तनवर्णने,
कलशे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः,
सतदुच्च कुचौ भवन् प्रभाझुरचक्रभ्रममातनोति यत्,
चक्रभ्रमः - चक्रस्य भ्रमणं चक्रवाकभ्रान्तिश्च.

२) अधरबिम्बमित्यादय उपमितसमासा असमर्था इति, उपमानानि सामान्यवचनैः इति सूत्रे महाभाष्यकारीयसिद्धान्तो विलसति, तत्र च हेतुः साधारणधर्मस्य उपमानोपमेययोरुभयत्रापि शाब्दान्वयेन उपमेयस्य सविशेषणत्वेन असामर्थ्यमेव। एवं स्थिते 'अधरबिम्ब' मित्यत्र अधरं बिम्बमिवेति किमर्थ-मसामर्थ्येऽपि समासस्वीकरणम्? अधरं बिम्बं यस्मादिति व्यधिकरणबहुव्रीहिणा तस्य समर्थत्वमेव सिद्ध्यति, लोके उपमानभूतं बिम्बफलं भैम्यधरोष्ठात्

In Public domain. Digitization Muthulakshmi Research Academy

अधरं - नीचमिति काव्यशाखापि सम्भवतीति वर्णयति श्रीहर्षः।

''अधरं किल बिम्बनामकं फलमस्मादिति भव्यमन्वयम्
लभतेऽधरबिम्बमित्यदः पदमस्या रदनच्छदं वदत्।

३) तमो नातिरिक्तः पदार्थः किन्तु तेजोऽभावरूपमेव, नीलं तमश्चलतीति प्रतीतिः दीपापसरणौपाधिके भ्रान्तिरेव, इति वैशेषिकसिद्धान्तः, तमुपनिबध्नाति श्रीहर्षः।

''ध्वान्तस्य वामोरुविचारणायां वैशेषिकं चारुमतं मतं मे,
औलूकमाहुः किल दर्शनं तत् क्षमं तमस्तत्त्वनिरूपणाय

कणादशास्त्रस्य वैशेषिकमिति, औलूकमिति व्यवहारः, तमसि यच्चक्षुः पदार्थान् विशेषरूपेण गृह्णाति तदेवोत्कृष्टं खलु, तच्च दिवान्धस्य चक्षुः रात्रे वामयोरूर्वोः विशेषेण चक्षुषा प्रत्यक्षीकरणं सर्वाभिमतमिति सार्वजनीन-स्समुदाचार इति काव्यशोभा। एषा च वामोरुपदेन ध्वन्यते कविना।

४) एवं नारदं प्रति इन्द्रस्य वचने उपेन्द्रस्य जैमिनिमुनित्वमुदीतमिति वर्णयति कविः

''विश्वरूपकलनादुपपन्नः तस्य जैमिनिमुनित्वमुदीये
विग्रहं मखभुजामसहिष्णुः व्यर्थतां मदशनिं स निनाय''

जैमिनिर्महर्षिः विश्वरूपाणि = मीमांसा सूत्राणि रचयामास। उपेन्द्रोऽपि विश्वरूपाणि = दशावतारान् दधार। जैमिनिः देवानां शरीरादिपञ्चकं निषिषेध। नवमे, 'वज्रहस्तः पुरन्दरः' 'सहस्राक्षो गोत्रभिद्वज्रबाहुः' इत्यादीना-मर्थवादत्वमङ्गीचकार। उपेन्द्रोऽपि देवानां विग्रहं राक्षसैस्सह विरोधं न सेहे। अत एव मम वज्रायुधस्य वैयर्थ्यं निरुपयोगत्वञ्च अकल्पयदिति काव्यशोभा, अनुजस्य उपेन्द्रस्य साहाय्यात् अहमिदानीं निरुपद्रवो वसामीति व्यङ्ग्यार्थः काव्यशोभां पुष्णाति, एवं

१) स्वं नैषधादेशमहो विधाय कार्यस्य हेतोरपि नानलस्सन्
किं स्थानिवद्भावमदत्त दुष्टं तादृक्कृतव्याकरण पुनस्सः

In Public domain. Digitization Muthulakshmi Research Academy

२) इह किमुषसि पृच्छाशंसि किं शब्दरूपं
प्रतिनियमितवाचा वायसेनैष पृष्टः
भण फणिभवशास्त्रे तातङः स्थानिनौ का
विति विहिततुहीवागुत्तरः कोकिलोऽभूत् ।

३) गत्वान्तरा नलं भैमीं नाकस्मात्त्वं प्रवेक्ष्यसि
षण्णां चक्रमसंयुक्तं पठ्यमानण्ढकारवत् ।

४) उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मनः
अपवर्गे तृतीयेति भणतः पाणिनेरपि ।

५) क्रियेत चेत्साधु विभक्तिचिन्ता
व्यक्तिस्तदा सा प्रथमाभिधेया
या स्वौजसां साधयितुं विलासै
स्तावत् क्षमा नामपदं बहुस्याम् ।

६) उदयतिस्म तदद्भुतमालिभि
र्धरणिभृद्भुवि तत्र विमृश्ययत्
अनुमितोऽपि च बाष्पनिरीक्षणात्
व्यभिचचार न तापकरो नलः ।

इत्येवमादयश्शतशस्सन्ति काव्ये। सर्वत्रापि तत्तच्छास्त्रार्थान् स्वरूपेणैव प्रदर्शयति तेन च काव्यस्य शोभां जनयति च. अतएव 'नैषधं विद्वदौषध' मिति सार्वलौकिकी प्रतीतिस्सञ्जाता ।

द्वितीया रीतिः कालिदासादेः, तेहि सर्वेषु शास्त्रेषु विद्यमानान् सिद्धान्तान् सम्प्रदायांश्च सूक्ष्मरूपेण स्पृशन्ति न तु श्रीहर्षादय इव शास्त्रार्थान् विमृशन्ति, यथा।

१. एतावता नन्वनुमेयशोभिकाञ्चीगुणस्थानमनिन्दितायाः, इति अत्र पक्ष-साध्यहेतून् विविच्य अप्रदर्श्य अनुमानप्रक्रियां दर्शयति तावता ज्ञायते तस्य

In Public domain. Digitization Muthulakshmi Research Academy

न्यायवैदुष्यम्। प्रयोगश्च इत्थं मल्लिनाथेन कथितः, गौरीनितम्बं लोकातिशायि सान्दर्यगिरिशाङ्कारूढत्वात्। यन्नैवं तन्नैवम्।

२. 'अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः'

इदञ्च वाक्यं न्यायवेदान्तव्याकरणमीमांसाशास्त्रेषु विद्यमानान् बहून् विषयान् गर्भीकरोति, न तु विषयप्रपञ्चः कविना नोट्टङ्कितः।

३. 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्'

सुदक्षिणा नन्दिन्या, मार्गमन्वगच्छत्, इत्यस्य इदमुपमानम्, श्रुत्यर्थानुगतयः प्रमाणं, न स्वातन्त्र्येण विरुद्धास्त्वप्रमाणमेव इतिहि सर्वदार्शनिकानां सिद्धान्तः सूक्ष्मेक्षिकया प्रादर्शि, नन्दिन्या श्रुतिसादृश्यं, सुदक्षिणाया स्मृतिसादृश्यञ्च प्रत्यपादि। अनेन सर्वात्मना नन्दिनी सेवयैव सुदक्षिणायाः फलसिद्धिः, नान्यथेति काव्यशोभा, तथा प्रत्ययप्रकृतियोगसन्निभः। इत्याह कालिदासः, माघोऽप्याह।

विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम्
फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि।

कापिले तन्त्रे बुद्धिरेव सर्वाण्यपि कर्माणि निर्वर्तयति, फलन्तु पुरुषो भुङ्क्ते, इति सिद्धान्तः, प्रत्यपादि एवं साक्षिमात्रे भवति (कृष्णे) सेनया कृतो विजयोऽपदिश्यते।

तथा - अप्यनारभमाणस्य विभोरुत्पादिताः परैः

व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः

आकाशोविभुः भेरीदण्डसंयोगादिभिः जनिताश्शब्दा आकाशस्य गुणतां यान्ति, तद्वत् किञ्चिदप्यकुर्वाणस्य विभोः समर्थस्य प्रयोजनानि स्वाधीनानि भवन्ति।

तथा - 'धातुलीनमुपसर्ग इवार्थम्' इत्याह माघः।

In Public domain. Digitization Muthulakshmi Research Academy

एवमनेकत्र महाकवयः शास्त्रसम्मतानर्थान् प्रादर्शयन् एवं शास्त्रविषये कवीनां द्वयीगतिः प्रादर्शि, आद्या रीतिः न सर्वसुगमा। परन्तु कवेः पाण्डित्यप्रकर्षः प्रतिभाति, एतावता नान्येषु न्यूनता समापादनीया 'प्रकृतिः खलु सा तेषाम्'। द्वितीया रीतिस्तु सर्वेषां हृदयङ्गमा सुबोधा च यद्यपि काव्यमार्गे शास्त्राणां स्वस्वरूपेण प्रदर्शनं रसास्वादस्य विच्छेदकारि तथापि संयोगे नखक्षतानीव रसास्वादमुत्तेजयन्ति इति सार्वलौकिकमेतत्।

द्वितीयां रीतिमाश्रयतां महाकवीनां विषये विचित्रा गमनिका परिशीलनीया। यत् - आमुखे केचन शब्दा असाधुत्वेन भासन्ते। सम्यक्परिशीलनेन साधवो भवन्त्येव। तादृशशब्दानां प्रयोगेणैव स्वकीयः शास्त्रपटिमा प्रतिभाति, यथा - अधिकरणे शेतेः '३-२-१५ इति सूत्रे 'गिरौडश्छन्दसि' इति वार्तिकेन गिरिशब्दे उपपदे शीङः छन्दसि डो विहितः, गिरौ शेते इति गिरिशः - एतद्रीत्या श्रयणे गिरिशशब्दश्य लोके असाधुत्वमेव एवं स्थिते कालिदासः -

१) गिरिशमुपचार प्रत्यहं सा सुकेशी

२) आरोपितं यद्गिरिशेन पश्चात्

३) शुश्रूषमाणां गिरिशोऽनुमेने

४) 'अधोवनिन्ये गिरिशाय गौरी' इति गिरिशशब्दमसकृत् प्रायुङ्क्त। पूर्वोक्तरीत्या लोके गिरिशशब्दोऽसाधुरिति स्पष्टमेव प्रतिभाति हि, वस्तुतस्तु अयं शब्दः लोकेऽपि साधुरेव गिरिरस्यास्तीति विग्रहे 'लोमादिपामादिपिच्छादिभ्यः शनेलचः' इति सूत्रेण लोमादित्वात् मत्वर्थीयश्शः गिरिशः। इयञ्च प्रक्रिया ''तद्धितो वा' इति वार्तिके महाभाष्यकारैरेव प्रादर्शि।

एवं ङि फलाधातोः निष्ठायामनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः (७-३-५५) इत्यनेन फुल्लशब्दो निपातितः। तेन उपसर्गरहितस्यैव साधुत्वम् परन्तु कालिदासः

१) लोध्रध्रुमं सानुमतः प्रफुल्लम्

२) प्रफुल्लराजीवमिवाङ्कमध्ये

३) उषसि सर इव प्रफुल्लपद्मम्

In Public domain. Digitization Muthulakshmi Research Academy

इत्यादि प्रायुङ्क फुल्ल - विकसने इति धातोः वचाद्यचि प्रफुल्लमिति साधुरेव भवति।

एवं महाकवीनां ग्रन्थेषु विचित्राश्शब्दाः प्रायुज्यन्त, तेहि पदशास्त्रमर्मज्ञाः ''उदयति विततोर्ध्वरश्मिरज्ञा'' विति माघः

''प्रविघाटयिता समुत्पत''न्निति भारविः

''रक्षांसीति पुरापि संश्रुणुमहे'' इति मुरारिः

हंसं तनौ सन्निहितं चरन्तम्

मुनेर्मनोवृत्तिरिव स्विकायाम् इति श्रीहर्षश्च।

एवं श्रवणमात्रेण असाधुत्वेन भासमानानां सम्यक्परिशीलने साधूनामेव सतां शब्दनां प्रयोगमात्रेण स्वीयं पाण्डित्यमाविश्चक्रुर्महाकवयः। इयञ्च रीतिः प्रकृत-तारकग्रन्थेऽपि दृश्यते। अत्र च साक्षात् शास्त्रार्थप्रदर्शनं क्वाचित्कम्, प्रकृतग्रन्थ-निर्मितिस्तु केवलं स्वीयपदशास्त्रपाटवप्रदर्शनायैव। अतः ये ये शब्दा आमुखे असाधुत्वेन प्रतिभान्ति, ते एव विचारणे साधुत्वमाप्नुवन्ति तादृशाश्शब्दाः महाकविना प्रायुज्यन्त तान् किञ्चित्पश्यामः।

१) द्वितीयसर्गे १२ श्लोके 'अयथातथ्य'मिति महाकवेः नारायणदासस्य प्रयोगः। अत्र काचिद्विप्रतिपत्तिरस्ति, यथातथा शब्दात् ब्राह्मणादित्वात् भावे ष्यञि, सङ् पूर्वकत्वे ''यथातथा शब्दात् पूर्वयोः पर्यायेण ७-३-३१ इति सूत्रेण पर्यायेणोभयपदवृद्धिर्विहिता। तेन 'आयथातथ्यं आयाथातथ्य' मिति हि रूपद्वयं सिद्ध्यति। प्रकृते एकस्यापि पदस्य वृद्धिर्न कृता इत्याक्षेपः प्रतिभाति, अत्र महद्भिर्यतनीयम् मम तु प्रतिभाति। तथ्यमनतिक्रम्य यथातथ्यमिति पदार्थानतिवृत्ता-वव्ययीभावः, ततः यथातथ्यमभावः, अयथातथ्यमिति अर्थाभावे अव्ययीभावः, यथा षट्संज्ञासूत्रे यथा लक्षणमप्रयुक्ते इति महाभाष्ये अव्ययीभावद्वयम्, न यथातथ्यम् = अयथातथ्यमिति यद्वा नञ् तत्पुरुषेऽपि तस्य साधुत्वं सिद्ध्यति। 'सा यथातथ्यवृत्त' मिति मूलम्, अत्र स + अयथातथ्य इति च्छेदमाश्रित्येष विचारः प्रस्तुतः यदि तु स + आयथातथ्य इति च्छेदः क्रियते तदा ब्राह्मणादित्वात् ष्यञि, निरुक्तसूत्रेण

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वपदमात्रस्य वृद्धौ, सवर्णदीर्घे, सायथातथ्य इति तद्धितान्तं साध्वेव, तत्र न कापि विप्रतिपत्तिः, एवञ्च अव्ययीभावद्वयस्वीकारे अव्ययीभाव नञ् तत्पुरुषयोः तद्धितान्ताश्रयणे वा तेन सहेति तुल्ययोगे (२-२-२८) इति बहुव्रीहौ सहस्य सादेशे सवर्णदीर्घे च सायथातथ्यवृत्तमिति नारायणदासमहाकवेः प्रयोगस्सङ्गच्छेते। एतत्प्रकारत्रयं मनसि कृत्वैव एष विशिष्टप्रयोगो महाकविनाऽकारि। अत एव 'स्वभावपाण्डित्यबलेन कुर्वे' इति प्रतिज्ञा निर्व्यूढा। मध्यमपक्षमाश्रित्य श्रीलक्ष्मीनारायणशास्त्रिभिर्व्याख्यातम्।

२) सर्गे, ३१ श्लोके 'व्यपणयदि'ति श्रीदासमहाकवेः प्रयेगः, विपूर्वकात् पणधातोः लङि व्यपणयत् इति रूपम्। अत्र काचन विचिकित्सा। पणधातोः स्तुतौ "गुपूधूपविच्छिपणिपनिभ्य आयः" ३-१-३२ इति सूत्रेण आयप्रत्यये पणाय इति जाते "सनाद्यन्ता धातवः" इति विशिष्टस्य धातुत्वे ततो लङि अडागमे व्यपणायदिति रूपम् स्तुतावन्यत्र तु न आयप्रत्ययः। अतो लङि आत्मनेपदे व्यपणत इति रूपम्। एवञ्च स्तुतौ व्यपणायत् इति, अन्यत्र व्यपणत इति भवति। व्यपणयदिति कथं सङ्गच्छत इति हि प्रश्नः, एवं समाधीयते, पणते इति पणः पचाद्यच्, ततः "प्रातिपदिकाद्धात्वर्थे बहुलमिष्टवच्च" इत्यनेन आचष्ट इत्यर्थे णिच्, इष्टवद्भावेन टिलोपश्च तस्य स्थानिवद्भावेन नोपधावृद्धिः ततः कर्तरि लङि, तिपि इकारलोपे, शपि, गुणे - अयादेशे, निशब्दयोगे यणि व्यपणयत्, अतः व्यपणयदिति दासकविप्रयोगस्साधीयानेव।

३) ५ सर्गे, ५६ श्लोके अर्थयस्व अत्रायमाक्षेपः अर्थशब्दात् प्रातिपदिकात् णिच्प्रत्यये "अर्थविदयोरापुग्वक्तव्यः" इत्यनेन आपुगागमे ततः लोटि आत्मनेपदे मध्यमपुरुषैकवचने अर्थापयस्वेति भवितुमर्हति। आगमं विना अर्थयस्वेति कथम्? अत्र समाधीयते, नेदमर्थशब्दात् प्रातिपदिकार्थे णिचि रूपम् किन्तु अर्थ उपयाच्ञायाम् इति चौरादिकाद्धातोः णिचि रूप "मर्थयस्वेति भवति। यद्वा हेतुमण्ण्यन्तात् लोटि मध्यमपुरुषैकवचने च अर्थयस्वेति रूपम्, मम साहाय्यमितिरैः प्रार्थनां कारयेदित तात्पर्यम्, यदि तु इतरानपेक्षया स्वयमेव प्रार्थयस्वेत्याशयकत्वे तु निवृत्तप्रेषणाद्धातोः हेतुमण्णावपि प्रकृतार्थसिद्धिः, तथा च प्रयोगः -

In Public domain. Digitization Muthulakshmi Research Academy

''प्रार्थयन्ति शयनोत्थितं प्रियाः'' इति

४) ४ सर्गे ३५ श्लोके ''समचलयत्'' इति।

अत्रेयं शङ्का-चल धातोर्हेतुमण्णौ, उपधावृद्धौ ततः कर्तरि लङि अडागमे समायोगे ''समचालयदिति भवितुमर्हति, अथकथं'' समचलयदिति समाधीयते, भ्वादिगणे घटादौ 'कम्पने चलि'रिति पठ्यते, तस्य चलनार्थे 'घटादयो मितः' इति मित्वे 'मितां ह्रस्वेः ६-४-९२ इति ह्रस्वे समचलयदिति रूपम् अकम्पयदित्यर्थः, विससर्जेति तात्पर्यम्, कम्पनादन्यत्र तु न मित्वम्, 'शीलं चालयति'' अन्यथाकरोतीत्यर्थः।

५) १ सर्गे -१७ श्लोके, वेत्तुमिति रूपम् अस्य वेदितुमित्यर्थः। अत्र केचिदाचक्षीरन्। विद सत्तायां, दैवादिको धातुः अनिट् काकासु 'पद्यभिद्विद्यतिर्विनद्' इति श्यनानिर्देशात् दैवादिक एवानुदात्तः, ततः तुमुनि 'एकाच उपदेशेऽनुदात्तात् (७-२-१०) इति इटो निषेधे वेत्तुमिति रूपम्। प्रकृते विदेः ज्ञानार्थकत्वात् इटा वेदितुमितिस्यात् अत्र ज्ञानार्थकत्वात् कथं वेत्तुमिति रूपं? सत्यं, वेत्तुमिति रूपसिद्धौ सत्यज्ञानार्थकत्वं लक्षणया स्वीक्रियते।

एवं परिशीलने एतादृशनिगूढप्रक्रिया ज्ञानवतामेव नारायणदासमहाकवि-पद्येषु पदानि साधुत्वेन प्रतिभान्ति नान्येषामिति न विविच्य वक्तव्यम्। अत एव नारायणदासः कालिदासादिप्रबन्धेष्विव पदरचनामकरोत्। एतादृशव्याकरणपरिज्ञानमेव कवेः मुख्यं प्रयोजनम्।

इदं त्ववश्यमवधेयम् यत्। ''पाणौकृत्य जयार्थ''मिति चतुर्थसर्गे पद्यम्।

जयार्थम् = जयलक्ष्मीम्, पाणौकृत्य परिणीय इति लक्ष्मीनारायणशास्त्रिणो व्याख्यन्।

वोम्पराल सूर्यनारायणशास्त्रिणस्त्वेवमभिप्रयन्ति जयार्थं = जयलक्ष्मीमिति व्याख्यातुः प्रमादः, अतो मूले जयार्थिमिति पाठस्स्यात् सूर्यरायान्ध्रनिघण्टौ बुद्धिशब्दस्य समृद्धिः पार्वती, लक्ष्मीरित्यर्थत्रयं कथितम् तद्बलात्रय - ऋद्धिम् = जयर्थि =

In Public domain. Digitization Muthulakshmi Research Academy

मभिवृद्धिम्, लक्ष्मीमिति वाऽर्थो लभ्यते। अतयेव पाणौकृत्य परिणीयेति लक्ष्मीनारायण शास्त्रिणां व्याख्याऽपि सङ्गच्छत - इति।

अत्रेदं बोध्यम् - अर्थशब्दो धनवाचकः। धनञ्च लक्ष्मीरूपम्, अतो जयर्था मित्यस्य जयलक्ष्मीमित्यर्थस्सिद्ध्यतीति लक्ष्मीनारायणशास्त्रिणामाशयः तावन्मात्रेण जयलक्ष्मीमित्यर्थश्शब्दशक्त्या न लभ्यते। अतो ऋद्धिशब्दघटितः पाठस्स्वीकर्तव्यः, तेनार्थसङ्गतिरित्यभिप्रायो वेम्परालमहोदयानाम्।

वस्तुतस्तु शास्त्रिणोरुभयोरप्याशयो न सम्यक्, तथाहि - मूले ''नित्यं हस्ते पाणावुपयमने'' १-४-७७ इत्यनेन पाणावित्यस्योपयमनार्थे गतिसंज्ञायाम्, ''कुगतिप्रादयः'' इति समासे, क्त्वोल्यबादेशे पाणौकृत्येति रूपम्। उपयमनशब्दस्य विवाहार्थकत्वाश्रयणेनैष विचारः शास्त्रिभ्यामकारि। उपयमनशब्दस्य विवाहार्थकत्वमाशिश्राय वृत्तिकारः। एतदेव शास्त्रिणोर्विचारस्य मूलम्। तदा कथञ्चिदपि मूलग्रन्थो न सुश्लिष्टो भवति। उपयमनशब्दस्य स्वीकारमात्रमर्थ इति हरदत्तदीक्षितादयो निरणैषुः। तथा च प्रयोगः ''पाणौकृत्य महास्त्राणीति जयार्थमित्येव पाठः, जयाय इदं जयार्थम्। एवञ्च जयार्थम् = जयाय, सेनाम् = सैन्यम्, पाणौकृत्य = स्वीकृत्य मां रक्षन्तावित्यर्थ एव ग्रन्थकर्तुस्सम्मतः, एवमेव सिद्धान्तमाश्रित्य नारायणदास-महाकविभिः पाणौकृत्येति प्रयुक्तम्। किञ्च जयार्थमित्येव तारकग्रन्थे पाठः। पाणौकृत्येत्यस्य परिणीयेत्यर्थं स्वीकृत्य तदर्थसङ्गमनाय जयार्थिमिति पाठविपरिवर्तनम्, तत्समर्थनाय अप्रसिद्धनिघण्टुप्रदर्शनञ्च वेम्परालमहोदयानामनुचितमेव। प्रकृते उपयमनं = स्वीकारमात्रमिति पक्षमाश्रित्य प्रकृतपद्यं निरमायि महाकविनेत्यलमतिविस्तरेण।

द्वितीयसर्गे असुख्यदिति पदं प्रयुक्तं महाकविना तद्रूपसिद्धिरित्थम्। सुखदुःख तत्क्रियायामिति कण्ड्वादिगणे पाठः, ततः ''कण्ड्वादिभ्यो यगि'' त्यनेन स्वार्थे यक्प्रत्ययः सुख य इति स्थिते यक आर्धधातुकत्वा ''दतो लोपः'' इत्यकारलोपे सुख्य इति जाते सनाद्यन्ता धातवः इति विशिष्टस्य धातुत्वे ततः कर्तरि, लङि, अडागमे, तिपि इकारलोपे, शपि, पररूपे असुख्यदिति -

In Public domain. Digitization Muthulakshmi Research Academy

अत्र यकमागमम्मन्यन्ते केचन विमर्शकाः, तत्तु न सम्यक् यकः कित्वं दृष्ट्वा ते बभ्रमुः, यक आगमत्वे सुख इत्यत्र अतो लोप इत्यकारलोपानापत्तेः सनाद्यन्ता धातव'' इत्यनेन सनादिप्रत्ययान्तत्वनिबन्धनधातुत्वानापत्तेश्च।

किञ्च एते विमर्शका यङ्लुङं प्रत्ययं कञ्चन प्रत्ययं मन्यन्ते, तदपि न युक्तम्. यङ्लुक् न प्रत्ययः, किन्तु यङ् प्रत्ययः। तस्य यङोऽचिचेत्यनेन लुक्शब्देन लोपो विहितः, एनां रीतिमाश्रित्य यङ्लुगन्तप्रकरणं, यङन्त प्रक्रियेति व्यवहरन्ति, नहि तावन्मात्रेण तस्य प्रत्ययत्वं सिद्ध्यतीति दिक्।

व्याख्यानरीतिः

एतादृशस्य प्रबन्धराजस्य अनुकूला व्याख्या अपेक्ष्यते। विना व्याख्यानं तारककाव्यं न सुज्ञातं भवति, पाणिनीयलौकिकसूत्राणामुदाहरणमेतदिति प्रतिज्ञातं कविवर्यैः। अप्रतिज्ञातमपि कोशस्य बलं प्रादर्शि काव्ये। अतः व्याकृतिः कोशश्च एतत्काव्यार्थपरिज्ञाने अत्यन्तमुपकुरुतः। एवं स्थिते श्रीमद्भिः करा ईश्वररायमहोदयैः तारककाव्यव्याख्याननिर्माणाय श्रीरामभट्टलक्ष्मीनारायणशास्त्रिणः प्रेरिताः, तत्प्रेरणा-मङ्गीकृत्य शास्त्रिभिः भावार्थदीपिकेति व्याख्या व्यरचि, तेहि शास्त्रिवर्याः पालूरुग्रामे स्थापिते वेदसमाजे साहित्ये अधीतिनः। तेषां कोशबलमधिकं जागर्ति। तान् विजयनगरमहाराजसंस्कृतकलाशालायां महामहोपाध्यायतातासुब्बारायशास्त्रिणः, महामहोपाध्याय पेरि वेङ्कटेश्वरशास्त्रिणः न्यायवेदान्तसाङ्ख्ययोगादिदर्शनाचार्य गण्टि सूर्यनारायणशास्त्रिणश्च शास्त्राणि अध्यजीगपन्। एतादृशाः लक्ष्मीनारायणशास्त्रिणः व्याख्यारचने बद्धदीक्षा आसन् तेहि-

''इहान्वयमुखेनैव सर्वं व्याख्यायते मया
नामूलं लिख्यते किञ्चित् नानपेक्षितमुच्यते।''

मल्लिनाथप्रतिज्ञामनुरुन्धानाः काव्यं व्याकुर्वन्। तत्र काव्यार्थपरिज्ञानस्य यावती व्याकृतिरपेक्ष्यते सान्यक्षेपि। अधिकव्याकृतिप्रदर्शनन्तु तत्र नोपयुज्यते इति मनीषया विस्तरेण पदशास्त्रं न प्रदर्शितम्।

In Public domain. Digitization Muthulakshmi Research Academy

"अभ्राजि ताभ्यां धरणी चिराय" - 'तत्रत्यिका' चलदुच्चूडचूडवान्, अनुवत्, तिष्ठद्गु, अच्छगत्य, इत्यादीनां विशिष्टशब्दानां विषये व्याकरणप्रक्रिया विस्तरेण निरूपिता। किञ्च कोशबलं विना प्रकृतकाव्यं नाधिगन्तुं शक्यत इति समनन्तरमेवोक्तम्।

१) निष्कुटान्ते	२) दिवाकीर्ति	३) उरस्यन्तः
४) वावदूकाः	५) निषद्यापि	६) प्रतोलीषु
७) सिंहसंहननौ	८) हैयङ्गवीनः	९) निष्ठानम्
१०) कूर्चिका	११) मस्तु	१२) विशेषक
१३) भ्रमरक	१४) आप्रपदीन	१५) देवच्छन्द
१६) अनुपदीन	१७) नाके	१८) कोलाञ्चक्रतुः
१९) कूपकेन	२०) गुणवृक्षकम्	२१) आनाय
२२) कुवेणी	२३) वितर्दि	२४) वप्रः
२५) केदारः	२६) आवदातः	२७) आज्ञायाः
२८) काण्ड	२९) यथाजातः	३०) तीरसः
३१) शिश्विदानं	३२) तद्वदः	३३) पादातं
३४) वार्तम्		

इत्यादीनि कोशमात्रप्रसिद्धानि पदानि कविना प्रायोजिषत। नामलिङ्गानुशासनादि-कोशपरिज्ञानाभावे एतानि पदानि संस्कृतानि भाषान्तराणि वेति व्यामुह्येरन् पाठकाः ताद्दशप्रमादो माभूदिति लक्ष्मीनारायणशास्त्रिवर्याः सर्वान् कोशानेकमुखीकृत्य प्रथमतः पदस्य अर्थं प्रदर्श्य, तस्य प्रमाणतया कोशं लिलिखुः। तेन महानुपकारः संवृत्तः, कोशप्रदर्शनं रामभट्टानामेव सुशकमासीत्। नान्येषामित्यत्र न कापि संशीतिः। तेहि निरुक्तरीत्या व्याख्यानस्य ये ये अंशा अपेक्षितास्तान् सर्वानपि प्रदर्शयामासुः। प्रथमतस्समन्वय, अनन्तरम्भावं विलिख्य देशभाषावशंवदास्सन्तः सर्वेषामपि पद्यानां स्वदेशभाषायमपि तात्पर्यं प्रोल्लिखन्।

एवं मूलग्रन्थस्य व्याख्याग्रन्थस्य च सुकृतिनोः स्त्रीपुंसयोरिव महदानुकूल्यं सञ्जातम् इति आन्ध्रप्रदेशस्थास्सर्वेऽपि ग्रन्थकर्त्रोः अधमर्णा एव आसन्निति दृढमहं

In Public domain. Digitization Muthulakshmi Research Academy

विश्वसिमि, एतद्ग्रन्थप्रचाराय श्रीमन्तः धनवन्तो महान्तः उदारचरिताः करा ईश्वररायमहोदयाः बद्धदीक्षा भवन्तीति महदिदं प्रमोदस्थानम्। लोकानामेतादृश-महोपकारकारणाय ईश्वररायमहोदयानामायुरारोग्यैश्वर्यभोगभाग्यादिजातं श्रियःपतिः प्रसादयेदित्वाशीराशासे।

In Public domain. Digitization Muthulakshmi Research Academy

An Outline of *Taraka*

To the south of the Vindhya mountains flew a river by name *Chanchannadi*. On its shore was a beautiful village called *Samshritakalpa*. And there lived a pious man by name *Maheshwara*. His scholarly wife with her sharp intellect was a match to him in every aspect. The ideal couple's youngest son was an incarnation of god. Having known the purpose of this incarnation, the gods from heaven came down to praise his glory even as he was still in the mother's womb. The boy was rightly named '*Taraka*', the saviour. God keeps his word '*Yada yada hi dharmasya.*'

Taraka was a born genius and hence took no time to excel at everything that he laid his hands on. One fine day he visited his neighbouring city called Vidarbha. The old people living there, gave a wonderful picture of the city to *Taraka*, the account which he found quickly to be false. The keen eyed super human *Taraka* sensed that the place no longer had the glory that it once used to have. The city now was engulfed by sin and immorality.

One evening as he was taking a stroll in the king's garden, contemplating on the lost lustre of the place, started singing earnestly of the city's downfall. The meaningful and touching lyrics caught hold of the prince there. The prince on meeting *Taraka* was immensely impressed by his charm and demeanour. He escorted him to the king and introduced his new friend. The king was taken by awe at *Taraka's* celestial beauty, his mellifluous voice and the flow of his lyrics. He was glad to extend an invitation to him to stay along with his son, the prince as his companion.

In Public domain. Digitization Muthulakshmi Research Academy

The two became soul mates soon and together learnt several languages of different countries and their cultures. Under the able guidance of gurus, mastered all branches of study. And having graduated in many arts and studies, with a desire for an independent life, sought the king's permission to go overseas. Thus they got onto a steam boat on a mission to meet the monarch there and to tell him of their concerns. Looking at the beauty as well as the roughness of the sea, the two reached *Chandradweepa* and went to *Chandramati*, the capital city that was on the shores of the river Chandrakantha. The two young men impressed the citizens there with their super human qualities and achievements and thus made an easy way to the monarch. The sagacious monarch immediately appointed them as heads of his army.

The opportunity to showcase their talent was just right now when the monarch's brother was held captive by the enemy. The two men of valour set off and made an incursion into the enemy's territory and extirpated them. The victorious duo along with the monarch's brother was welcomed by cheering crowds back in *Chandradweepa*. The elated monarch appointed *Taraka* as the judicial head of his empire and the prince as the king of Bharata and gave his daughter's hand in marriage to him.

The monarch's brother escorted the newlyweds and *Taraka* back to *Vibudhanagara* and there the prince was coronated as the king of Bharata in a splendid ceremony. *Taraka* was married to a suitable girl. Both the friends were committed to work for the welfare and the prosperity of the country and under their governances *Bharata* had turned to be fertile both spiritually and economically.

In Public domain. Digitization Muthulakshmi Research Academy

तारके प्रथमस्सर्गः

भूते लुङधिकारः

उपजातिः

१. सा देवभाषाऽखिललोकमान्या प्रसाधयाम्यद्य तया मदूहाम्
हर्षाय लोकस्य परिष्करोमि तनुं जनोऽनुत्तमभूषयैव ।

व्याख्यानम् :- सा देवभाषेति- सा लोकप्रसिद्धा, देवभाषा संस्कृतभाषा, अखिललोकमान्या सर्वजनसम्पूज्या। लोकशब्दस्य जन इत्यप्यर्थः। ''लोकस्तु भुवने जने'' इत्यमरः। तया प्रसिद्धया गैर्वाण्या वाण्या, मदूहां मम भावनां, प्रसाधयामि अलङ्करोमि। इदानीं संस्कृतभाषया काव्यं करोमीति भावः। जनः मानवः, तनुं स्वदेहं, लोकस्य जनस्तोमस्य, हर्षाय आनन्दाय, न विद्यते उत्तमा यस्यास्सा अनुत्तमा, सर्वोत्कृष्टेत्यर्थः तया भूषया भूषणेन, परिष्करोमि अलङ्करोमि।

लोके मानवः श्रेष्ठान्येवाभरणानि धृत्वा स्वयं सन्तुष्य परानानन्दयति, एवमेवाऽहमप्यद्य गैर्वाण्या वाण्या काव्यं विरच्य लोकानानन्दपरवशान्करोमीति भावः।

दृष्टान्तालङ्कारः

वृत्तमुपजातिः। सर्गेऽस्मिन्सर्वाण्यप्युपजातिवृत्तान्येव सर्गान्ते तु मालिनी वृत्तमुपनिबद्धम्। वृत्तलक्षणम्।

''स्यादिन्द्रवज्रा यदि तौ जगौ गः
उपेन्द्रवज्रा जतजास्ततो गौ,
अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः'' इति।

त-त-ज-गणैः गुरुद्वयेन च इन्द्रवज्रा भवति।

 In Public domain. Digitization Muthulakshmi Research Academy

पादे यतिः, ज-त-ज-गणैः गुरुद्वयेन च
उपेन्द्रवज्रा भवति। पादे यतिः। एतयोरव्यवहितकथने उपजातिर्भवति।

తాత్పర్యము ॥ సంస్కృతభాష సుప్రసిద్ధమైనది. అది దేవభాష. సర్వజన సంపూజిత. కావున ఆ సంస్కృతభాష చేతనే నా భావము నలంకరింతును. ప్రతి మానవుడును లోకోత్తరములగు ఆభరణములను ధరించి ఇతరులను సంతోష పరచునుగదా! లోకానందము కొరకే ఈ తారకమను కావ్యమును వ్రాయుచుంటినని కవియాశయము.

Sanskrit, known as *devabhasha*, the language of gods, is quite popular and is esteemed and treasured by one and all. Hence I choose to render my work in this very language. As it is a feast for the eyes to look at someone decked in their best attire and ornaments, this present work of mine, 'Taraka' too will make the world rejoice in a similar way.

२. स्वभावपाण्डित्यबलेन कुर्वे काव्यं पतत्री सहसेव नीडम् ।
सदोषमप्युत्तपते कवित्वं यथा कलङ्काङ्कितमिन्दुबिम्बम् ॥

व्या :- स्वभावेति :- अहमित्यध्याहारः अहं, स्वभावेन निसर्गेण सिद्धं यत्पाण्डित्यं प्रज्ञापाटवं तस्य बलेन शक्त्या, सहजपाण्डित्यप्रतिभयेति भावः। काव्यं तारकाख्यं ग्रन्थं, पतत्री विहगः, सहसा स्वशक्त्या, नीडमिव कुलायमिव, कुर्वे करोमि काव्यं ग्रन्थः, सदोषमपि काव्यदोषैरुपेतमपि, कलङ्काङ्कितम् अङ्कसहितम् इन्दुबिम्बं यथा चन्द्रमण्डलमिव। उत्तपते उज्ज्वलशोभां करोति, उद्द्योतते।

यथा पक्षी स्वशक्तिमनुसृत्य कुलायं निर्माति तथा अहमपि सहजपाण्डित्य प्रतिभया काव्यं रचयामि। पतत्रिणो न कोऽप्युपदेष्टाऽस्ति। किन्तु स्वबुद्ध्यैव नीडं निर्माति। अहमपि पक्षीव सहजपाण्डित्यधुरीण इति स्वातिशयं प्रकटयति महाकविः। उपमालङ्कारः।

कलङ्कदोषदूषितमपि चन्द्रमण्डलं यथा पूर्णिमायामुज्ज्वलतया प्रकाशते तथा काव्यं दोषजुष्टमपि सुष्ठु विराजत एव। मदीये काव्ये दोषा न सन्त्येव। यदि

In Public domain. Digitization Muthulakshmi Research Academy

प्रमादवशेन दोषः कश्चिदापतेच्चेत्तेन मत्काव्यस्य न काचिदपि हानिरिति कवेराशयः। उपमानगर्भितेन दृष्टान्तेन पूर्वार्थं समर्थयामास।

తా॥ పక్షి సహజమైన తన బుద్ధిశక్తి నాధారముగ జేసికొని గూడును నిర్మించును. గూడుకట్టువిధానమును దానికి జెప్పువారెవ్వరునులేరు. అట్లే నేనుగూడ నాప్రతిభ నాధారముగ నీ కావ్యమును రచించుచున్నాను. దోషములులేని కావ్యమెల్లప్పుడును రాణించును. దానిలో సందేహములేదు. ఒకానొకవేళ దోషములున్నను కావ్యము రాణించును. మచ్చతోనున్నను బున్నమచంద్రుడు రాణింపలేదా?

A bird builds its nest based on its instinctive intelligence. No one imparts it the skills neither required nor give any guidelines. I too pen this work based sheerly on my talent. A perfect piece of writing without any blemishes is sure to become famous. However, just a mistake or two by accident are outweighed by the innumerable merits the profound work has. The moon though with a scar looks fabulous on the full moon day.

३. स देवताधीनमनःप्रवृत्तिः स्वातन्त्र्यसङ्कल्पितचारुकाव्यः ।
दयार्द्रचित्तोऽञ्चितसत्यवाक्यः कलाचणस्सत्कविरेव नान्यः ॥

व्या :- स इति :- कवेर्लक्षणमादौ निरूपयति अत्र तच्छब्दो यच्छब्दमपेक्षते। यत्तदोर्नित्यसम्बन्धात्। यः मनुजः, देवतादीनां सरस्वत्यादीनाम्, अधीना आयत्ता, मनसः प्रवृत्तिः मनोव्यापारः यस्य सः, स्वातन्त्र्येण स्वेच्छया, सङ्कल्पितमभ्यूहितं, चारु मनोहरं, काव्यं ग्रन्थः यस्य सः, दयया करुणया, आर्द्रं स्विन्नं चित्तं मनः यस्य सः, अञ्चितम् अलङ्कृतं, सत्यवाक्यं सत्यवचनं यस्य सः, कलाभिः विद्याभिः चतुष्षष्टिकलाभिर्वा, वित्तः समर्थः कलाचणः, ''तेन वित्तश्चुञ्चुप्चणपौ'' इति पाणिनिः, स एव सत्कविः, स एवोत्तमकविः, अन्यः पूर्वोक्तलक्षणविहीनः, न, सत्कविर्नभवति।

In Public domain. Digitization Muthulakshmi Research Academy

आराधितदेवतामूर्तिः स्वतन्त्रप्रतिभासमन्वितः दयालुः सत्यवचनः सकलविद्याविशारदः मानव एव सत्कविर्भवितुमर्हति। नान्य इति कवेराशयः। एतेन सत्कविलक्षणं सर्वमपि स्वस्मिन्नस्तीति सूचितम्।

తా॥ ఎవ్వడు నిత్యము దేవతల నారాధించునో, యెవ్వడు స్వతంత్రముగ నూహింప శక్తిగలిగియుండునో, యెవ్వడు కరుణార్ద్రహృదయుడో, యెవడు నిత్యసత్యవచనుడో, యెవ్వడు సకలకలా పరిపూర్ణుడో, వాడే సత్కవియగును. ఏతల్లక్షణ విరహితుడేనాడును సత్కవి కానేరడు. దీనినిబట్టి ఈ లక్షణములన్నియు దనయందున్నట్లు సూచింపబడెను.

Someone who is a staunch believer of god and who worships him every day, who is creative, who is kind hearted, who is veracious, who is versatile at various art forms, only he can become a great poet. If one lacks these traits he can never be a good poet. (This implies the writer has all these traits in him)

४. विन्ध्यप्रदेशे क्वचिदस्ति चञ्चन्नदीतटे संश्रितकल्पनामा ।
ग्रामः पुरा तत्र महेश्वराख्यस्तपोधनो ब्राह्मणराडवात्सीत् ॥

व्या :- विन्ध्यप्रदेश इति :- पुरा पूर्वकाले, विन्ध्यस्य विन्ध्यनाम्नः पर्वतस्य प्रदेशे स्थले, विन्ध्यपर्वतप्रान्तदेश इत्यर्थः, चञ्चन्नाम्नी नदी काचन सरित्, तस्याः तटे तीरे, क्वचित् कुत्रचिद्भागे, संश्रितानाम् आश्रितानां जनानां कल्पतरुरिति ग्रामः संवसथः अस्ति, तत्र तस्मिन् ग्रामे, तप एव धनं वित्तं यस्य सः तपस्वी, महेश्वर इति आख्या नामधेयं यस्य सः, ''आख्याह्वे अभिधानञ्च नामधेयञ्च नाम च'' इत्यमरः। ब्राह्मणानां राट् राजा, ब्राह्मणप्रभुरित्यर्थः, अवात्सीत् उवास। वस निवासे इति धातोर्लुङ्।

पुरा विन्ध्यपर्वतप्रदेशे चञ्चन्नदीतीरे संश्रितकल्प इति नाम्ना प्रसिद्धः कश्चिद्ग्राम आसीत्। तत्र तपोधनो महेश्वराख्यः ब्राह्मणप्रभुरुवास।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ వింధ్యపర్వత ప్రాంతమున జంచన్నది యనుపేర నొక నది కలదు. దానియొడ్డున నొకచోట సంశ్రితకల్పమను పేరుగల గ్రామమున్నది. అందు తపోధనుడైన మహేశ్వరుడను బ్రాహ్మణ ప్రభువు నివసించుచుండెను.

Close to the Vindhya mountain flowed a river by name *Chanchannadi*. A Brahmin ascetic by name *Maheswara* lived there.

५. यथार्थवाक्सन्नुतदिव्यतेजा नक्तं दिवं पूजितदेवदेवः ।
पौराणिकः पूतयशा वदान्यस्स देवभाषानिपुणः कवीन्द्रः ॥

व्या :- यथार्थेति :- सः महेश्वरः, यथार्थवाक् यथातथवचनः। सत्यवादीत्यर्थः। सन्नुतं सद्भिः स्तुतं दिव्यमुत्तमं तेजः महिमा यस्य सः, सज्जनस्तुतमहिमेत्यर्थः। नक्तञ्च दिवाच नक्तंदिवं अहर्निशं, ''अचतुरविचतुरेत्यादिना अच्प्रत्ययान्तो निपातः, पूजितः आराधितः देवदेवो महादेवो येन सः, सन्ततशिवाराधनतत्पर इत्यर्थः।''आख्यानाख्यायिकेतिहासपुराणेभ्यश्च'' इति ठक् प्रत्ययः। पूतं पवित्रं यशः कीर्तिः यस्य सः, पुण्यश्लोक इत्यर्थः वदान्यः दाता, वितरणशील इत्यर्थः। देवभाषायाम् अमरभारत्यां, निपुणः कुशलः, कवीन्द्रः कविश्रेष्ठः अभूत्।

తా॥ ఆ మహేశ్వర పండితుడు నిత్యసత్యవచనుడు సజ్జనసంస్తుత మహిమోపేతుడు. సంతతశివారాధనతత్పరుడు, చక్కగబురాణముల నెఱింగి ప్రవచించు శక్తికలవాడు. మంచిదాత, పుణ్యకీర్తి సంస్కృత భాషలో నిష్ణాతుడు, కవులలో శ్రేష్ఠుడు.

The great scholar was a man of word of honor and was praised by all the virtuous people. He was ever engrossed in worshipping lord Shiva. He was a great orator of puranas, a philanthropist, a scholar in Sanskrit language and a great poet too.

६. मुदा यथाशक्त्यतिथीनतर्पीत् सदाऽत्मशिष्यानशिषत्स्वधर्मम् ।
न्यवीवृतद्रागपथाद्विमूढान् स पण्डितस्साधुजनानभाक्षीत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- मुदेति :- सः पण्डितः सुधीर्महेश्वरः यथाशक्ति शक्तिमनतिक्रम्य। मुदा प्रीत्या, अतिथीनागन्तून् अतर्पीत् अन्नदानादिना तृप्तानकार्षीत्। ''तृप प्रीणने'' इति धातोर्लुङ्, प्रीणनं तृप्तिः तर्पणा च, सदा सन्ततम् आत्मशिष्यान् स्वच्छात्रान्, स्वधर्मम् आत्मधर्मम् अशिषत् उपदिदेश शासु अनुशिष्टौ इति धातोर्लुङ् ''सर्तिशास्तीत्यङ्'', ''शास इदङ् हलो''रितीत्वम्, ''शासिवसी''ति षत्वञ्च, विमूढान् मोहात्मकान्, अज्ञानावृतचित्तानित्यर्थः रागपथात् रागद्वेषादिदुष्टप्रवृत्तिमार्गात् न्यवीवृतत्, निवर्तयामास, निपूर्वक वृतुवर्तने इति धातोर्णिचि लुङ्। साधुजनान् सत्पुरुषान् अभाक्षीत् अभजत, असेवतेत्यर्थः, भज सेवायामिति धातोर्लुङ्।

తా॥ ఆ మహేశ్వర పండితుడు తన శక్తికొలది అతిథుల నాదరించి సంతృప్తులం గావించుచుండెను. తన శిష్యుల కాత్మధర్మముల నుపదేశించుచుండెను, మూఢులను రాగద్వేషాది దుష్ప్రవృత్తులనుండి మరలించుచుండెను, సజ్జనుల నభిమానించి సేవించుచుండెను.

Maheswara was a great host. He taught the duties to be performed in consonance with the nature of *atma* (*atmadharma*) to his disciples, would counsel people to wean themselves away from the six afflictions namely attachment, aversion etc. *Kama, Krodha, Lobha, Moha, Mada and Matsarya.* He loved and treated the virtuous, good people with due respect.

७. बाल्यं गुरोरध्ययनेन तस्य स्वभार्यया यौवनमिद्धकीर्तेः ।
अनायि सद्ब्राह्मणशेखरस्य वृद्धत्वमन्तं तपसा समस्तम् ॥

व्या :- बाल्यमिति :- इद्धा प्रकाशमाना कीर्तिः यशः यस्य तस्य, प्रसिद्ध यशस इत्यर्थः। सद्ब्राह्मण शेखरस्य ब्राह्मणोत्तमशिरोमणेः तस्य, महेश्वरस्य, समस्तं बाल्यं वयः सर्वं बाल्यरूपं वयः, गुरोः आचार्यस्य सकाशात् अध्ययनेन विद्याभ्यासेन, समस्तं यौवनं वयः। सर्वं तारुण्यरूपं वयः, स्वभार्यया स्वकलत्रेण, समस्तं वृद्धत्वं वयः, सर्वं, वार्धकरूपं वयः, तपसा तपोऽनुष्ठानेन, अन्तमनायि अन्तमनीयत, णीञ् प्रापणे इति धातोः कर्मणि लुङ्।

In Public domain. Digitization Muthulakshmi Research Academy

स महेश्वरपण्डितः विद्याभ्यसनेन सर्वं बाल्यं, स्वभार्यासुखानुभवेन सर्वं यौवनं, तपोऽनुष्ठानेन सर्वं वार्धकं वयश्च अन्तमनैषीत्।

తా॥ ఆ మహేశ్వర పండితుడు, గురువులకడ విద్యాభ్యాసము చేతనే బాల్యమును గడపెను. తన భార్యవలన సుఖముల ననుభవించుచు యౌవనమునంతను దాటించెను. తపమును గావించుకొనుచు ముసలితనమును వెళ్ళించెను. తన వయస్సునంత నతడీ తీరున గడపెను.

His was a well spent childhood in learning academics and youth in having a pleasurable time with his wife. And rightly he spent his days as a *vanaprastha,* doing penance in his old age.

८. तं तस्य पत्नी सुदती प्रशान्ता महाकुलीना कमनीयनेत्रा ।
सम्पूर्णजैवातृकबिम्बवक्त्रा शतह्रदा मेघमिवान्वसार्षीत् ॥

व्या :- तमिति :- शोभनाः दन्ताः यस्यास्सा सुदती, तरुणीत्यर्थः ''वयसि दन्तस्य दतृ'' इत्यनेन बहुव्रीहौ दन्तशब्दस्य दत्रादेशः, प्रशान्ता शान्तस्वभावा, महाकुलीना उत्तमवंशसञ्जाता, कमनीयनेत्रा सुन्दरनयना, सम्पूर्णं यत् जैवातृकस्य चन्द्रस्य बिम्बं मण्डलं तद्वत् वक्त्रं मुखं यस्सास्सा। ''अब्जो जैवातृकस्सोम'' इत्यमरः। तस्य महेश्वरस्य पत्नी भार्या, शतह्रदा विद्युत्, ''शम्पाशतह्रदा ह्रादिनी''त्यमरः मेघमिव अम्बुदमिव, तं पतिं महेश्वरम् अन्वसार्षीत् अनुससार। अनुपूर्वकस्य सृ गताविति धातोर्लुङ्। उपमालङ्कारः।

यथा विद्युदम्बुदमनुसरति तथा सा सुदती स्वभर्तारमनुससारेति भावः।

తా॥ ఆ మహేశ్వర పండితుని భార్య మిక్కిలి చక్కనిది. చక్కని పలువరుసగల యువతి. శాంతస్వభావ. సత్కులమున జన్మించినది. అందమైన కన్నులతో పున్నమచందురుని వంటి మోముతో నొప్పుచు నామె మేఘముననుసరించి మెరుపుతీగయున్నట్లు, నిత్యము తన పతిని అనుసరించియే నుండును.

In Public domain. Digitization Muthulakshmi Research Academy

Maheswara's wife was a dazzling beauty. With sparkling teeth line and lotus eyes she was as beautiful as the full moon. She was a devoted wife, who would always be dotingly associated with her husband as lightening with a cloud.

९. भर्त्रा यथा सा कथितं पुराणं श्रुत्वाऽशकन्मङ्क्षु तथैव वक्तुम् ।
प्रशस्तबुद्धिस्तपनीयगात्रा प्रियंवदा सज्जनकीर्तनीया ।।

व्या :- भर्त्रेति :- प्रशस्ता श्लाघ्या बुद्धिः मतिः यस्यास्सा, सूक्ष्मबुद्धिरित्यर्थः तपनीयं काञ्चनमिव गात्रं शरीरं यस्यास्सा, कनकाङ्गीत्यर्थः, ''तपनीयं जातरूपं गाङ्गेयं भर्मकर्बुर'' मित्यमरः, प्रियंवदतीति प्रियंवदा मधुरभाषिणी, सज्जनैः सत्पुरुषैः कीर्तनीया, स्तवनीया, सा महेश्वरपत्नी, भर्त्रा स्वपतिना यथा यद्वत्, कथितम् उक्तं, पुराणं श्रुत्वा तथैव, मङ्क्षु द्राक्, वक्तुं कथितुम्, अशकत् समर्था अभवत्, शक मर्षण इति धातोः पुषादित्वात्, 'पुषादिद्युतादी'त्यादिना अङ्। अथवा शक्लृ शक्तौ इत्यस्माद्गणपठितात् लुङ्, लृदित्वादङ्।

सा महेश्वरपत्नी स्वभर्तृकथितं पुराणं श्रुत्वा, यथा भर्ता अकथयत् तथैव पुनः शीघ्रं वक्तुं समर्था बभूव एतेनास्यास्सूक्ष्मबुद्धित्वं सूच्यते।

తా॥ ఆ మహేశ్వర పండితుని భార్య మంచి బుద్ధిమంతురాలు. బంగారువంటి దేహచ్ఛాయగలది. ప్రియంవద, సత్పురుషులామె యోగ్యతను గొనియాడుచుందురు. ఆమె తన భర్త చెప్పు పురాణ ప్రవచనమును విని యట్లే మరల నా పురాణమును అతివేగముగ చెప్పుచుండును. ఆమె సూక్ష్మగ్రాహిణి.

With a gold tone complexion and nectar like speech, she was praised for her modesty by men of good deeds. She could brilliantly deliver discourses exactly the same way as her husband did, just after listening to him once.

१०. तौ दम्पती निर्मलशीलयुक्तौ प्रवृद्धसन्तानयशोविशालौ ।
सुखेषु दुःखेषु समानचित्तावभ्राजि ताभ्यां धरणी चिराय ।।

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- ताविति :- तौ दम्पती जायापती, निर्मलेन रागद्वेषादिमलशून्येन शीलेन स्वभावेन, युक्तौ सहितौ, प्रवृद्धाभ्यां सन्तानयशोभ्याम् अपत्यकीर्तिभ्यां विशालौ परिपूर्णौ, सुखेषु दुःखेषु सुखदुःखाद्यवस्थासु समानं तुल्यं चित्तं स्वान्तं ययोस्तौ। तुल्यशीलावित्यर्थः आस्ताम्। ताभ्यां तादृशदम्पतीभ्यां, धरणी धरित्री, चिराय चिरंकालं, ''चिराय, चिररात्राय चिरस्यार्थाश्चिरार्थकाः'' इत्यमरः अभ्राजि प्रकाशिता बभूव, तौ चिरं तस्थतुरिति भावः।

తా॥ ఆ భార్యాభర్తలిరువురును నిర్మలచిత్తులు. వారి సంతానమును వారి కీర్తియును దినదినాభివృద్ధినందుచుండెను. వారిరువురును సుఖదుఃఖాద్యవస్థలందు ఏకచిత్తులై మెలగుచుండిరి. వారిచే చిరకాలము భూమి యలంకరింపబడెను. చిరకాలము భూమండలమునకు అలంకారముగ వారు జీవించిరని భావము.

As their children were blooming into adulthood, the couple's fame too went on flourishing parallelly. The two took both happiness and sadness in their stride in solidarity and lived long as the mother earth rejoiced their presence.

११. पुण्यात्मनोस्सद्गृहिणोस्तयोरुदभूत्कनिष्ठः परदेवतांशः ।
पुत्रेषु तं बालकवेषयुक्तं मुदा दिवौको निवहोऽववर्णत् ॥

व्या :- पुण्यात्मनोरिति :- पुण्यः पवित्रः आत्मा मनः ययोस्तयोः, सद्गृहिणोः सत्कुटुम्बिनोः तयोर्दम्पत्योः, पुत्रेषु सूनुषु, कनिष्ठः अन्तिमः पुत्रः, परदेवतायाः परमात्मनः, अंशः भागस्सन्, उदभूत् समजनि। बालकवेषयुक्तं शिशुत्वमापन्नं, तं महेश्वरकुमारं द्यौः स्वर्गः ओकः निवासस्थानं येषां ते दिवौकसः, देवाः, तेषां निवहः समूहः। मुदा प्रीत्या अववर्णत् वर्णयामास, वर्ण वर्णक्रिया विस्तारगुणवचनेष्विति धातोश्चुरादिण्यन्ताल्लुङ्।

తా॥ పుణ్యాత్ములు నాదర్శ గృహస్థులు అగు ఆ దంపతుల పుత్రులలో చివరివాడు పరదేవతాంశచే జన్మించెను. బాలక రూపముతోనున్న యా భగవంతుని గాంచి, దేవగణము పరమానందభరితమై స్తుతింపనారంభించెను.

 In Public domain. Digitization Muthulakshmi Research Academy

The youngest son of this couple was a descendant of the Supreme Being. All the *devaganas* praised the boy, who was an incarnation of god, in ecstasy thus-

१२. प्रभो महादेव दयामयेश त्वं लीलयेत्थं जगतीं तनित्वा ।
श्रुत्वा भणित्वाऽखिलभूतकर्म स्वमायया क्रीडसि निर्गुणोऽपि ॥

व्या :- प्रभो इति :- प्रभवतीति प्रभुः तत्सम्बुद्धौ हे प्रभो सर्वसमर्थ ! महादेव देवतावरिष्ठ ! दयामय दयास्वरूप ! ईश परमेश्वर ! त्वं भवान्, निर्गुणोऽपि सत्त्वादिगुणरहितोऽपि, लीलया विलासरूपया, स्वमायया भवन्मायाशक्त्या, इत्थम् एवं, जगतीं भूमिं तनित्वा विस्तृतां कृत्वा, श्रुत्या वेदादिविद्यया, अखिलभूतकर्म सर्वप्राणिसाधारणं कर्मविशेषं भणित्वा उक्त्वा क्रीडसि खेलसि।

తా॥ ఓ దేవదేవ ! దయామయ ! పరమేశ్వర ! నీవు సత్త్వము రజస్సు తమస్సు అనెడు గుణములు లేనివాడవు. అయినను, విలాసార్థమై నీ మాయచే ఈ లోకమును విస్తరింపజేసి, వేదాది విద్యలచే సకల ప్రాణులకు ఉచితములగు కర్మవిశేషములను బోధించి, ఆడుకొనుచున్నావు.

"Oh Lord of Lords! Oh merciful one! Oh *Parameswara!* You are beyond the *sattwa, rajas* and *tamogunas*. Yet you create this universe sportively. However, to tear out the veil of *maya,* you teach the people the Vedas and the proper duties and watch them evolve nonchalantly.

१३. भेदो यथा काण्डतरङ्गयोर्न स्यात्तेऽस्य लोकस्य तथैव देव ।
सर्वः प्रपञ्चस्त्वयि कल्पितो वा स्थाणौ भवेद्दस्युरिव भ्रमेण ॥

व्या :- भेद इति :- दीव्यतीति देवः तत्सम्बुद्धौ हे देव ! परमेश्वर ! यथा यद्वत्, काण्डतरङ्गयोः जलस्य तरङ्गस्य च "काण्डोऽस्त्री दण्डबाणार्ववर्गावसर वारिषु" इति नानार्थरत्नमाला। भेदः नानात्वम् न स्यात् न भवेत्, तथैव तद्वदेव, ते भवतः, अस्य लोकस्य अस्य जगतः, भेदः न भवेत् न स्यात्। वा अथवा, त्वयि

In Public domain. Digitization Muthulakshmi Research Academy

भवति, सर्वः प्रपञ्चः। सकललोकः स्थाणौ मार्गमध्यस्थिते उन्नतपाषाणस्तम्भे उन्नतदारुस्तम्भे वा, दस्युरिव चोर इव, भ्रमेण भ्रान्त्या, कल्पितः अध्यस्तः भवेत्।

यथा जलतरङ्गयोर्भेदो नास्ति तथा तव च विश्वस्य च भेदो नास्त्येव। अनेन क्षीरतक्रवत् परिणामवादः मृद्घटवत्कार्यकारणवादो वा सूचितः। अथवा, स्थाणौ चोरवत् अयं प्रपञ्चः त्वयि कल्पितोऽभूत्। अनेन रज्जुसर्पवद्विवर्तवादः सूचितः।

उपादानसमसत्ताककार्यापत्तिः परिणामः, उपादानविषमसत्ताककार्यापत्तिर्विवर्त इति तयोर्भेदः।

తా॥ ఓ పరమేశ్వరా ! నీటికిని దానినుండి ఏర్పడిన కెరటమునకును భేదమెట్లు లేదో, నీకును నీ నుండివచ్చిన జగత్తునకు నట్లే భేదము లేదు. జలమే తరంగము, తరంగమే జలమయినట్లు, నీవే విశ్వము. విశ్వమే నీవు. మీ యిరువురకును భేదము లేదు. లేదా, బాటసారి రాత్రింజీకటిలో ప్రయాణము గావించుచు, త్రోవలో నొకచోట నిలువగ దిన్నగనున్న పెద్ద ఱాతికంబమును, లేక, కఱ్ఱకంబమునుగాంచి భ్రాంతిచే దొంగయనుకొని భయపడినట్లు, ఈ విశ్వమంతయు నజ్ఞానముచే నీయందు కల్పింపబడియుండును. జలమే కెరటమయినట్లు, మన్ను కడవగా మారినట్లు, ఆత్మయే విశ్వముగా మారినదని యొక వాదము. రజ్జువునందు సర్పమువలె, శుక్తికయందు రజతమువలె, స్థాణువునందు పురుషునివలె, ఆత్మయందు ఈ విశ్వమంతయు నధ్యస్తమయినదని మరియొక వాదము. ఈ రెండువాదములు ఇందు నిరూపితములు.

Oh Lord! A ripple forms when the water flows, and a wave or a ripple is nothing but water. Similarly the universe that is created by you is nothing other than you. You are the creation and the creation is you. In darkness a traveler gets scared when he encounters with a stone or a pillar, mistaking it to be a thief. He sees the actual thing only when there is light. Similarly this universe is your creation enveloped by *maya*. Water becomes the tide, soil takes the form of a pot and in the same way all these things in the universe are nothing but the manifestations of *atma*. One way of perception is that *atma* is manifested itself as the universe.

 In Public domain. Digitization Muthulakshmi Research Academy

The other way of perception is- a rope is mistaken to be a snake, a log to be a human being, an oyster to be a pearl.

१४. धरा मनुष्यैः परमार्थदूरैः क्रौर्यान्वितैस्तुच्छसुखाभिलाषैः ।
निपीडिता सम्प्रति नास्तिकैरित्यजोऽपि तां त्रातुमिहाजनिष्ठाः ।।

व्या- धरेति- परमश्चासावर्थश्च परमार्थः, मोक्ष इत्यर्थः। चतुर्विधपुरुषार्थेषु धर्मार्थकाममोक्षेषु मोक्षस्य परमत्वात्, तस्माद्दूरैः तद्विमुखैः, क्रौर्यान्वितैः हिंसात्मक स्वभावैः तुच्छं स्वल्पं नीचं वा यत् सुखं तस्मिन् अभिलाषः स्पृहा येषां तैः, कामुकैरित्यर्थः, नास्ति धर्मो देवो वा इति वादिभिः नास्तिकैः मनुष्यैः मानवैः धरा भूमिः, भूलोक इति यावत्। निपीडिता क्लिश्यते इति निश्चित्य सम्प्रति अधुना, तां धरां भूमिं, त्रातुं रक्षितुम्, इह अस्मिन् लोके। अजोऽपि जननरहितोऽपि, त्वम् अजनिष्ठाः जातोऽसि। जनी प्रादुर्भावे इति धातोर्लुङ्।

తా॥ మానవులందరును మోక్షమునకు దూరులైరి. హింసాత్మక కృత్యముల నాచరించుచుండిరి. మరియు నాస్తికులుగా మారిరి. అట్టి మానవాళిచే నేడు భూలోకమంతయు పీడింపబడుచున్నది అని భావించి దానినుద్ధరించుటకై జననాదులు లేనివాడవయ్యును నీవు జన్మించితివి. భూమిని ఉద్ధరించుటకై అవతరించిన భగవంతుడవే నీవు.

Humans have come a long way on their detour from the ultimate destination *moksha*. They have become savage and violent. They are no longer god fearing or god believers. In this ruination you are born to redeem the world, you are the savior.

१५. दृश्याऽप्यदृश्या सदसत्स्वरूपा त्वदीयमायाभ्रमकारणं सा ।
दिगन्तरेखावदतीन्द्रियं ते तत्त्वं जगन्नाटकसूत्रधार ।।

व्या :- दृश्येति :- जगदेव नाटकं दृश्यकाव्यं तत्र सूत्रधार ! हे भगवन् ! त्वदीयमाया तावकीना माया शक्तिः, दिगन्ते दिशामग्रभागे दृश्यमाना या रेखा

In Public domain. Digitization Muthulakshmi Research Academy

तद्वत्, दृश्यापि द्रष्टुं योग्यापि अदृश्या अगोचरा, किञ्च, सत्स्वरूपा (कारणरूपा) अस्तित्वरूपा वा, आ सत्स्वरूपा (कार्यरूपा) नास्तित्वरूपा च, सा मायैव भ्रमकारं भ्रान्तेर्निमित्तं, विश्वमिदं सर्वं भिन्नमात्मन इति भ्रान्तेर्मूलहेतुरित्यर्थः। ते भवतः, तत्त्वं यथार्थरूपम्, अतीन्द्रियम् इन्द्रियागोचरं, चक्षुरादीन्द्रियैर्ज्ञातुमशक्यमित्यर्थः।

తా॥ ఓ జగన్నాటక సూత్రధారీ! నీ మాయ దిగన్తరేఖవలె కనబడుచున్నట్లు ఉండును. కాని కనపడదు. (అది కారణరూపమునను కార్యరూపమునను న్నది.) ఉన్నదిలేదు అనునట్లున్నది. అదియే ఈ భ్రాంతికంతకును మూలకారణము. నీ తత్త్వము చక్షురాదీంద్రియములకు అగోచరము. "బుద్ధిగ్రాహ్యమతీన్ద్రియ"మని స్మృతి వచనము.

You are the director of this cosmic drama (it appears in cause and effect form). What exists doesn't look like it does. (This is the root of all the illusion). Your true state is beyond the reach of sensory organs as *smritis* say *"buddhigraahyamateendriyam"*

१६. त्वया विना किं सुखमस्ति तत्र मन्यामहे शून्यमिवाखिलं तत् ।
सर्वं दिवं तावकपादचिह्नैर्धन्या भवत्यद्य धराऽप्रमेय ॥

व्या :- त्वयेति :- अप्रमेय ! देशकालाद्यपरिच्छिन्नस्वरूप ! त्वया विना भवन्तं विना, तत्र स्वर्गलोके, किं सुखमस्ति कीदृशं सुखं भवति, न किमपीत्यर्थः। तत् अखिलं सर्वं, दिवं स्वर्गं, शून्यमिव, मन्यामहे अवगच्छामः। अद्य इदानीं, तावकपादचिह्नैः भवदीयपादाङ्कितैः, धरा धरणिः, धन्या योग्या पवित्रा च भवति, दिवशब्दः अकारान्तः नपुंसकलिङ्गः।

తా॥ ఓ దేవా ! నీరూపమిట్టిదనియు నింతదనియు ఎవ్వరును చెప్పజాలరు. నీవు లేకుండుటచే నా స్వర్గలోకమంతయును, శూన్యమైనట్లున్నది. ఇప్పుడు నీవు భూలోకమున అవతరించుటంజేసి నీ పాదముద్రలచే ఈ ధరావతలమంతయును అలంకరింపబడి పవిత్రమైనది. సార్థకమైనది.

 In Public domain. Digitization Muthulakshmi Research Academy

Oh lord! Indescribable is your form and immeasurable is your nature. The heaven looks deserted as you have descended to *bhooloka*. On your arrival, with the touch of your holy feet, the whole planet turns blessed and beautiful.

१७. भक्त्यैव तेऽधीश्वर देवताऽपि शक्नोति वेत्तुं परमार्थतत्त्वम् ।
दृष्टिस्स्वरूपं मुकुरश्रियैव विलोकितुं शक्यत आदिदेव ॥

व्या :- भक्त्यैवेति :- अधीश्वर। जगदीश ! देवताऽपि देवोऽपि, भक्त्यैव त्वद्विषयकभक्तिविशेषेणैव, ते भवतः! परमार्थतत्त्वं मुक्तितत्त्वं, यथार्थरूपमित्यर्थः। वेत्तुं ज्ञातुं, शक्नोति समर्थो भवति। आदिदेव ! देवानामादिम ! दृष्टिः दृक् नेत्रमित्यर्थः, मुकुरस्य दर्पणस्य। ''दर्पणे मुकुरादर्शा'' वित्यमरः श्रियैव शोभयैव। स्वरूपं स्वाकृतिं, वीक्षितुं द्रष्टुं, शक्यते शक्नोति। द्रष्टान्तालङ्कारः।

यथा नेत्रं दर्पणकान्त्या स्वरूपं द्रष्टुं शक्नोति तथा मानवः भक्तिद्वारैव परमार्थतत्त्वं ज्ञातुं शक्नोति, अन्यथा देवोऽपि तत् ज्ञातुमसमर्थ एव। तस्मादात्मज्ञाने भक्तिरेव गरीयसीति तात्पर्यम्। ''मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी''ति जगद्गुरुभगवच्छङ्कराचार्यवचनम् ।

తా॥ ఓ పురాణపురుషా ! జగదీశ్వరా ! దేవుడైనను భక్తిచేతనే పరతత్త్వము నెఱుగగలడు. మరియొక మార్గముచే నెరుంగజాలడు. కన్ను అద్దపు కాంతిచేతనే తన రూపమును గుర్తించుచున్నది. కాని ఇతర సాధనములచే గుర్తింపజాలదు గదా! పరమార్థము నెరుంగుటకు భక్తియే ముఖ్యసాధనమని సిద్ధాంతము.

Oh Lord! The Supreme Being! The lord of the universe! Even gods can get to know about the supreme truth only through *bhakti*, just like the reflective light that helps the eye see our image in the mirror.

१८. कान्भाग्ययुक्तानिह तावकीनमित्रत्वमाप्तुं तव गूढचर्याम् ।
ज्ञातुं त्वया रन्तुमनन्तभूमावजीजनो नो वद देवदेव ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- कानिति :- देवदेव ! महादेव ! इह अत्र, इदानीम्, अनन्तभूमौ अखण्डे भूमण्डले भाग्ययुक्तान् भाग्यवतः, कान् मनुजान्। तावकीनमित्रत्वं त्वदीयमैत्रीम्, आप्तुं प्राप्तुं तव भवतः, गूढचर्यां गुप्तवर्तनं, ज्ञातुम् अवगन्तुं, त्वया सह भवता साकं, रन्तुं क्रीडितुम् अजीजनः सृष्टवानसि, नः अस्माकं वद कथय।

जनी प्रादुर्भावे इति धातोः लुङ् हेतुमत्वात् कर्तरि लुङ् ।

తా॥ ఓ దేవదేవ ! ఈ అఖండ భూమండలమున నీతో మైత్రిగావించి, నీ గూఢచర్యలను గుర్తించి, నీతో ఆడుచు పాడుచు తిరుగుభాగ్యమెవ్వరికి లభింపనున్నదో, ఆ భాగ్యవంతులెవ్వరో మాకెఱింగింపుము.

Lord of Lords! Kindly let us know who the lucky one is on this earth who knows your true state and can be together with you, all the time playing and singing with you.

१९. त्वदीक्षणेनात्मनि विश्ववारो देदीप्यतेऽधीश्वर । लीयते सः ।
नूनं तथाऽनूनकवस्तुसङ्घः स्वप्ने यथा विभ्रमणेन देव ॥

व्या :- त्वदीक्षणेनेति :- अधीश्वर ! देव ! स्वप्ने स्वप्नदशायां, विभ्रमणेन मनोभ्रान्त्या, अनूनकः अत्यधिकः, वस्तुसङ्घः पदार्थसमूहः, यथा देदीप्यते प्रकाशते, तथा तद्वत् आत्मनि स्वस्मिन्, त्वदीक्षणेन तव वीक्षया, विश्ववारः सर्वं जगत्, देदीप्यते। सः लीयते अन्तर्धानं गच्छति च, नूनं ध्रुवम्, उपमालङ्कारः।

यथा स्वप्नदशायां मनोविभ्रमणेन सकलपदार्थसमूहः भाति, पुनः प्रबोधसमये नश्यति, तथा आत्मवीक्षणेन आत्मन्येव सर्वं विश्वं भासते। पुनः वीक्षणाभावे सर्वमात्मन्येव प्रलीयते, नूनम्।

తా॥ ఓ దేవదేవ ! స్వప్నదశయందు మానసిక విభ్రమణమువలన అన్ని వస్తువులు కనబడును. ఆ దశ అంతర్ధానము కాగానే ఆ వస్తువులన్నియు అచ్చటనే అంతర్ధానమగును. అట్లే ఈ జగత్తంతయు నీవు చూచునపుడు అనగా సృష్టి సమయమున నీయందే వెలుగుచు కనబడును. నీ వీక్షణములేనిచో, అనగా ప్రళయ

సమయమున నీయందే లీనమగును. అజ్ఞానమనెడు మాయ కప్పియున్నంత వరకు నీ జగత్తంతయు ఉన్నట్లుండి, జ్ఞానముదయింపగనే అంతయు అచ్చటనే నశించి ఆత్మయొక్కటియే మిగులును. ఆ ఆత్మయే నీవని భావము. జగమంతయు స్వప్నమువలె భ్రాంతి కల్పితము. మనః కల్పితము. ఆత్మయందధ్యస్తమై వ్యవహారమున్నంతవరకు వేరుగానున్నట్లు కనబడి జ్ఞానసమయమున అంతర్హితమగుచున్నది. ఆత్మయొక్కటియే స్థిరముగ ఉండునని తాత్పర్యము.

During sleep as the physical body relaxes the mind still keeps working and travels all over. All the things so real like, it sees in the dreams are dispelled once one awakes from sleep. In the same manner, we see the world in your light and at the end of the millennium; all the manifestations get submerged in you. As long as there is ignorance, all the manifested things are taken to be real and on one's awakening, it dawns on the realized soul that it's the sole atman that pervades everything. And this atman is the Supreme Being.

२०. एकत्वसङ्ख्याप्रतिपादकाङ्को निरन्तरं बोधयते बहुत्वम् ।
बिन्द्वन्वितस्सुष्ठु यथा स्वभावयुतस्त्वमेकोऽपि तथाऽसि देव॥

व्या :- एकत्वेति :- एकत्वसङ्ख्याप्रतिपादकः एकत्वसङ्ख्याबोधकः अङ्कः एकाङ्कः, निरन्तरम् अव्यवधानेन, बिन्दुना अनुस्वारेण, अन्वितः संयुतः, यथा यद्वत् बहुत्वं बहुभावं सुष्ठु निर्विवादं बोधयते सूचयति, हे देव। त्वं भवान् एकोऽपि, अद्वितीयोऽपि स्वस्यभावेन स्वशक्त्या मायया, युतः संयुक्तः तथा तद्वत्। बहुत्व बोधकः बहुरूपवान्, इत्यर्थः असि भवसि, उपमालङ्कारः।

एकाङ्कः अव्यवधानेन बिन्दुसमन्वितः दशसङ्ख्याको भवति। बिन्दुद्वयसंयुतः शतसङ्ख्याको भवति। तद्वदेव त्वमपि स्वमायया सहितस्सन् बहुरूपो भवसि "इन्द्रो मायाभिः पुरुरूप ईशते" इति श्रुतिरत्र प्रमाणम् ।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఒకటి అనెడు సంఖ్య వ్యవధానములేకుండ సున్నాలతో గూడిన యెడల, 10–నూరు–వేయి అని బహుత్వమునందుచున్నది. అట్లే, ఆత్మయొక్కటి అయ్యును, మాయాశబలితమై బహురూపములందుచున్నది.

Every trailing zero after the digit one makes it bigger and bigger. Similarly, though atman is single, as it is permeated by *maya,* takes innumerable forms."

२१. इत्थं स्तुवन्तं प्रमदाश्रुमन्तं देवोऽगदीद्दिव्यगणं दयालुः ।
श्रितानुकूलः कमनीयवाक्यं भक्ताभयं सत्यमतीव गोप्यम् ॥

व्या :- इत्थमिति :- इत्थं पूर्वोक्तरीत्या स्तुवन्तं प्रशंसन्तं प्रमदेन अधिकानन्देन जातं यत् अश्रु भाष्पं तद्वन्तम्, आनन्दाश्रुपरीतं, दिव्यगणं देवतानीकं, श्रितानुकूलः आश्रितवत्सलः। दयालुः कृपार्द्रचित्तः। देवः भगवान्, भक्तेभ्यः अभयदं भक्तानां भयनाशनं, सत्यं ऋतम्, अतीव रहस्यम् अत्यन्तगोप्यं, कमनीयवाक्यं मनोहरं वचनम्, अगदीत् जगाद।

తా॥ ఇట్లానందా(శుపరీత ముఖమండలులై తన్ను నుతించు దేవతాగణమును గాంచి, కృపాళువు నా(శిత వత్సలుడునగు శిశురూపమున నున్న యా భగవానుడు, సత్యమును భక్తాభయదాయకమును అతి రహస్యమును మనోహరమునగు వచనమును పలికెను.

As the overwhelmed gods were praising him, the merciful, devotee loving god now as infant spoke the secret truth so pleasantly for their assurance.

२२. नन्दामि हे देवसभ ! त्वदीयवाक्यैर्यथार्थं प्रतिपादयद्भिः ।
वेदान्तगोप्यैरनुकम्पया त्वामेतर्ह्यहं वच्म्यवतारहेतुम् ॥

व्या :- नन्दामीति :- देवानां सभा देवसभं, तत्सम्बुद्धौ हे देवसभ ! हे देवसङ्घ! ''सभाराजाऽमनुष्यपूर्वे''ति सूत्रेण सभाशब्दस्य नपुंसकत्वम्। यथार्थं तत्त्वं,

 In Public domain. Digitization Muthulakshmi Research Academy

प्रतिपादयद्भिः निरूपयद्भिः वेदान्तेषु उपनिषत्सु। गोप्यैः रहस्यतया निक्षिप्तैः त्वदीयवाक्यैः भवद्वचनैः, अहं नन्दामि तुष्यामि। एतर्हि इदानीम्, अनुकम्पया कृपया, ''कृपा दयाऽनुकम्पा स्यादि''त्यमरः। त्वां भवत उद्दिश्य। अवतारहेतुम् अवतारकारणं वच्मि कथयामि।

తా॥ ఓ దేవతలారా ! తత్త్వప్రతిపాదకములైన మీ వేదాంత రహస్య వచనములను విని నేను మిక్కిలి ఆనందించితిని. మీ యందలి కరుణచే అతి రహస్యమైన నా అవతార కారణమును చెప్పెదను. వినుడు.

Oh gods! I am overjoyed at your philosophical conversation revealing the secret doctrines of Vedas and Upanishads. Now I will benignly reveal the secret of my incarnation.

२३. अस्मिन्कलौ सत्यदयातिरिक्ताः श्रद्धाविहीना मनुजा भवन्ति।
निद्राशनस्त्रीरतिमात्रलोला नक्तंदिवं नश्वरसम्पदन्धाः ॥

व्या :- अस्मिन्निति :- अस्मिन्वर्तमाने, कलौ कलियुगे, मनुजाः मानवाः, सत्येन दयया च अति अत्यन्तं रिक्ताः शून्याः, सत्यदयारहिता इत्यर्थः। श्रद्धया सत्कर्मासक्त्या, विहीनाः रहिताः निद्रा च अशनं भोजनं च, स्त्रीरतिः मैथुनं च। तेष्वेव लोलाः आसक्ताः लोलुपा इत्यर्थः, नक्तंदिवं रात्रिंदिवं, नश्वरा नाशनशीलाः याः सम्पदः ताभिरन्धाः नश्वरसम्पन्मदान्धा इत्यर्थः भवन्ति।

తా॥ ప్రస్తుతము కలియుగమున మానవులు సత్యమును దయను సంపూర్ణముగ విడిచిరి. సత్కర్మములందు శ్రద్ధను విడనాడిరి. నిద్రాభోజన మైధునములందు మాత్రమే యాసక్తులైరి. నశ్వరములైన సంపదలను నమ్మి కన్నుగానక సంచరించుచుండిరి.

"In this present *kaliyuga*, human beings have ceased to be truthful, to be kind and have no regard for or belief in good deeds. They are hedonists who are indulged in eating, sleeping and are slaves to carnal desires. They take pride in wealth and material possessions that don't last long.

In Public domain. Digitization Muthulakshmi Research Academy

२४. तस्मादहं तान्बहुमूढचित्तान्संसारघोरार्णवतो मनुष्यान् ।
उद्धारयिष्याम्युचितक्रमेण विमोहयन्नद्भुतवर्तनेन ॥

व्या :- तस्मादिति :- तस्मात्कारणात्, अहं, बहुमूढचित्तान् अतिमूढस्वभावान्, तान् मनुष्यान् मानवान्, उचितक्रमेण अनुकूलमार्गेण, अद्भुतवर्तनेन आश्चर्यकरप्रवर्तनेन, विमोहयन् मुग्धान्कुर्वन्, संसार एव घोरार्णवः भयङ्करसागरः तस्मात्, पञ्चम्यास्तसिः उद्धारयिष्यामि तारयिष्यामि।

తా॥ మూఢులు మూర్ఖులు సంసార మగ్నులునగు నీ మానవులనుచితరీతిని నా యద్భుత ప్రవర్తనాదులచే సంసారమునుండి నేనిప్పుడుద్ధరింతును.

All these ignorant pompous fools will be uplifted by my principles and precepts.

२५. आनन्दयिष्यामि मदीयभक्तानद्वैततत्त्वं मम दर्शयिष्ये ।
अहं सदा तान्कृपया नटिष्याम्यनन्तवेषैस्सुजनैकवेद्यैः ॥

व्या :- आनन्दयिष्यामीति :- अहं कृपया दयया, मदीयभक्तान् मयि भक्तियुक्तान्, मद्भक्तानित्यर्थः, आनन्दयिष्यामि आनन्दयुक्तान्करिष्यामि, मम मे, अद्वैततत्त्वम् अद्वैतरहस्यं, केवलत्वमित्यर्थः, तान् तेभ्यः दर्शयिष्ये निरूपयिष्यामि, सुजनैकवेद्यैः सत्पुरुषैरेव ज्ञातुं शक्यैः अनन्तवेषैः बहुविधभूमिकाभिः, सदा सन्ततं, नटिष्यामि नटनं करिष्यामि।

తా॥ నేను నా భక్తులను ఆనందపరచెదను. నా యద్వైత తత్త్వమును వారికి జూపెదను. సత్పురుషైక వేద్యములగు బహువిధ వేషములచే నిత్యము నటింతును.

My presence will give my devotees solace, happiness. I will teach them the *advaita* principle, and showcase the various traits of exemplary men.

२६. विस्मृत्य तत्त्वं मम नित्यसत्यमश्रान्तमानन्दमयं यथेष्टम् ।
वशो भविष्याम्यखिलार्थबन्धसन्धानमूलप्रकृतेः कदाचित् ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- विस्मृत्येति :- कदाचित् कस्मिंश्चित्काले, अहं, नित्यसत्यं सर्वदा सत्यस्वरूपं, त्रिकालाबाधितमित्यर्थः, अश्रान्तं सन्ततम् आनन्दमयम् आनन्दात्मकं मम मे, तत्त्वं सहजस्थितिं सच्चिदानन्दरूपमित्यर्थः। विस्मृत्य स्मरणविषयमकृत्वा, यथेष्टं स्वेच्छया, अखिलार्थानां सकलवस्तूनां बन्धसन्धानायाः बन्धदायिन्याः परस्परं सकलपदार्थान् मेलयन्त्या इत्यर्थः, मूलप्रकृतेः मायाशक्तेः, वशः अधीनः भविष्यामि।

कदाचिदहं सच्चिदानन्दमयं मत्स्वरूपं विस्मृत्य सर्वपदार्थसन्धानकारिण्याः मूलप्रकृतिरूपमायाया वशवर्ती, भूत्वा सञ्चरिष्यामीति भावः।

తా॥ నేనప్పుడప్పుడు త్రికాలాబాధితము నానందరూపమునగు నా నిజస్వరూపమును మరచి, సర్వవస్తు జాతముతో సంబంధమును గూర్చు నా మాయకు లోబడి సంచరింతును. ప్రకృతి వశవర్తియైన మానవునివలె నజ్ఞానిగనే యుండెదను.

I shall willingly choose to be ignorant of my divine nature that is beyond the three *gunas* and the three *kalas*. I will give into *maya* deliberately and will get associated with all the manifestations of it and thus behave like any other unenlightened man.

२७. भक्ताय मूढाय विचक्षणायोन्मत्ताय धीराय सकैतवाय ।
तत्तद्रसान्दर्पणवद्यथेच्छं निवेदयिष्येऽहमकामनोऽपि ॥

व्या :- भक्तायेति :- अहं, अकामनोऽपि संकल्पविरहितोऽपि, भक्ताय भक्तियुक्ताय, मूढाय मूर्खाय, अथवा, मोहाविष्टाय, विचक्षणाय विवेकयुक्ताय, उन्मत्ताय उन्मादिने, धीराय पण्डिताय, अथवा, धैर्यवते, कैतवं छलं तेन युक्ताय कापट युक्ताय, जनाय, दर्पणवत् आदर्श इव, यथेच्छं, तत्तद्रसान्, तांस्तान्रसविशेषान्, रुचिभेदान्, निवेदयिष्ये प्रकटीकरिष्यामि।

दर्पणे काचमणिवैशद्यविशेषेण तत्सन्निहितवस्तुनः प्रतिबिम्बं बिम्बसदृशं सत् प्रतिभाति एवमेवाहमपि भक्तसमक्षे भक्त इव, मूढसन्निधौ मूर्ख इव, विवेकिनस्सकाशे विवेकीव। उन्मत्तसंसर्गे उन्मादीव पण्डितगोष्ठ्यां विद्वानिव, कुटिलान्तिके सकैतव इव, भास्यामि, तत्तद्रुचीः तेभ्यो दर्शयिष्यामि, उपमालङ्कारः।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ స్వచ్ఛమైన యుద్ధమున తత్సన్నిహిత వస్తుస్వరూపము యథాతథముగనే కనబడును. నేనుగూడ అట్లే, యెవ్వరితో గలిసిన వారికడ వానివలె సంచరింతును. భక్తునికడ భక్తునివలె, మూర్ఖుని యెదుట మూర్ఖునివలె, వివేకి యెదుట విచక్షణునివలె, ఉన్మత్తునితో గలిసిన ఉన్మాదివలె, పండితుని యెదుట పండితునివలె, మోసగానిచెంత మోసగానివలె స్వేచ్ఛగా దిరుగుచు, నాయా రుచులను వారు గ్రహించునట్లు నటింతును. నాకే కోరికయు లేకున్నను ఉన్నట్లు కనబడుచుందును.

A clean mirror reflects a clear image of the things before it. In a similar way I too shall behave exactly the same way as the people I am associated with. A devotee will find a devotee in me. With a fool I will behave like one, like an insane with someone who has lost his wits, as a prudent with a prudent and with cheats I will be deceitful. Though not desirous, I will project myself whimsical. Thus I will make them all witness my various fake indulgences."

२८. नत्वा महादेवमिति ब्रुवन्तं दिव्यव्रजोऽगान्निलयं स्वकीयम् ।
सद्योऽभिजातं तनयं विलोक्यामोदिष्ट माताऽत्मकुलप्रदीपम् ॥

व्या :- नत्वेति :- इति एवं, ब्रुवन्तं कथयन्तं, महादेवं भगवन्तं, नत्वा नमस्कृत्य, दिव्यव्रजः देवसमूहः। स्वकीयं स्वीयं, निलयं धाम, अगात् अगच्छत्। सद्यः तदानीम्, एव, अभिजातम् उत्पन्नम्, आत्मकुलप्रदीपं स्ववंशप्रकाशकं, तनयं कुमारं, विलोक्य दृष्ट्वा माता तज्जननी' अमोदिष्ट मुमुदे मुदमवापेत्यर्थः।

भगवन्तं नत्वा देवास्स्वलोकं ययुः सद्योजातं बालकं वीक्ष्य सा माता मुदमवापेति कथनेन गर्भस्थशिशुमेव देवा अब्रुवन्, गर्भस्थ एव भगवान् अवोचदिति गम्यते।

తా॥ పైరీతిని బలికిన భగవంతునకు నమస్కరించి దేవతలు వారి వారి గృహములకేగిరి. అప్పుడే జన్మించిన వంశదీపకుడైన యా కుమారునిగాంచి, తల్లి మిక్కిలి యానందించెను. దీనిని బట్టి మాతృగర్భస్థుడైన భగవంతునే దేవతలు గొనియాడి నట్లును నచ్చటినుండియే యా దేవుడు వారితో మాటాడినట్లును దెలియుచున్నది.

In Public domain. Digitization Muthulakshmi Research Academy

All the gods who came down to see the new incarnation, after listening to the baby boy returned to their abode happily. The mother had abundant joy looking at her just born. (This implies that the gods held the conversation with the yet-to-be-born incarnation while he was still in the mother's womb)

२९. प्रवर्धते येन चराचरं तं लीलामनुष्यं विरतात्मतृप्तम् ।
मोहादुपाक्रंस्त तदीयमाता स्तन्येन सम्पोषितुमादिदेवम् ॥

व्या :- प्रवर्धत इति :- येन देवेन, चरश्च अचरश्च चराचरं जङ्गमस्थावरात्मकं जगत्। प्रवर्ध्यते वृद्धिं नीयते तं लीलामनुष्यं विलासार्थं मानवरूपधारिणं, निरतं नित्यम् आत्मतृप्तम् आत्मारामं, नित्यतृप्तमित्यर्थः, आदिदेवं पुराणपुरुषं, स्तन्येन क्षीरेण सम्पोषितुं संवर्धयितुं, तदीयमाता तस्य जननी, मोहात् अज्ञानात् अथवा पुत्रप्रेम्णा उपाक्रंस्त आरेभे। उपपूर्वक क्रमु पादविक्षेपे इति धातोर्लुङ्। प्रोपाभ्यां समर्थाभ्यामिति आत्मनेपदम् चराचरसंवर्धनसमर्थः पुराणपुरुष एव पुत्रत्वेनावतीर्ण इत्यज्ञात्वा तदीयमाता तं बालकं स्तन्येन सम्पोषितुमारेभ इति भावः।

తా॥ ఏ దేవదేవుడీ జంగమస్థావరాత్మకమగు జగత్తునంతను బోషించుచున్నాడో, యాతడే లీలామానవుడై తనకు పుత్రుడుగ నవతరించెనని తెలియక, అతడు నిత్యతృప్తుడని యెరుగజాలక, యాతని తల్లి పుత్రవ్యామోహముచే వానికి బాలిచ్చి పెంచనారంభించెను. జన్మించిన యా బాలుడు తల్లిపాలు కుడువనారంభించెనని భావము.

The supreme god who sustains the entire universe of all movables and immovables now was sucking milk from his mother, who was oblivious of the truth that her son is an ever content divine self who is beyond any bodily needs.

३०. मायानिबद्धं मनुजायुरेवं नानाप्रकारैर्विरमेच्छुचस्तत् ।
यदा स्वमातुर्जठरादपप्तत्तदेत्यशोकोऽप्यरुदन्महात्मा ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- मायेति :- यदा यस्मिन्समये, स्वमातुः स्वजनन्याः, जठरात् गर्भकोशात्, अपप्तत् अपतत् तदा तत्प्रभृति, मायानिबद्धं मायाच्छादितं, मानववय इत्यर्थः, शुचः दुःखस्य शोकस्य, नानाप्रकारैः नानाविधैर्मार्गैः, एवम् इत्थं, विरमेत् विरामं गच्छेत्, अन्तं यायादित्यर्थः इति इत्थं, बोधयन्निव, अशोकोऽपि शोकविरहितोऽपि महात्मा महानुभावः, सः, बालकः अरुदत् अरोदीत्।

यदा मातृगर्भाद्बालकः भूमौ पतेत् तदा प्रभृति एवमेव शोकाविष्टोऽन्तं यायादिति बोधयन्निव स बालकः रोदितुमारेभे इति भावः। पत्लृ गताविति धातोर्लुङ् निदर्शनालङ्कारभेदः, रुदिर् अश्रुविमोचने इति धातोर्लुङ्।

తా॥ మానవ జీవితమంతయును మాయాక్రాంతము. జన్మించినది మొదలు మరణించువరకు ఏదో ఒకవిధమైన శోకముతో నిండియే యుండును అను నగ్నసత్యమును బోధంచుచున్నట్లాబాలుడు పుట్టగనే ఏడవ నారంభించెను.

Life is full of illusions. Right from the birth to the last breath there is some sorrow that grapples us. As though to demonstrate this bitter truth the boy started crying right after his birth (though he is incarnation of God)

३१. उन्मीलनं तस्य निमीलनं स्यादोष्ठस्य सर्वायुषि शर्म कष्टम् ।
ते इत्यथाऽबूबुधतां कचालिः कालस्य वक्रां गतिमालुलोकत् ।।

व्या :- उन्मीलनमिति :- अथ अनन्तरं तस्य बालकस्य। ओष्ठस्य रदनच्छदस्य। उन्मीलनं विवृतत्वं, निमीलनं संवृतत्वं, ते उन्मीलननिमीलने, सर्वायुषि सम्पूर्णजीविते, शर्मसुखं कष्टं स्यात् दुर्लभं भवेत्। इति अबोबुधतां अबूधयताम्। कचालिः केशपाशः कालस्य, वक्रतां कुटिलत्वम्, आलुलोकत् आलोकयामास। बुध अवगमने इति धातोः ण्यन्ताल्लुङ् लोकृ लोकने इति धातोरेवमेव। निदर्शनालङ्कारः।

यस्य कस्यापि सम्पूर्णजीविते एकान्तसुखं एकान्तदुःखं वा न भवेत्। ते सुखदुःखे पर्यायेण अगच्छतः अमुमर्थं बोधयन्निव स बालः कदाचित् ओष्ठस्य उन्मीलनं कदाचित् निमीलनञ्च करोतीति भावः, सः ओष्ठोन्मीलननिमीलने

In Public domain. Digitization Muthulakshmi Research Academy

करोतीति यावत्, अत्र, ''कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा, नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण'' इति कालिदासवचनं स्मर्तव्यं कालस्य गतिः कुटिला इति बोधयन्निव तस्य कचालिः वक्रतामवाप कुटिलकुन्तलस्स बाल इति भावः ।।

తా॥ ఎవ్వరికయినను జీవితమంతయు సుఖమయమై యుండదు. అట్లే దుఃఖమయముకూడ కాదు. సుఖదుఃఖ మిశ్రితమైయుండును అనెడు సత్యమును బోధించునట్లు ఆ బాలుడొకసారి పెదవి విప్పుచు మరియొకసారి మూయుచునుండును. కాలము కుటిలమయినది సుమా యని బోధించునట్లాబాలకుని కేశములు వంకరలు తిరుగుచుండెను. ఇందు బాల్య వర్ణనము మిక్కిలి చమత్కారముగనున్నది.

Life is a blend of happiness and sadness. No one can be just happy or sad all his life. Similarly the little boy's teaching (talk) and nonteaching (silence) complemented each other. The curly hair of the little one seemed to suggest that life is not straight and has twists and turns, ups and downs.

३२. यो रक्षकोऽभूद्भुवनस्य जोषमसद्ग्रहः स्प्रष्टुमशक्त नो यम् ।
प्रसूर्विभोस्तस्य गलेऽपि रक्षाबन्धं न्यभान्त्सीत् मणिमन्त्रपूतम् ।।

व्या :- य इति :- यः देवः, जोषं सुखं यथातथा, भुवनस्य लोकस्य, रक्षकः रक्षिता, अभूत् आसीत्, ''तूष्णीमर्थे सुखेजोष'' मित्यमरः, यं देवं असद्ग्रहः दुष्टग्रहः स्प्रष्टुं स्पर्शं कर्तुमपि, नो अशक्त नाशकत्, धातुपाठे ''शक विभाषितो मर्षणे'' इति वचनात्, दिवादि पठितः शकधातुः आत्मनेपद्यपि तस्य रूपमशक्त इति। तस्य विभोर्देवस्य गले ग्रीवायां, प्रसूः माता, मणिभिः मन्त्रैश्च पूतं पवित्रं, रक्षाबन्धं रक्षासूत्रं, न्यभान्त्सीत्, बबन्ध, निपूर्वक बन्ध बन्धने इति धातोर्लुङ्।

यस्सर्वलोकान्सुखेन रक्षति यं दुष्टग्रहादयो वीक्षितुं स्प्रष्टुमपि न शक्नुवन्ति तस्य देवदेवस्य शिशोः कण्ठसीम्नि, मणिमन्त्रपूतं रक्षाबन्धनं तन्माता बबन्ध दुष्टग्रह बाधानिवारणार्थं बबन्धेति भावः।

తా॥ ఎవ్వడీ సకలలోకములను సుఖముగ రక్షించుచుండెనో, యెవ్వని తాకుటకు గూడ భూతప్రేతాది దుష్టశక్తులకు శక్తి లేదో శిశురూపుడైయున్న యా దేవదేవుని

In Public domain. Digitization Muthulakshmi Research Academy

మెడలో నాతని తల్లి మణిమన్త్రపూతమైన తాయేతును దుష్టగ్రహ బాధానివారణార్థమై గట్టెను.

The one who takes care of the welfare of all the worlds, whom no evil spirit can even touch, the lord of lords, the little boy, was tied an amulet to ward off all afflictions that a hostile star might cause. The boy is the supreme god, yet is a child to the concerned mother.

३३. अजस्रमौष्ण्यं तनुते दिनेशः समस्तसृष्टिस्थितिनाशहेतोः ।
यस्य प्रभावेण विभोस्सुखं सोऽस्वाप्सीद्धसन्त्यन्तिकमादिदेवः ॥

व्या :- अजस्रमिति :- समस्तस्य सर्वस्य जगतः सृष्टिस्थितिनाशानां सृष्टिस्थितिलयानां, हेतोः कारणभूतस्य, यस्य विभोः देवदेवस्य प्रभावेण महिम्ना दिनेशः सूर्यः, अजस्रं सन्ततम् औष्ण्यं उष्णं तेजः, तनुते विस्तारयति, सः आदिदेवः परमात्मरूपो बालकः, हसन्त्याः अङ्गारधानिकायाः, अन्तिकं समीपे, सुखम् अस्वाप्सीत् सुष्वाप। ''अङ्गारधानिकाङ्गारशकट्यपि हसन्त्यपि (हसन्यपि) इत्यमरः। स्वप् शये इति धातोर्लुङ्ः।

सृष्टिस्थितिलयकर्तुः यस्य देवस्य महिम्ना, अथवा आज्ञया सूर्योऽपि स्वीयमुष्णं तेजः सन्ततं प्रसारयति सः देवः इदानीं हसन्तीसमीपे सुखं निद्राति स्म।

తా॥ ఏ దేవుడీ ప్రపంచమును పుట్టించి, పెంచి, తుదకు నాశనము గూడ గావించుచుండెనో, యెవ్వని మహిమచే సూర్యుడుగూడ తన వేడికాన్తిని వెదజల్లు చుండెనో, యా దేవుడిప్పుడు మానవ బాలుడై చలిని బోగొట్టుకొనుటకు వెచ్చని కుంపటిదగ్గర నిద్రించుచుండెను.

''भीषास्माद्वातः पवते भीषोदोति सूर्यः'' అని శ్రుతివచనము.

The god who can create, sustain, and destroy the universe, with whose grace the sun gives out light, now was made to sleep by a charcoal stove to feel warm!

 In Public domain. Digitization Muthulakshmi Research Academy

३४. मुदन्वितस्सन्ततसाक्षितत्त्वमद्वैतमात्मीयमथाऽतनिष्ट ।
स्तनन्धयो मञ्जुलनिर्विकारदृष्ट्या स आन्दोलनरम्यमञ्चे ॥

व्या :- मुदन्वित इति :- अथ अनन्तरं, सः स्तनन्धयः अर्भकः आन्दोलनेन चलनेन रम्ये मनोहरे मञ्चे पर्यङ्के, डोलिकाशयन इत्यर्थः मुदा प्रीत्या अन्वितः युक्तः मञ्जुला सुन्दरा निर्विकारा विकृतिरहिता या दृष्टिः वीक्षणं तया, निर्मलनिर्विकारानन्द-दृशेत्यर्थः आत्मीयं स्वीयम्, अद्वैतं भेदरहितं, सन्ततसाक्षितत्त्वं सततसाक्षि भावं, अतनिष्ट अतनोत्। विस्तारयामासेत्यर्थः। तनु विस्तारे इति धातोर्लुङ्।

डोलिकाशयने शयानः स डिम्भः निर्विकारदृशा सर्वं पश्यन् स्वीयमद्वैतं साक्षित्वं प्रकटीचकार।

తా॥ అర్భకరూపముతోనున్న యా దేవదేవుడు ఉయ్యాలలో నుండి యూగుచు నిర్వికారముగ నన్నింటిని జూచుచు, నేను సర్వసాక్షిని. నాకే దానితోడను సంబంధము లేదు అను భావమును బ్రకటించుచున్నట్లుండెను.

As though he was incapacitated being an infant, while being rocked in the cradle, he looked at things around, and appeared to proclaim that he was just a witness of all the proceedings and had no entanglement.

३५. निजात्मनो यस्य कदापि नान्यदृष्टिर्व्यराजीत्स सरोजमालाम्।
ऐक्षिष्ट तत्रोपरिभागबद्धां शिशुः परिव्राडिव योगमुद्राम् ॥

व्या :- निजात्मन इति :- आत्मनः आत्मरूपस्य, यस्य देवस्य, कदापि कस्मिंश्चित्समयेऽपि. निजा स्वीया अन्यदृष्टिः अन्यदर्शनं, न व्यराजीत् न रराज, सः शिशुः अर्भकः, तत्र आन्दोलिकायाः उपरिभागे ऊर्ध्वप्रदेशे, बद्धां निबद्धां, सरोजमालां पद्मस्रजं, परिव्राट् सन्यासी योगमुद्रामिव भ्रूमध्यवीक्षणमिव, ऐक्षिष्ट, अपश्यत्, विपूर्वकस्य राजृदीप्ताविति धातोर्लुङ्। ईक्ष ईक्षणे इति धातोर्लुङ्। उपमालङ्कारः।

In Public domain. Digitization Muthulakshmi Research Academy

यथा योगी योगमुद्रां धृत्वा अन्यत्किञ्चिदपश्यन्नात्मानमेव पश्यति तथा अयमर्भकः किमप्यपश्यन् सरोजमालामेव वीक्षमाण आस्ते।

తా॥ సన్యాసి సంతతము యోగముద్రనుబట్టి తన్నుదాను జూచుకొనుచు నానందించును. అట్లే యీ బాలుడుకూడ ఉయ్యెలకు మీదుగా గట్టబడిన పద్మమాలనే చూచుచు నానందించుచుండెను.

A mystic is amused looking (His very soul) at himself in *yogamudra*. This little child too, looked at the garland tied to the cradle and felt gleeful.

३६. व्योमैकलक्ष्यां स्वदृशं निवर्त्य भूमीं स कृत्यैर्बहु दुर्जनानाम् ।
खिन्नामलोकिष्ट दयार्द्रचित्तो मा देवि भैषीरिति दीनबन्धुः ॥

व्या :- व्योमैकेति :- दयार्द्रचित्तः कृपापूरितमनाः दीनबन्धुः दीनवत्सलः सः भगवान्बालः व्योम गगनमेव एकलक्ष्यां मुख्यलक्ष्यां, गगनमेव पश्यन्तीमित्यर्थः, स्वदृशं स्वदृष्टिं, निवृत्य परिवृत्य, दुर्जनानां दुष्टानां कृत्यैः हिंसात्मककर्मभिः, बहु अत्यन्तं, खिन्नां दुःखितां पीडितामित्यर्थः, भूमीं धरणीं, देवि हे धरणि। मा भैषीः भयं मा प्राप्नुहि, इति एवं सान्त्वयन्निव, अलोकिष्ट अपश्यत्, लोकृ दर्शने इति धातोर्लुङ्।

''अहमद्यावतीर्णः, दुष्टजनकृत्यपीडितां त्वामहमुद्धरिष्यामि, त्वं मा भैषीः'' इति कथयन्निव स बालकः व्योमगतां दृष्टिं निवर्त्य भूमिमपश्यत्।

తా॥ అంతవరకు ఆకాశమునే చూచుచున్న యా బాలుడు తన చూపును మరల్చి త్రిప్పి, దీనవత్సలుడు కృపార్ద్రచిత్తుడు గావున భూమిని జూచి, ఓ దేవి ! యేల భయపడెదవు. దుష్టజనులచే బీడింపబడుచున్న నిన్నుద్ధరించుటకే నేను అవతరించితిని. భయమును వీడుము, అని బోధించుచున్నట్లు క్రిందకు జూడ నారంభించెను. బాలుని యధోదృష్టి ఇట్లుత్ప్రేక్షింపబడెను. బాలుడు క్రిందకు జూడ నారంభించెను.

Veiled by *maya*, life is full of sorrows right from the birth till the last breath. As though to stress this, just born started crying like any other infant. The baby who was looking upside till now turned his eyes downward to look at the ground and cajoled the mother earth assuring her that his very incarnation was to alleviate her pain caused by the wicked.

३७. गत्वा स पीठं कुलदेवताया विस्मित्य पूजाप्रतिमां गृहीत्वा ।
अपीपतद्दूरमपि स्वभावो देवेषु मात्सर्यमितीव देवः ॥

व्या :- गत्वेति :- देवः सः देवरूपस्स बालकः, कुलदेवतायाः पीठं देवतामन्दिरं गत्वा यात्वा, विस्मित्य विकटहासं कृत्वा, पूजाप्रतिमां पूजार्थं पीठे निक्षिप्तां देवताप्रतीकां गृहीत्वा स्वीकृत्य, मात्सर्यम् असूया, देवेषु अपि देवतासु अपि स्वभावः सहजगुणः इतीव इति कथयन्निव, दूरम् अपीपतत् पातयामास सुदूरं चिक्षेपेत्यर्थः। पत्लृगताविति धातोः ण्यन्ताल्लुङ। अनेकचङ्क्रमणादिलक्षणं बालकस्याविरासीदिति द्योत्यते।

తా॥ ఆ బాలుడు దేవపూజా మందిరమునుజొచ్చి అచ్చట పూజార్థమై పీఠమందుంచబడిన దేవతావిగ్రహమును గాంచి, పెద్దగా నవ్వుచు, దానినందుకొని, "ఈ దేవతలందు గూడ మాత్సర్యము సహజగుణము" అని తెలుపునట్లు వానిని దూరముగ విసరెను. తాను దేవుడు. అవియు దేవతారూపములే కావున దాను వానిని జూచి సహింపలేక ఈ పని చేసెనని కవియాశయము. ఈ వర్ణనముచే నా బాలకునకు ప్రాకుట నడచుట మున్నగుచేష్ట లారంభమైనవని చెప్పవచ్చును.

He crawled into the *puja* place at home, looked at the idols and with a big laughter threw them to a distance as if to say that gods too are not devoid of jealousy.

३८. मुहुर्मयेच्छं कृतमन्दहासैरकामतः कल्पितमुग्धकृत्यैः ।
अव्यक्तवादैर्निजशैशवं सो बभ्राज देवं स्वमिवाढ्ययोगी ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- मुहुरिति :- सः अर्भकः, मुहुः पुनः पुनः यथेष्टं, कृताः ये मन्दहासाः दरहसितानि तैः, अकामतः असङ्कल्पतः कल्पितानि कृतानि मुग्धानि सुन्दराणि यानि कृत्यानि कार्याणि तैः, अव्यक्ताः अस्पष्टाः ये वादाः सम्भाषण वचनानि तैः, एवम् इत्थं, स्वशैशवं, स्वीयं शिशुत्वम्, आढ्ययोगी योगीश्वरः स्वमिव आत्मानमिव अबभ्राजत् प्रकाशयामास। उपमालङ्कारः। भ्राजृ दीप्ताविति धातोः ण्यन्ताल्लुङ्। ङि ''भ्राजभासभाषे''त्यादिना उपधा ह्रस्वाभावे एतद्रूपम्।

తా॥ నిష్ఠాతుడైన యోగీంద్రుడు మాటిమాటికి తనలోతానే నవ్వుకొనుచు, సంకల్పము లేకున్నను ఏవో మంచిపనులను గావించుచు, తనలోదానే యస్పష్టముగ గొణుగుకొనుచు జీవించునట్లు ఈ బాలుడుగూడ ముసిముసినవ్వులు నవ్వుచు చిత్రవిచిత్రములైన చేష్టలజేయుచు, వచ్చీరాని పలుకుల నస్పష్టముగ, బలుకుచు, దన శైశవదశను బ్రకాశింపజేసెను.

A *Yogi* who attained liberation while living, laughs at himself, talks to himself and even without attempt, involuntarily too, does good deeds. This boy too, was amused at himself, would do puzzling things, talk indistinctly, gibberishly and thus displayed all crazy modes of behavior.

३९. आह्वायि तातेन स जीवकेति यदा स्फुरद् ज्ञानविवृत्तकण्ठः ।
तदाऽगमद्द्राक्पितुरङ्कदेशं स्मित्वा प्रभुर्भक्तजनानुकूलः ॥

व्या :- आह्वायीति :- यदा यस्मिन्समये, तातेन स्वपित्रा, ''तातस्तु जनकः पिता'' इत्यमरः। जीवक ! चिरञ्जीविन् ! इति इत्थम्, आह्वायि आहूतः, तदा तदानीमेव, स्मित्वा विहस्य, स्फुरत् विकसत् यत् ज्ञानं तेन विवृत्तः परावृत्तः कण्ठः गलः येन सः, भक्तजनानाम् आश्रितानाम्, अनुकूलः अनुयायी, सः प्रभुः बालकरूपो देवः, पितुः स्वजनकस्य, अङ्कदेश ऊरुभागं, द्राक् शीघ्रम्। अगमत् जगाम, गम्लृ गताविति धातोर्लुङि लृदित्वादङिरूपम्।

यदा स्वपिता चिरञ्जीविन्निति तं बालकमाजुहाव तदा स बालः स्मयमानः स्वपितुरङ्कसीमानमारोहति, अयं पिता इयं माता इत्यादिकं ज्ञानमाविर्भवति। तेन ध्वनिमात्रेण ज्ञात्वा, स्वग्रीवां परावृत्य, तं पश्यन् हसतीति भावः।

 In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఓ చిరంజీవీ ! యని తన తండ్రి తన్ను బిలువగనే, నవ్వుచు వచ్చీరాని జ్ఞానముతో తన తండ్రి తన్నే పిలుచుచుండెనని మెడత్రిప్పి పోల్చుకొని భక్తజనానుకూలుడగు ఆ బాలదేవుడు వేగముగా తన తండ్రి తొడపై కూర్చుండెను. ఇట్లా బాలకునకు నామకరణ మహోత్సవము జరిగెను.

On his father's calling out to him to come close, the devotee-friendly god, now the little child would turn and rush to him to sit on his lap.

४०. **प्रशस्तयोगान्वितजातकस्य बालस्य लोकोत्तरलक्षणस्य ।**
मौहूर्तिकास्तस्य मुदा यथार्थमदीधरंस्तारकनामधेयम् ॥

व्या :- प्रशस्तेति :- मुहूर्तं कालविशेषं ये जानन्ति ते मौहूर्तिकाः। दैवज्ञाः प्रशस्ताः श्रेष्ठाः ये योगाः, राजयोगा इत्यर्थः। तैरन्वितं युक्तं जातकं जातकचक्रं यस्य तस्य, लोकोत्तराणि अतिश्रेष्ठानि लक्षणानि चिह्नानि यस्य तस्य, बालस्य शिशोः, मुदा प्रीत्या, यथार्थं सार्थकं, तारक इति नामधेयं नाम अदीधरन् धारयामासुः, धृञ् धारणपोषणयोः इति धातोः ण्यन्ताल्लुङ्।

दैवज्ञाः तस्य बालकस्य जातककुण्डल्यां प्रशस्तान् राजयोगान्, शरीरे दिव्यानि लक्षणानि च परिशील्य, तस्य तारक इति यथार्थं नाम चक्रुः, तारयति संसारसागरात्सर्वानिति तारकपदस्यार्थः संसारिणस्तारयितुमवतीर्णस्य अस्य तारकनामधेयं समुचितमिति मत्वा तथाऽकार्षुरिति भावः।

తా॥ జ్యోతిష్కులా బాలకుని జాతక చక్రమును పరిశీలించి, యందలి రాజయోగములనుగాంచి, యా బాలకుని శరీరావయవములందలి లోకోత్తర సాముద్రిక లక్షణములను తిలకించి, ఇతడు లోకము నుద్ధరించుటకు ఉద్భవించిన మహామహుడని నిశ్చయించి, వానికి 'తారకు'డను సార్థకనామమును గావించిరి.

ఇట్లా బాలకునకు నామకరణ మహోత్సవము జరిగెను.

The astrologers after studying the baby's natal chart and reading the face and the aura noticed that these were supernatural. Having sensed that he was born for a cause

In Public domain. Digitization Muthulakshmi Research Academy

they rightly named him *'Taraka'*, the one who saves from extinction.

४१. अवाप्तकामं सततात्मतृप्तमन्नस्वरूपं विभुमप्रबुध्य ।
माता सुतं जानुचरं दिवेशं तमाशिशत्पायसमुत्सवेन ।।

व्या :- अवाप्तेति :- माता जननी, जानुचरं जानुभ्यां चरन्तं, तं सुतं कुमारम्, अवाप्ताः सम्प्राप्ताः कामाः मनोरथाः येन तं, सम्पूर्णकाममित्यर्थः, सततं सन्ततं आत्मना तृप्तम्, आत्मदर्शनानन्दितचित्तमित्यर्थः, अन्नमेव स्वरूपं यस्य तम्, ''अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यत'' इति श्रुत्या अन्नस्वरूपमित्यर्थः। ईशम् ईश्वरं विभुं परमात्मानम् अप्रबुध्य अज्ञात्वा, दिवा अहनि, शुभे समय इत्यर्थः, उत्सवेन उत्सवं कृत्वा, पायसं क्षीरान्नम्, आशिशत् पाययामास, अन्नप्राशनोत्सवं चकारेत्यर्थः। अश भोजने इति धातोः ण्यन्ताल्लुङ्। तस्य प्रत्यवसानार्थत्वात् अणौ कर्तुः सुतस्य णौ कर्मत्वं, तद्वाचकात् द्वितीया च।

नित्यतृप्तं पूर्णकामम् अन्नरूपं परमात्मानं तमज्ञात्वा तस्य जननी सामान्यबालक इति बुद्ध्या शुभे लग्ने पायसेन अन्नप्राशनोत्सवं चकार।

తా॥ ఈ బాలుడు పూర్ణకాముడు నిత్యతృప్తుడు అన్నస్వరూపుడునగు పరమాత్మయేయని గ్రహింపలేక, సామాన్య బాలకునిగాదలంచి, ముణుకులతో బ్రాకుచున్న వయసురాగానే యా తారకునకు తల్లి సుముహూర్తమున బాయసమును తినిపించెను.

The boy was ever content beyond any desires, yet oblivious of this; the parents fed him the milk pudding, on an auspicious day once the little one started crawling.

४२. एकं पिबन्मातृपयोधरं स विमर्दयन्कोमलपाणिनाऽन्यम् ।
निमीलिताक्षस्सुखपारवश्याददिद्युतन्निर्गुणमात्मतत्त्वम् ।।

व्या :- एकमिति :- सः बालतारकः, एकं मातृस्तनं जननीपयोधरं, पिबन् धयन् कोमलपाणिना मृदुकरेण, अन्यं द्वितीयं मातृकुचं, विमर्दयन् पीडयन्

सुखपारवश्यात् सुखपरवशत्वेन हेतुना, निमीलिते अक्षिणी येन सः निमीलित-नयनस्सन्, निर्गुणं गुणरहितम् आत्मतत्त्वं स्वयाथार्थ्यम् अदिद्युतत् द्योतयामास। द्युत दीप्ताविति धातोः ण्यन्ताल्लुङ्।

स बालतारकः स्तन्यपानसमये एकं मातृस्तनं पिबन् अन्यं स्वकरेण मर्दयन्, सुखपरवशतया निमीलितनेत्रयुगलस्सन्, निर्गुणमानन्दरूपं निजतत्त्वं निरूपयामास। अत्र स्तनन्धयस्य अन्यस्तनस्पर्शनरूपा सहजचेष्टा वर्णिता।

తా॥ ఆ బాలతారకుడు తల్లిపాలు త్రాగుచు నొకచేతితో రెండవ స్తనమును తాకుచు, ఆనందపరవశుడై నిమీలితాక్షుడై తన నిర్గుణానంద తత్త్వమును బయటికి జాటుచున్నట్లుండెను.

Taraka, engrossed in suckling at his mother would keep one of his tiny hands on her bosom, looked so happy with half closed eyes that it appeared as though he was looking at his own blissful state outward.

४३. **हिताहितं सोऽविगणय्य नित्यं साक्षिस्थितिं प्राप्य महानुभावः।**
आकाशवत्कल्पितरूप उर्वी देवात्मजोऽभूद्भुवनैकवन्द्यः ॥

व्या :- हिताहितमिति :- महान् अनुभावो महिमा यस्य सः, भुवनेषु लोकेषु एकवन्द्यः मुख्यतया नमस्करणयोग्यः ''एके मुख्यान्य केवला'' इत्यमरः सः उर्वी देवात्मजः भूसुरपुत्रः तारकः हितञ्च अहितञ्च हिताहितम् इष्टानिष्टे विप्रतिषिद्धञ्चानधिकरणवाचीत्येकवद्भावः। अविगणय्य असङ्ख्याय, नित्यं सर्वदा, साक्षिस्थितिं साक्षित्वं, प्राप्य लब्ध्वा, आकाशवत् गगनमिव कल्पितं रूपं यस्य सः निराकारोऽपि रूपवानिवेत्यर्थः। अभूत् बभूव, भू सत्तायामिति धातोर्लुङ्।

తా॥ ఆ తారకుడు లోకైక నమస్కృతుడు, మహానుభావుడు. అందుచేతనే అతడు మేలు కీడు అని చూడక, వానిని పట్టించుకొనక నిత్యము వానినన్నింటిని జూచుచు వానికి లోబడక, సాక్షీభూతుడై ఆకాశమువలె రూపములేనివాడైనను రూపధారియై మెలగుచుండెను. ఆకాశమునకు రూపములేదు. దానికి దలమలినత్వాదులు

In Public domain. Digitization Muthulakshmi Research Academy

భ్రాంతికల్పితములు అట్లే ఆత్మకును రూపము లేదు. అందుచే "ఆకాశ శరీరం బ్రహ్మ" అను వచనము ప్రసిద్ధమైనది.

The whole world salutes *Taraka*, the great one. He does not care for good and bad and is a mere witness of all the happenings. The sky has no dirt or dust. It has no form and is illusory. Similarly the infinite Brahman has now taken a physical form with the name *Taraka*.

४४. मुखे पदाङ्गुष्ठमसौ निधाय स्वभावरम्यामलदीर्घदृष्टिः ।
विस्मृत्य तीक्ष्णक्षुधमर्दितोऽप्यक्रीडीन्महानन्दपयोधिमग्नः ॥

व्या :- मुख इति :- असौ बालतारकः, पदस्य पादस्य, अङ्गुष्ठं प्रथमाङ्गुलिं, मुखे वक्त्रे, निधाय निक्षिप्य, स्वभावेन प्रकृत्या रम्या सुन्दरा अमला निर्मला दीर्घा विशाला दृष्टिः यस्य सः, तीक्ष्णां तीव्राम्, अत्यधिकामित्यर्थः। क्षुधं क्षुद्बाधां विस्मृत्य, अर्दितोऽपि पीडितोऽपि, महानन्द एव पयोधिः सागरः तस्मिन् मग्नः निमग्नः, अक्रीडीत् अखेलत्, क्रीडृ विहारे इति धातोर्लुङ्।

स्वपादाङ्गुष्ठं मुखे निधाय प्रकृतिरम्यया निर्मलया दृशा सर्वं पश्यन्। क्षुत्पीडितोऽपि तां बाधामविगणय्य, ब्रह्मानन्दमनुभवन् स तारक अखेलदिति भावः।

मुखे स्वाङ्गुष्ठनिक्षेपणं बालस्वभाव इति निरूपयामास महाकविः। अत्र, ''करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम्, वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि'' इति श्लोकः स्मर्तव्यः।

తా॥ ఆ తారకుడు తన కాలిబొటనవ్రేలిని నోటియందుంచుకొని, స్వభావసుందరము నిర్మలమునగు తన చూపుతో నన్నింటినిగనుచు నాకలి బాధను గూడ లెక్కింపక బ్రహ్మానందమునందుచు నాడుకొనుచుండెను.

Sucking his big toe, observing things around with a natural serene look, the baby *Taraka* lost in his eternal bliss, would (at times) stay hungry.

In Public domain. Digitization Muthulakshmi Research Academy

४५. तदुन्नसं सुन्दरमन्दहासं प्रसन्नमत्यन्तविशालनेत्रम् ।
चारुस्फुटाम्भोजसदृक्षवक्त्रं सदान्वबोभूयि सगोत्रदृग्भिः ॥

व्या :- तदुन्नसमिति :- उन्नता नासिका यस्मिंस्तत् उन्नसम् उन्नतनासिकं, बहुव्रीहौ "उपसर्गाच्च" इति नासिकान्तबहुव्रीहेः अच् समासान्तः तत्सन्नियोगेन नासिकाशब्दस्य नसादेशश्च। सुन्दरः मनोहरः। मन्दः दरः, हासः यस्मिन् तत्, तत् प्रसिद्धं चारु सुन्दरं, स्फुटं विकसितं, यत् अम्भोजं पद्मं, तेन सदृक्षं तुल्यं, वक्त्रं मुखं, सगोत्रदृग्भिः बान्धवदृष्टिभिः सदा नित्यं, अन्वबोभूयि अन्वभूयत। "सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनास्समाः" इत्यमरः, अनुपूर्वक भूधातोः यङन्तात्कर्मणि लुङ्। अनु पूर्वको भूधातुस्सकर्मकः।

उन्नतनासिकं विशालनयनं सदरहासं सद्योविकसिताम्भोरुहसमानं तस्य तारकस्य मुखं दृष्ट्वा बान्धवा नित्यं मुमुदुः।

తా॥ ఆ తారకుని ముఖము మిక్కిలి అందమైన అప్పుడే వికసించిన తామరపూవువలె నున్నది. ముక్కు ఎత్తుగ సోగగా. నుండెను. కన్నులు వెడల్పుగ నుండెను. చిరునవ్వుతో కలకలనాడు నా తారకుని ముఖమును జూచుచు బంధుజనులు నిత్యమానందించుచుండిరి.

The baby's face was beautiful like a fresh lotus. With a perfect chiseled nose, broad eyes and a pleasant smile it was a feast for the beholder's eye to look at him.

४६. त्रातारमेवार्दयति प्रकृत्या कृतोपकारं न विचार्य मूढः ।
सन्दष्टमात्रञ्चितचूचुकेनाऽबोबुध्यभीक्ष्णं शिशुनेति लोकः ॥

व्या :- त्रातारमेव स्वरक्षकमेव, अर्दयति पीडयति, इति एवं, सन्दष्टं दन्दपीडितं यत् मातुः स्वजनन्याः अञ्चितं पूज्यं चूचुकं स्तनाग्रं येन तेन, शिशुना बालकेन, लोकः जनसमूहः अभीक्ष्णम् अत्यन्तम्, अबोबुधि बोधितो बभूव। बुध अवगमने इति धातोर्यङन्ताल्लुङ्।

असौ बालकः स्वस्य स्तन्यदायिन्याः स्वजनन्याः स्तनाग्रमेव दन्तैस्सन्दष्ट्य, लोकः एवमेव कृतोपकारं त्रातारमेव पीडयतीति भावं बोधयति।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ మూర్ఖలోకము తమ మూఢబుద్ధిచే తమకుపకార మాచరించినవారికే, తన్నుగాపాడినవారికే యపకార మాచరించుచుండును అను భావమును లోకమునకు బోధించుచున్నట్లు, ఆ తారకుడు తల్లి పాలు త్రాగుచున్న సమయమున అప్పుడపుడు ఆమె స్తనాగ్రమునే కఱచుచుండెను. బాలకుల స్వభావమునీకవి చమత్కారముగ వర్ణించెను.

Ignorant and unthankful are the people who without a second thought would bite the hand that feeds them. This boy too like any other ordinary child would at times bite the mother's nipple while she was suckling him.

४७. यो वेदविश्वासयुतस्समस्तं जानाति यो यं नहि वेत्ति लोकः ।
अम्बापदं शक्यत एष वक्तुं मातेति मग्ना प्रमदार्णवेऽभूत् ॥

व्या :- य इति :- यः वेदाः श्रुतयः एव निश्वासाः निश्वासमरुतः तैर्युतः युक्तः वेदप्रकाशभूमिरित्यर्थः "यस्य निश्वसितं वेदाः" इत श्रुतिः प्रमाणम्। यः समस्तं सर्वं जानाति, सर्वज्ञ, इत्यर्थः। यं, लोकः जनः नहि वेत्ति न जानाति, एषः एतादृशः, असौ बालकः अम्बा इति पदं माता इति शब्दं, वक्तुं कथितुं शक्यते शक्नोति, इति, माता तस्य जननी प्रमदार्णवे आनन्दसागरे मग्ना निमग्ना, अभूत् आसीत्।

తా॥ ఎవ్వని నిట్టూర్పులే వేదములయ్యెనో, ఎవ్వడీ సర్వ ప్రపంచము నెఱుంగునో, యెవ్వని నీలోకము మాత్రమెఱుగదో యా దేవదేవుడే తారకుడై తనకు జన్మించి, యమ్మా! అని పిలుచుటకు బ్రయత్నింపగనే, వానితల్లి తన కుమారునకు మాటలు వచ్చుచున్నవనియు, తన్నమ్మాయని పిలిచెననియు, బొంగి ఆనంద సముద్రములో మునిగిపోయెను.

He whose very sighs are Vedas, he who is an omniscient, yet the one who the world doesn't get to know, that supreme god now was born as *Taraka*. And when he started uttering the word (*Amba*) mother, the mother's joy knew no bounds.

In Public domain. Digitization Muthulakshmi Research Academy

४८. अम्बान्यशब्दो नहि वाक्प्रपञ्चे पुनः पुनः पञ्चजनेन भाण्यः ।
अम्बेत्युदित्वा महिमानमस्य जनांस्तदाऽवीवददर्भकोऽसौ ॥

व्या :- अम्बेति :- वाक्प्रपञ्चे सारस्वते, पञ्चजनेन मनुष्येण, ''स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः'' इत्यमरः, पुनः पुनः भूयो भूयः, भाण्यः वाच्यः, अम्बान्यशब्दः अम्बाशब्दादन्य इतरशब्दः, नहि नास्ति खलु, इति इत्थं, बोधयन्, अम्बा इति उदित्वा अम्बेत्युक्त्वा, अस्य अम्बाशब्दस्य, महिमानं प्रभावं, तदा शैशवे, असौ अर्भकः अयं बालतारकः, जनान् मनुजान्, अवीवदत् बोधयामास, वद व्यक्तायां वाचीति धातोर्ण्यन्ताल्लुङ्।

सर्वैर्मानवैः प्रथमतः सर्वास्वप्यवस्थासु मुहुर्मुहुः अम्बाशब्द एव मुखान्निस्सरति, नान्यश्शब्दः, इति तस्य शब्दस्य महिमानं बोधयन्निव स तारकः अम्बेत्यवादीत्।

తా॥ ముందుగ మానవులన్నియవస్థలందును "అమ్మా"యనియే పలుకుదురు. మాటలు వచ్చుటకు ముందమ్మాయను పదమే నోటినుండి వచ్చును. కావున శబ్దజాతములో నాపదమే ముఖ్యమయినదని దాని మహిమ నందరకును దెలుపునట్లా బాలతారకుడు తల్లిని అమ్మాయని పిలువ నారంభించెను. అనగా దారకునకు మాటలు వచ్చుచుండెను అని భావము.

The first meaningful word a child utters is *'amba'* and it is the word that escapes through one's lips spontaneously no matter what the situation is when it is intense. As though to illustrate and emphasize this word's significance the boy would utter it time and again.

४९. वक्रालकालङ्कृतफालभागं बन्धून्विदित्वा कृतमन्दहासम् ।
यसन्तमुत्थातुममुं विलोक्य मोदार्णवे सा जननी न्यमाङ्क्षीत् ॥

व्या :- वक्रेति :- वक्रैः कुटिलैः अलकैः चूर्णकुन्तलैः अलङ्कृतः भूषितः फालभागः फालदेशः यस्य तं, बन्धून् बन्धुजनान् विदित्वा विज्ञाय, कृतः मन्दहासः दरहसितं येन तम्, उत्थातुम् उत्थानाय, यसन्तं यतमानम्, अमुं बालकं

In Public domain. Digitization Muthulakshmi Research Academy

तारकं विलोक्य वीक्ष्य, सा जननी माता, मोदार्णवे आनन्दसागरे, न्यमाङ्क्षीत् न्यमज्जत्, निपूर्वक मस्ज् धातोर्लुङ्।

कुटिलकुन्तलालङ्कृतफालभागम् आगन्तून्बन्धूनभिज्ञाय हसन्तम् उत्थानाय कृतयत्नं तं तारकं वीक्ष्य तस्य जननी परमानन्दमवाव।

తా॥ ఆ తారకుని నుదురు వంకరముంగురులతో నందముగా నుండెను. అతడు బంధువులు రాగానే వారిని బోల్చుకొని చిన్నగా నవ్వుచుండెను. మాటిమాటికి నిలబడుటకు యత్నించుచుండెను. ఇట్టి పుత్రునిగాంచి ఆతని తల్లి మిక్కిలి ఆనందించుచుండెను.

As the curly hair parched on the forehead, the relatives of the boy would try drawing his resemblances of them fondly. It's a sight to see for the buoyant mother to look at her stumbling child who tried repeatedly to stand on his own.

५०. प्रत्यग्रसान्द्राऽऽनतकैशिकेन तमो रजस्स्वोष्ठतलेन सत्त्वं ।
स्मितेन बालोऽनिशनिर्गुणोऽप्यधाल्लीलया लोकविडम्बनाय ॥

व्या :- प्रत्यग्रेति :- बालः शिशुः तारकः अनिशं सन्ततं, निर्गुणोऽपि सत्वादिगुणरहितोऽपि, लीलया विलासेन, लोकविडम्बनाय लोकवञ्चनार्थं प्रत्यग्रं नूतनं सान्द्रं स्निग्धम् आनतं नम्रं वक्रमित्यर्थः। यत् कैशिकं केशपक्षः तेन, तमः तमोगुणं, स्वस्य ओष्ठतलेन दन्तच्छदेन, रजः रजोगुणं स्मितेन हसितेन, सत्त्वं सत्वगुणं च, अधात् दधार। डुधाञ् धारणपोषणयोरिति धातोर्लुङ्।

निर्गुणोऽपि स तारकः नीलकेशभारेण तमः, शोणाधरेण रजः धवलस्मितेन सत्त्वञ्च दधार। अनेनास्य बालकस्य केशपाशः तम इव नीलवर्णः, अधरः रज इव रक्तवर्णः, हासः सत्त्वमिव धवलवर्ण अभूदिति भावः

తా॥ ఆ బాలుడైన తారకుడు లోకవిడంబనమునకై గుణవిహీనుడయినను, కేశముచే తమోగుణమును, పెదవులచే రజోగుణమును చిరునవ్వుచే సత్త్వగుణమును ధరించెను. అనగా నాతని జుట్టు వంకరలు తిరిగి దట్టముగ నున్నగ నల్లగనుండెను. పెదవులు ఎఱ్ఱగాను, నవ్వు తెల్లగాను నుండెనని భావము.

In Public domain. Digitization Muthulakshmi Research Academy

The boy who was born to redeem the world, represented *tamoguna* through his dark hair, *rajoguna* through his bright lips and *sattvaguna* through his pleasant smile; he was beyond the three *gunas*, though.

५१. स्यात्स्वापनिघ्नस्सकलश्चराणां प्रायो बुभुक्षा परतन्त्रजीवः ।
असोषुपिष्टेत्युरसि स्वमातुरसावतन्द्रोऽपि पयांसि पीत्वा ॥

व्या :- स्यादिति :- चरन्तीति चराः जङ्गमाः प्राणिनः, तेषां सकलः सर्वः, सर्वप्राणिसमूह इत्यर्थः। प्रायः बहुशः, बुभुक्षायाः अशनायाः परतन्त्रः अधीनः जीवः जीवनं यस्य सः, स्वापनिघ्नः निद्राधीनः, स्यात् भवेत्, ''अधीनो निघ्न आयत्त'' इत्यमरः, इति इत्थं बोधयन्निव असौ बालः, अतन्द्रोऽपि निद्राविरहितोऽपि, ''तन्द्री निद्राप्रमीलयो'' रित्यमरः, तन्द्री तन्द्रा समानार्थके इति शेषः। पयांसि क्षीरं स्तन्यमित्यर्थः, पीत्वा निपीय, स्वमातुः स्वजनन्याः, उरसि वक्षसि, असोषुपिष्ट अशेत। स्वप् धातोर्यङन्ताल्लुङ्।

सर्वेऽपि जङ्गमाः प्राणिनः क्षुत्परतन्त्रा निद्राधीनाश्च भवेयुरिति सत्यं बोधयन्निव असौ बालकः मातुस्स्तन्यं पीत्वा तस्या एवोरसि सुष्वापेति भावः

తా॥ ఆ బాలుడు తల్లిపాలు కడుపార త్రాగి ఆమె రొమ్ముపైనే నిద్రించుచు లోకములో తరచుగ సర్వప్రాణిజాతము ఆకలి దప్పికలకు లోనగును సుమా ! అను సత్యమును బోధించుచున్నట్లుండెను.

All creatures are slaves to the two basic needs-hunger and thirst. As though to stress this fact, the child would cling to the mother's bosom and sleep blissfully after sucking milk to his content.

५२. आयाहि पुत्रेति यदा स्वपित्राहूतस्तदाऽसौ करतालकर्त्रा ।
अजङ्गमिष्टास्थिरनूपुराङ्घ्रिद्वयस्स्मितास्यः पितुरङ्कदेशम् ॥

व्या :- आयाहीति :- कराभ्यां करतलाभ्यां तालस्य कालक्रियामानस्य

In Public domain. Digitization Muthulakshmi Research Academy

शब्दस्य कर्ता तेन, ''तालः कालक्रियामान'' मित्यमरः। स्वपित्रा स्वजनकेन, यदा यस्मिन्काले। पुत्र ! कुमार ! आयाहि आगच्छ, इति इत्थम् आहूतः आकारितः तदा तदानीम्, असौ तारकः स्मितास्यः हासालङ्कृतमुखमण्डलस्सन्, अस्थिरे चलिते नूपुरे मञ्जीरे यस्मिन् तत् अङ्घ्रिद्वयं पादयुगलं यस्य सः, पितुः जनकस्य, अङ्कदेशम् ऊरुदेशम् अजङ्गमिष्ट अगात् - आरुरोहेत्यर्थः, गम्लृ गताविति धातोर्यङन्ताल्लुङ्।

हे पुत्र ! इत आयाहीति करतलद्वयेन शब्दं कुर्वन् स्वपिता यदा तमाहूतवान् तदा स तारकः स्मयमानः शिञ्जितनूपुरद्वयस्सन् स्वपितुरङ्कमारुरोहेति भावः।

తా॥ ఓ కుమారా! ఇటు రమ్మని, తన తండ్రి చేతులతో చిటికలు వ్రేయుచు చప్పట్లు చరచుచు, తన్ను బిలువగనే యాతారకుడు నవ్వుచు కాలి గజ్జెలు చప్పుడు చేయుచుండ నేగి తన తండ్రి తొడపై గూర్చుండెను.

At his father's snap of fingers and claps the boy rushed to him with anklets jingling to sit on his lap.

५३. इतस्ततस्सुन्दरलोलदृष्टिरव्यक्तमुग्धामृतकण्ठनादः ।
जम्बालसं लग्नमनोहराङ्गो द्विहायनो बाल्यमदादधिष्ट ॥

व्या :- इतस्तत इति :- इतस्ततः परितः सुन्दरा मनोहरा लोला चपला दृष्टिः यस्य सः अव्यक्तः अस्पष्टः मुग्धः सुन्दरः अमृतमिव मधुरः कण्ठनादः कण्ठस्वरः यस्य सः, जम्बालेन पङ्केन ''जम्बालः पङ्कोऽस्त्री शादकर्दमौ'' इत्यमरः। संलग्नं संलिप्तं मनोहर सुन्दरम् अङ्गं यस्य सः, द्विहायनः वत्सरद्वयपरिमितवयाः, स तारकः, बाल्यं बालत्वं चापल्यमित्यर्थः। अदादधिष्ट अधितष्ठौ, दध् धातोर्यङन्ताल्लुङ्।

తా॥ ఇటు నటు నందముగ జూచుచు, నవ్యక్త మధురముగ జూచుచు, ధూళిధూసరిత సున్దరగాత్రుడై రెండు వత్సరములీడుగల యా బాలుడు చిలిపిచేష్టల వాడాయెను.

Looking here and there, with a mellifluous voice, smearing dust on his body the beautiful two-year-old toddler turned to be naughty.

In Public domain. Digitization Muthulakshmi Research Academy

**५४. भूत्वा यथेच्छं प्रकृतेरधीनो नानाविधा ऐहिकमूढचेष्टाः ।
सन्तत्य दिव्यस्थितिमात्मनस्सोऽहासीद्विलासाय सदाचलोऽपि ॥**

व्या :- भूत्वेति :- सः तारकः सदा नित्यम्, अचलोऽपि चलनादि लक्षणरहितोऽपि यथेच्छं स्वेच्छया, प्रकृतेः मूलप्रकृतिरूपमायाशक्तेः, अधीनो भूत्वा वशवर्ती सन्, नानाविधाः बहुप्रकाराः ऐहिकाः इहलोकसम्बन्धिनीः मूढाः मुग्धाः चेष्टाः क्रियाः, सन्तत्य विस्तार्य, आरभ्येत्यर्थः। आत्मनः स्वस्य, दिव्यस्थितिं देवतानुभावम्, अहासीत् तत्याज ओहाक् त्यागे इति धातोर्लुङ्।

తా॥ ఆ తారకుడు చలనాది లక్షణములులేని ఆత్మరూపుడయినను ప్రకృతికి లొంగినవాడై బహువిధములు నైహికములునగు మూఢచేష్టలను గావించుచు తన దివ్యత్వమును మరచి తిరుగుచుండెను.

Taraka, though is the infinite immobile atman, appeared to have yielded to the nature and oblivious of his divinity moved like an earthly being.

**५५. कुमारकस्सम्यचिचत्स्वरूपं दृशौ प्रगल्भोऽतितिरायदस्य ।
सदाससदध्रायदसौ सगर्भ्यानशिश्रयत्स्वीयकुलं महिम्ना ॥**

व्या :- कुमारक इति :- कुमारकः बालतारकः स्वरूपं स्वाकारं, सम्यचिचत् सम्यक् पुष्टमकरोत्। वर्धयामासेत्यर्थः, अस्य कुमारस्य, दृशौ नेत्रद्वयं, प्रगल्भः प्रागल्भ्यम् अतितिरायत् खेलयामास असौ कुमारः सगर्भ्यान् सोदरान्, सदा सर्वदा, अससध्रायत् अनुसृत्यागच्छत्। महिम्ना स्वप्रभावेण स्वीयकुलं, अशिश्रियत् शोभायुक्त मकार्षीत्, समीचि - अत्यस्माल्लुङ् अचिचित्। तिरायि इत्यस्माल्लुङ् अतितिरायत्। सध्रायि - इत्यस्माल्लुङ् अससध्रायत् श्रायि - इत्यस्माल्लुङ् अशिश्रयत्।

తా॥ ఆ తారకుడు తన రూపమును చక్కగ వృద్ధినందునట్లు గావించెను. వాని నేత్రములు ప్రాగల్భ్యమును ప్రౌఢతను జూపుచుండెను. అతడు తన సోదరుల ననుసరించి తిరుగుచుండెను. అతడు తన మహిమచే తన కులమంతయు శ్రీమంతమగునట్లు గావించెను.

In Public domain. Digitization Muthulakshmi Research Academy

Taraka turned more and more beautiful day by day. With his eyes steady, focused and confident he would follow his older brothers. And by his grace the family started flourishing in every aspect.

५६. नखाग्रवज्रैरलकेन्द्रनीलैरोष्ठप्रवालेन सदन्ततारैः ।
पत्पञ्चशाखानननेत्रपद्मात्येवाचकासीन्मणिपुष्पराशिः ।

व्या :- नखाग्रेति :- सः कुमारः नखाग्राणि एव वज्राणि तैः, अलकाः कुन्तला एव इन्द्रनीलाः इन्द्रनीलमणयः तैः, ओष्ठः रदनच्छद एव प्रवालः तेन, दन्ता एव ताराः मौक्तिकानि तैः, पद् पादौ, पञ्चशाखाकरौ, आननं मुखं नेत्रनयने एव पद्मानि, तेषाम् आल्या पङ्क्त्या, मणिपुष्पराशिरिव मणीनां रत्नानां पुष्पाणां कुसुमानां च राशिरिव समूह इव, अचकासीत् अराजत। चकासृदीप्ताविति धातोर्लुङ्। उपमालङ्कारः।

తా॥ ఆ కుమారుని గోళ్ళకొనలు వజ్రమణులవలె తెల్లగనుండెను. ముంగురులింద్రనీలమణులవలె నల్లగనుండెను. పెదవులు పగడములవలె ఎఱ్ఱగ నుండెను. దంతములు ముత్యములవలె తెల్లగనుండెను. మరియు, పాదములు అరచేతులు కన్నులు ముఖము తామరపువ్వుల పంక్తివలె నుండెను. అందుచే నాతారకుడు రత్నములు, పుష్పములు కలిపి పోతపోసినట్లుండెను. ఈ యౌపమ్య మెంతయో మనోహరము.

The boy's nails were as bright as diamonds and precious stones, the curly hair resting on the forehead resembled dark blue sapphires, the lips had the bright red color of corals and the sparkling teeth line was like orderly arranged row of pearls. The palms and the feet were like lined up pink lotuses. It was an eyeful beauty of tender flowers and gorgeous precious stones.

५७. उरूदकुम्भं सहसा घ्नन्तं नैवेद्यमन्नं झटिति ग्रसन्तम् ।
तमर्चितं विग्रहमुत्क्षिपन्तमक्षंस्त माता तनयं समीक्ष्य ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- उर्विति :- उरु बृहत् यत् उदकुम्भं जलभाण्डम् उदकशब्दस्य उदादेशः, सहसा शीघ्रं द्दणन्तं दारयन्तं, नैवेद्यं निवेदितं देवताभ्यः अर्पितम् अन्नं पायसादिकं, झटिति शीघ्रं, ग्रसन्तम् अदन्तम्, अर्चितं पूजितं विग्रहं देवताप्रतिमाम्, उत्क्षिपन्तम् ऊर्ध्वं विक्षिपन्तं, तं तनयं कुमारं, समीक्ष्य दृष्ट्वा, माता तस्य जननी अक्षंस्त क्षमते स्म। क्षमूष् सहने इति धातोर्लुङ्।

स कुमारः बाल्य एव बृहन्तं जलपूर्णं कलशम् उद्ददार। देवतानिवेदितमन्नं झटिति अग्रसत्। पूजितां देवताप्रतिमाम् ऊर्ध्वं चिक्षेप। बाल्यचापलेन कृतान्येवं विधानि कुमारचेष्टितानि पश्यन्त्यपि माता नाकुप्यत्। किन्तु सहते स्म।

తా॥ ఆ తారకుడు బాల్యమందే పెద్ద పెద్ద నీటికడవలను పగులగొట్టుచుండెను. నైవేద్య వస్తువులను మ్రింగుచుండెను. పూజింపబడిన దేవతా విగ్రహములను మీదకు విసరుచుండెను. ఇన్ని పాడుపనులను జేయుచున్నను, వానితల్లి వానినిజూచి, కోపింపక క్షమించుచుండెను.

The boy used to break big earthen pots, eat up food yet to be offered to gods, throw away idols of worship. Yet the mother was never angry at these mishaps and forgave his mischievous acts.

५८. अमम्रदत्स्वीयमनस्सुमादप्यपप्रथत्सत्त्वगुणं पयोधेः ।
अचक्रशन्नैजतमस्स शून्या ददद्रढद्धैर्यमदप्रकाण्डात् ।

व्या :- अमम्रददिति :- सः तारकः स्वीयं मनः स्वकीयं स्वान्तं सुमादपि पुष्पादपि, अमम्रदत् मृदुत्वमनैषीत्। सत्त्वगुणं गाम्भीर्यं, पयोधेरपि समुद्रादपि, अपप्रथत् विस्तारमनैषीत्। नैजं स्वीयं, तमः तमोगुणम्, अज्ञानमित्यर्थः, शून्यादपि आकाशादपि, अचक्रशत् क्रशिमानं कृशत्वम् अनयत्, धैर्यं धीरताम्, अगप्रकाण्डादपि पर्वतश्रेष्ठादपि कुलगिरेरपीत्यर्थः। अदद्रढत् द्रढिमानं दृढत्वम् अनयत्। ''प्रातिपदिकाद्धात्वर्थे बहुलमिष्टवच्च'' इति गणसूत्रेण मृद्वादिशब्देभ्यः णिच्, अमम्रदित्यादीनि ण्यन्तानां म्रदि - प्रथि, क्रशि, द्रढि, धातूनां लुङ् रूपाणि।

In Public domain. Digitization Muthulakshmi Research Academy

तस्य तारकस्य मनः पुष्पादपि मृदुत्वमयासीत्। गाम्भीर्यं समुद्रादपि पृथुतरमभूत्। अज्ञानं शून्यादपि शून्यमासीत्, ध्यैर्यं कुलपर्वतादपि दार्ढ्यमवाप, स तारकः मनोमार्दवे कुसुमं, गाम्भीर्ये जलधिं, अज्ञाने गगनं, धैर्ये कुलगिरिं चातिचक्राम।

తా॥ ఆ తారకుడు హృదయ మార్దవములో బువ్వును, మనోగాంభీర్యములో సముద్రమును అజ్ఞానములో నాకాశమును, ధైర్యములో గుల పర్వతమును మించెను.

His heart was tender than a flower, his mind deeper than an ocean, ignorance like the void sky and his confidence taller than *Kula* mountain.

मालिनीवृत्तम्

५९. नवरसरुचिवेदी सर्वभूतानुवादी ललितचरणचारी साध्वलङ्कारधारी।
परवशसुखयोगश्चित्रसङ्कल्पभोगः कविरिव स कुमारः प्रस्तुतोऽभूदुदारः॥

इति ब्रह्मश्री श्रीमदज्ञाडादिभट्टनारायणदासमहाकविविरचिते तारकाख्ये महाकाव्ये

प्रथमस्सर्गः

व्या :- नवरसेति :- उदारः महान्, "उदारो दातृमहतो"रित्यमरः, स कुमारः तारकः, कविरिव कवीश्वर इव नवानां नूतनानां रसानां कट्वाम्ललवणमधुरादीनां, रुचिः स्वादुता, तस्याः वेदिता वेत्ता, कविपक्षे, नवानां नवसङ्ख्यानां रसानां वीरशृङ्गारकरुणादीनां रुचिः आसक्तिः तस्याः वेदी ज्ञाता सर्वाणि भूतानि प्राणिनः, तान्यनुसृत्य वदत्युच्चरतीति सर्वभूतानुवादी सर्वभूतानुकरणसमर्थ इत्यर्थः। कविपक्षे, सर्वभूतानाम् अनुवादे वर्णने समर्थः, ललिताभ्यां सुन्दराभ्यां पादाभ्यां चरणाभ्यां चरतीति ललितचरणचारी, कविपक्षे, ललितैः मनोहरैः चरणैः पद्यपादैः चरति रचयतीति, ललितपादपद्यनिर्माणचतुर इत्यर्थः। साधून् उचितान् अलङ्कारान् आभरणविशेषान् धरतीति धारी, बाल्योचिताभरणालङ्कृत इत्यर्थः। कविपक्षे, उपमोत्प्रेक्षादिमधुरालङ्कारविन्यासनिपुण इत्यर्थः। परवशः अन्याधीनः सुखयोगस्सुखसङ्गः

In Public domain. Digitization Muthulakshmi Research Academy

यस्य सः, पराधीन स्वसुख इत्यर्थः। कविपक्षे, परवशं यस्सुखं तेन युक्तः, पारवश्योत्पादकरसानन्ददायीत्यर्थः, चित्रास्सङ्कल्पाः मनोरथाः तेषां भोगः अनुभवः यस्य सः, सङ्कल्पानुगुणभोगवानित्यर्थः, कविपक्षे, चित्रविचित्रकल्पनाविस्तृतिवानित्यर्थः। प्रस्तुतः प्रणुतः अभूत् आसीत्।

श्लेषगर्भितोपमालङ्कारः

मालिनीवृत्तलक्षणम् ।

''ननमयययुतेयं मालिनी भोगिलोकैः''

ननमययाः गणाः अष्टसु सप्तसु यतिः ।

తా॥ కవీంద్రుడు వీరశృంగారాది రసములను గుర్తించుచు, సర్వ వస్తువులను వర్ణించుచు జక్కని వృత్తములను నిర్మించుచు, ఉపమాద్యలంకారముల నుపయోగించుచు, నితరులు రసాస్వాదముగావించు రీతుల చిత్రవిచిత్ర కల్పనలతో గావ్యమును రచించును. అట్లే యీ తారకుడును కొంగ్రొత్త రుచుల నెఱుగుచుండెను. తనకు గనబడిన వారెట్లు పలుకుచుండిరో అట్లే పలుకుచుండెను. బాల్యమునకు తగిన మురుగులు గజ్జెలు మున్నగు నాభరణములతో నొప్పుచుండెను. చిత్రవిచిత్రములైన కోరికలుగలిగి వాని ననుభవించుచుండెను. కావున నా బాలతారకుడు బాలకవివలె నుండెను.

A great poet brings into his work all the emotions, gives a picturesque description of things using beautiful similes and metaphors and dishes out his work to readers to relish. Similarly *Taraka* tried his hand at various things, imitated the talk of those around him, wore ornaments like anklets etc. and fancied at various things to have a taste of all experiences.

इति ब्राह्मीभूषणब्रह्मश्री राम्भट्ललक्ष्मीनारायणशास्त्रिविरचितायां भावार्थदीपिकाख्यायां व्याख्यायां प्रथमस्सर्गः ।।

In Public domain. Digitization Muthulakshmi Research Academy

तारके द्वितीयस्सर्गः

लङधिकारः

मालिनी

१. **तदुपनयनकर्माऽथाकरोत्तस्य तातः सकलनिगमधर्मस्थापनायाऽनवद्यम्।**
परवशमुरुकष्टं देव आयुर्नराणां न पृथुक इति भिक्षापात्रमीशोऽप्यधत्त॥

व्या :- तदुपनयनेति :- अथ बाल्यानन्तरं, तस्य तारकस्य तातः पिता, ''तातस्तु जनकः पिता'' इत्यमरः। तत् प्रसिद्धम्, अनवद्यं पूज्यम् उपनयनकर्म उपनयनसंस्कारं, सकलनिगमेषु सर्ववेदेषु ये धर्माः तेषां स्थापनाय, अनुष्ठानाय, वेदविहितसकलकर्माचरणार्थमित्यर्थः, अकरोत् चकार, डुकृञ् करणे इति धातोर्लङ्। देव! हे परमेश्वर ! नराणां मानवानाम्, आयुः जीवितं, परवशं पराधीनम्, उरूणि बृहन्ति कष्टानि दुःखानि यस्मिंस्तत् उरुकष्टं कष्टभूयिष्ठमित्यर्थः, इति इत्थं ज्ञापयन्निव, सः पृथुकः बालकः, ''पृथुकश्शाबकश्शिशुः'' इत्यमरः, ईशोऽपि देवोऽपि सन्, भिक्षापात्रम् अधत्त दधार। डुधाञ् धारणपोषणयोरिति धातोर्लङ्, निदर्शनालङ्कार भेदः।

बाल्यानन्तरं महेश्वरपण्डितः स्वकुमारस्य तारकस्य सकलवेदकर्मानुष्ठानार्थम् उपनयनसंस्कारं चकार। सोऽपि तारकः देवोऽपि मानवजीवितं दुःखभूयिष्ठमिति सर्वेषां बोधयन्निव भिक्षापात्रमग्रहीत्।

मालिनीवृत्तम्। लक्षणन्तूक्तम्। सर्गेऽस्मिन् सर्वाण्यपि मालिनीवृत्तान्येव, अन्तेऽनुष्टुबुपनिबद्धा।

తా॥ బాల్యము దాటగానే యా తారకునకు దనతండ్రియయిన మహేశ్వరుడు, సకలవేద విహితకర్మములనాచరించుటకై యుపనయన సంస్కారమును గావించెను. దేవుడయ్యు నా తారకుడు, మానవ జీవితమంతయు గష్టభూయిష్ఠమని బోధించునట్లు భిక్షాపాత్రమును ధరించెను.

In Public domain. Digitization Muthulakshmi Research Academy

The young *Taraka's* Upanayana ceremony was performed religiously by his father *Maheswara*. Though he was god's incarnation, *Taraka* embraced an ordinary *brahmachary*'s life and took a begging bowl in his hand to show the world that the life is full of difficulties.

२. करयुगल उदग्रं पर्णदण्डं वलग्रे
स्फुरदभिनवमौञ्जीबन्धनं ब्रह्मसूत्रम् ।
हृदि शिरसि शिखानां पञ्चकं दर्शनीयं
वटुरभरत कट्यां पीतकौपीन मेषः ॥

व्या :- करयुगल इति :- एष वटुः असौ ब्रह्मचारी तारकः, करयुगले हस्तद्वये उदग्रम् उन्नतं पर्णदण्डं पालाशदण्डं ''पलालः किंशुकः पर्णो वातपोथ'' इत्यमरः। वलग्रे मध्ये ''मध्यमं चावलग्रञ्च मध्यः'' इत्यमरः। ''वष्टिभागुरि-रल्लोपमवाप्योरुपसर्गयोरिति'' भागुरिमतेन अकारलोपे वलग्र इति रूपम्। स्फुरत् प्रकाशमानम् अभिनवं नूतनं यत् मौञ्ज्याः तृणविशेषस्य बन्धनं, मौञ्जीरज्जुबन्धमित्यर्थः, हृदि वक्षसि, ब्रह्मसूत्रं यज्ञोपवीतं, शिरसि मूर्धनि, दर्शनीयं रमणीयं शिखानां पञ्चकं पञ्चशिखाः। कट्यां जघने पीतं हरिद्राङ्कितं कौपीनं चीरखण्डं, गुह्याच्छादकवस्त्रखण्ड-मित्यर्थः। अभरत बभार, भृञ् भरणे इति धातोर्लङ्।

करतलद्वयेन पालाशदण्डं मध्यदेशे मौञ्जीबन्धं वक्षसि ब्रह्मसूत्रं शिरसि शिखापञ्चकं कट्यां पीतकौपीनञ्च धृत्वा स वटुस्तारकः रराजेति भावः।

తా॥ ఆ తారకుడుపనీతుడై చేత మోదుగుదండమును ధరించి, ముంజిగడ్డితో జేసిన త్రాటిని మొలకు జుట్టి వక్షమున జందెమొప్పుచుండ పంచశిఖలు తలపై ప్రకాశింప పసుపుపచ్చని గోచిని గట్టుగొని మిక్కిలి చక్కగనుండెను. బ్రాహ్మణ బ్రహ్మచారి స్వరూపమిందు వర్ణింపబడెను.

With the *palash* stalk in hand, the girdle made of *munja*, the sacred thread on his chest, five patches of hair on his

In Public domain. Digitization Muthulakshmi Research Academy

head, a *Kaupina* a small piece of cloth worn to cover the private parts, on being initiated as a *brahmachary,* was beautiful to behold.

३. निजगुरुपदभक्तं सर्वविद्यानुरक्तं सकलसुजनमित्रं मञ्जुलंश्वेतगात्रम् ।
अतुलितकुलदीपं वीक्ष्य विद्वत्कलापं मुदमवहदमन्दं प्रत्यहं बन्धुबृन्दम् ।।

व्या :- निजेति :- निजगुरोः स्वीयाचार्यस्य, पदयोः पादयोः, भक्तं भक्तियुक्तं, गुरुभक्तमित्यर्थः। सर्वासु सकलासु, विद्यासु, अनुरक्तम् आसक्तं, सकलविद्यासङ्ग्रहणाभिलाषिणमित्यर्थः। सकलानां सर्वेषां सुजनानां सज्जनानां मित्रं वयस्यं, सज्जनमित्रमित्यर्थः। मञ्जुलं मनोहरं श्वेतं धवलं गात्रं शरीरं यस्य तं, सुन्दरधवलदेहमित्यर्थः, अतुलितः अनुपमः कुलस्य दीपः तं, स्वकुलप्रकाशकमित्यथः। विदुषां सूरीणां कलापं भूषणं, विद्वदाभरणमित्यर्थः, तं तारकं, वीक्ष्य आलोक्य, बन्धुबृन्दं बन्धुसमूहः, अहन्यहनि प्रतिदिनम्, अमन्दम् अधिकं यथातथा, मुदं प्रीतिम् अवहत् उवाह, वह धारणे इति धातोर्लङ्।

తా॥ ఆ తారకుడు భక్తితో గురుపాదపద్మముల నారాధించుచుండెను. విద్యలనన్నింటిని నేర్వవలెనని కుతూహలపడుచుండెను. సజ్జనులతో మైత్రి సంపాదించుచుండెను. అతని దేహము ధవళచ్ఛాయతో మిలమిల మెఱయుచుండెను. వంశదీపమై విద్వదాభరణమైయున్న యా తారకుగాంచి బంధుబృందము నిత్యము మిక్కిలియానందించుచుండెను.

Taraka would worship the feet of his guru devotedly, had all the enthusiasm to learn everything and befriended all good natured people. His body's luster resembled the radiance of gold. Wearing wisdom and knowledge as ornaments, being a personification of knowledge and being the brightest successor in the family, *Taraka* with his birth brought immense joy to his family.

In Public domain. Digitization Muthulakshmi Research Academy

४. अपि परमरहस्यं ज्ञानवित्तं गुरुभ्योऽद्भुतकरबहुमेधानैपुणेनोपलभ्य ।
मृदुलमधुररीत्याऽतोषयत्पण्डितौघं विनयमलभताऽसौ स्वीयविद्यानुकूलम् ॥

व्या :- अपीति :- असौ तारकः, अद्भुतकरम् आश्चर्यकरं, बहु अधिकं मेधायाः बुद्धेः नैपुणं कौशलं, तेन ''धीर्धारणावती मेधेत्य'' मरः। आश्चर्यकरस्वबुद्धि-कौशलेनेत्यर्थः। परमरहस्यमपि अति गुह्यमपि, ज्ञानवित्तं ज्ञानधनं, गुरुभ्यः उपाध्यायेभ्यः, उपलभ्य प्राप्य, मृदुला मृद्वी मधुरा या रीतिः पद्धतिः तया, पण्डितानां विदुषाम्, ओघं सङ्घम् अतोषयत् अप्रीणयत्। तुष् प्रीतौ इति धातोर्लङ्। स्वीयविद्यानुकूलं स्वसम्पादितविद्याविशेषानुरूपं विनयं संस्कारं कार्याकार्यविवेक-ज्ञानमित्यर्थः। अलभत लेभे। डुलभष् प्राप्ताविति धातोर्लङ्।

विद्याधनं विदुषां हृदयेष्वेव गुप्ततया निक्षिप्तम्। तद्ग्रहणमति दुर्लभम्। तथाप्यसौ तारकः गुरून्प्रीणयित्वा स्वबुद्धिकौशलेन तेभ्यस्तत्सर्वं जग्राह, तद्विद्यामहिम्ना पण्डितानतोषयत्, विद्यानुरूपं विवेकादिकमपि सम्पादयामास, स तारको विद्वान्भूत्वा पण्डितान् रञ्जयन् विनयेन सञ्चचार।

తా॥ విజ్ఞానము ధనమువంటిది. ఆ ధనము విద్వాంసుల హృదయములందతి గూఢముగనుండును. దాని నార్జించుట మిక్కిలి దుర్లభము. ఈ తారకుడు తన బుద్ధి చాతుర్యముచే గురువులను మెప్పించి వారి నుండి యా జ్ఞానధనమునంతయు నార్జించెను. స్వవిద్యాశక్తిచే పండితులను మెప్పించెను. విద్యానుకూలమగు వివేకముతో మెలగుచుండెను.

Knowledge is an invaluable treasure. And it is very tough to procure this kind of wealth as it is found only in an erudite person. *Taraka* with his humility and prudence impressed his gurus and acquired this wealth from them. Learned scholars were mightily impressed with his self acquired knowledge.

In Public domain. Digitization Muthulakshmi Research Academy

५. **अतुलललितरूपस्सर्ववेदः प्रशान्तः सकलजनसमानस्सर्वतन्त्रस्स्वतन्त्रः।**
विजितसमवयस्को विद्यया सद्यशस्कोऽभ्यलषत परदेशालोकनं तत्कुमारः ॥

व्या :- अतुलेति :- न विद्यते तुला यस्य तदतुलं साद्दश्यरहितं ललितं सुन्दरं रूपम् आकारो यस्य सः, सर्वान्वेदानधीते यः सर्ववेदः। प्रशान्त शान्तस्वभावः, सकलजनानां सर्वेषां मानवानां समानः समः, सर्वसम इत्यर्थः, सर्वाणि तन्त्राणि शास्त्राणि यस्य सः सर्वतन्त्रः, स्वतन्त्रः स्वच्छन्दः, विद्यया विजिताः पराजिताः समवयसः येन सः सत् उत्तमं यशः यस्य सः सद्यशस्कः। स चासौ कुमारः तत्कुमारः, तारकः, परदेशालोकनं परदेशान् द्रष्टुम् अभ्यलषत ऐच्छत्।

सुन्दररूपमुपेत्य, सर्वशास्त्राण्यभ्यस्य, शान्तस्वभावं सम्पाद्य सर्वमानव-सौभ्रात्रमाकलय्य, विद्याविशेषैस्समानवयसो विजित्य, कीर्तिमुत्तमामुपार्ज्य, स्वतन्त्रभावोपेतस्स तारकः परदेशान् द्रष्टुमभिललाष।

తా॥ ఆ తారకుడు మంచి యందగాడయ్యెను. శాంతస్వభావుడై సమబుద్ధితో సర్వజనులను జూచుచుండెను. ఆతనికి దెలియని శాస్త్రములులేవు. ఆతడు మిక్కిలి స్వతంత్రుడు. తన సహాధ్యాయులను సమవయస్కులను విద్యా విశేషములచే నోడించి, మంచి కీర్తినార్జించెను. ఇట్టి తారకునకొకనాడు పరదేశములకేగవలెనను కోరిక జనించెను.

Taraka was a handsome young boy now. He was peaceful and moved with everyone without any discrimination. Had all the scriptures at his finger tips, excelled and outdid his peers and thus was lauded by one and all. Now he was keen on exploring the new places and kingdoms.

६. **सहजवशमुपेतो लीलया गूढतेजा अशनवसनसक्तो बाल्यचापल्ययुक्तः।**
तत इत इव देवो बालकोऽजोऽपि गच्छ न्विबुधनगरनाम प्राविशत्पत्तनं सः ॥

व्या :- सहजेति :- अजः जन्मरहितः, गूढं गुप्तं तेजः यस्य सः गूढतेजाः, निगूढप्रभावः, सः बालकः, तारकः, देवोऽपि देवताऽपि, सह जातः सहजः यः

In Public domain. Digitization Muthulakshmi Research Academy

स्वभावः तस्य वशम् अधीनतामुपेतः, प्रकृतिवशवर्ती, अशने भोजने, वसने वस्त्रधारणे च सक्तः आसक्तः, बाल्यचापल्येन बाल्यदशा साधारणचपलबुद्ध्या, युक्तः संयुतः, लीलया विलासेन, इतः ततः परितः, गच्छन् परिभ्रमन्, विबुधनगरनाम विबुधनगरमिति नाम नामधेयं यस्य तत्, पत्तनं पुरं प्राविशत् प्रविवेश, प्रपूर्वक विश प्रवेशने इति धातोर्लङ्।

गूढतेजस्कः जननरहितः स तारकः देवतारूपोऽपि प्रकृतिवशमापन्नः स्वेच्छया इतस्ततः परिभ्रमन् कदाचित् विबुधनगरमिति नाम्ना प्रसिद्धं पत्तनं प्रविवेश।

తా॥ ఆ తారకుడు గుప్తతేజస్కుడు, జనన మరణాది శూన్యుడునగు దేవుడే యయినను ప్రకృతికి లొంగినవాడై బాల్యచాపల్యమున వేషధారణమందు, భోజన విశేషములందు నాసక్తుడై, స్వేచ్ఛగ నిటునటు దిరుగుచు నొకనాడు విబుధనగరమను పేరుగల పట్టణమును బ్రవేశించెను.

Taraka with the radiance of the supreme hidden, though was beyond the cycle of birth and death, gave into childish temptations in dressing up and in mischievous behavior as well. While travelling freely, once he happened to enter a city by name *Vibudha*.

७. **मधुरवनपरीता स्वादुपानीयपूता सकलजनसमृद्धा गन्धवातप्रशस्ता ।**
पृथुलभवनरम्या साधुबृन्दानुगम्या व्यलसदुरुमदेभा सा पुरी दिव्यशोभा॥

व्या :- मधुरेति :- सा पुरी विबुधनगरी, मधुराणि प्रियाणि वनानि उद्यानानि तैः परीता व्याप्ता, स्वादु रुच्यं यत् पानीयं जलं तेन पूता पवित्रा, सकलानि नानाविधानि धनानि सम्पदः तैः समृद्धा सम्पूर्णा, गन्धवातः गन्धवहो वायुः तेन प्रशस्ता श्लाघ्या, पृथुलानि बृहन्ति यानि भवनानि मन्दिराणि, तैः रम्या सुन्दरा, साधुबृन्दैः सज्ञनसङ्घैः अनुगम्या अनुसृता अनुगन्तुं योग्या, उरवः उन्नताः मदेभाः मत्तमातङ्गाः यस्याः, सा, दिव्यशोभा दिव्यकान्तिस्सती, व्यलसत् अधिकं रराज। विपूर्वक लस श्लेषणक्रीडनयोः इति धातोर्लङ्।

In Public domain. Digitization Muthulakshmi Research Academy

तद्विबुधपुरे मनोहराण्युद्यानानि सर्वत्र दृश्यन्ते। तत्रस्थं जलं स्वादुतरं पवित्रं चासीत्। तन्नगरं सर्वसम्पत्परिपूर्णमभवत्। तत्र सुरभिः गन्धवहः प्रवाति, तत्र विशालानि भवनानि राजन्ते। साधुजनास्तत्र न्यवसन्, बहवो मत्तमातङ्गास्तत्र नित्यं सञ्चरन्ति। तस्मात्सा पुरी दिव्यशोभा बभूव।

తా॥ ఆ విబుధనగర మందెచ్చట జూచినను అందమైన ఉద్యానవనములు కనబడును. త్రాగుటకచ్చట తియ్యని జలమున్నది. అన్నివిధములైన సంపదలు నటగలవు. నిత్యమచ్చట కమ్మని గాలి వీచుచుండును. అందలి భవనములన్నియును విశాలములే. సత్పురుషులెందరో అచ్చట నివసించుచుండిరి. మత్తగజములందు నిత్యము తిరుగుచుండును. ఆ పురము దివ్యశోభతో కలకలలాడుచుండును.

The city had beautiful parks and gardens all around. It was a wealthy city with edifices, tall and spacious. Hefty elephants roamed on the streets. The water was sweet; the breeze was cool and the people were all decorous. The place was bright even on a normal day.

८. **ललितकुलसतीभिस्साधुशीलान्विताभिश्चतुरपुरुषवर्यैस्साधितामोघकार्यैः।**
अमलपृथुनिवासैस्सर्वसम्पद्विलासैर्नगरवरमराजत्कुम्भिनीभूषणं तत् ॥

व्या :- ललितेति :- कुम्भिन्याः पृथिव्याः ''गौरिला कुम्भिनी क्षमा'' इत्यमरः। भूषणम् आभरणं तत् नगरवरं विबुधनगरं, साधुशीलेन उत्तमस्वभावेन अन्विताभिः युक्ताभिः, ललिताभिः सुन्दरीभिः कुलसतीभिः कुलकान्ताभिः, साधितानि निर्वर्तितानि अमोघानि सफलानि कार्याणि यैः तैः, चतुराः निपुणाः ये पुरुषवर्याः पुरुषश्रेष्ठाः तैः, सर्वासां सम्पदां विलासाः येषु तैः, अमलानि निर्मलानि पृथूनि बृहन्ति निवासानि भवनानि तैः, सर्वसम्पदलङ्कृतविशालनिर्मलमन्दिरैरित्यर्थः, अराजत् रराज, राजृ दीप्ताविति धातोर्लङ्।

తా॥ ఆ నగరమందలి కులకాంతలందరును మంచి రూపవతులు, శీలవతులు, పతివ్రతలు, అందలి పురుష శ్రేష్ఠులందరును తమ పనులను వ్యర్థముగాకుండ నెరవేర్చు నిపుణులు, అందున్న భవనములన్నియును ధవళచ్ఛాయలతో సకలవిధ సంపదలతో నిండియున్నవి. ఆ నగరము భూమండలమునకు మండనమని చెప్పవచ్చును.

In Public domain. Digitization Muthulakshmi Research Academy

The women of the city were of high lineage, good-looking, and chaste. The men were highly skilled at their work, were productive as they managed their time efficiently and fruitfully and the city glittered like the crest jewel on the earth.

९. प्रतिहतकुवदानां गन्ध आत्मम्भरीणां खलचपलमुसल्यक्रूरकर्णेजपानाम्।
जडशठकृपणानामेडमूकाद्घराणां सकृदपि नहि तत्राऽसीन्निरस्तास्थिराणाम्॥

व्या :- प्रतिहतेति :- प्रतिहताः चलितमनस्काः "मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः" इत्यमरः। कुवदाः कुत्सितवादिनः, तेषां, "समौ कुवाद कुचरावित्यमरः, आत्मानमेव ये बिभ्रति ते आत्मम्भरयः, कुक्षिम्भरय इत्यर्थः। तेषां, "फलेग्रहिरात्मम्भरिश्च, इत्यनेन निपातः खलाः दुष्टाः, चपलाः चञ्चलशीलाः मुसल्याः मुसलेन वध्याः मुसल्यो मुसलेनयः" इत्यमरः। क्रूराः घातुकाः कर्णेजपाः पिशुनाः कर्णेजपस्सूचकस्स्यात्पिशुनः" इत्यमरः। तेषां जडाः मन्दाः शठाः गूढविप्रियकारिणः," गूढविप्रियकृच्छठः इत्यमरः, कृपणाः लुब्धाः तेषां एडमूकाः मूकबधिरलक्षणाः "अनेडमूकस्तु वक्तुं श्रोतुमशिक्षिते" इत्यमरः। अत्र नञ् सादृश्ये, अद्घराः अदनशीलाः "घस्मरोऽद्घरः" इत्यमरः तेषां, निरस्ताः निष्कासिताः, अस्थिराः चलचित्ताः, तेषाञ्च, तत्र नगरे सकृत् किञ्चित्, गन्धोऽपि, लेशोऽपि नहि आसीत् नाभूत्। 'गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः' इति नानार्थरत्नमाला।

తా॥ ఆ విబుధనగరమున, మనసు చెడినవారు, కుత్సితవాదములు చేయువారు, తమ పొట్టనింపుకొని ఇతరులను దలంపనివారు క్రూరులు, చపలచిత్తులు, రోకళ్ళచే దండింపదగినవారు, కఠినహృదయులు, చాడీలు చెప్పువారు, మందమతులు, మోసగాండ్రు, లుబ్ధులు, దీనులు, మూగచెముడు లక్షణములు గలవారు, తిండిపోతులు, దేశబహిష్కృతులు, అస్థిర హృదయులునగు మానవులు మచ్చునకైనను గానరారు.

None of the people who lived in *Vibudha* were insane, mean-minded, selfish, wicked, criminals worthy of punishments, insensitive, unsympathetic, slanderous,

In Public domain. Digitization Muthulakshmi Research Academy

cheating, miserly, dull-witted, unbalanced or illegal residents who required to be banished.

१०. सततशमितभावः प्राभवद्भूमिदेवः पृथुमहदनुरक्तं साधु मूर्धाभिषिक्तः ।
सकलविभवदृश्यः पत्तने वाऽपि वैश्यः परहितगुणभद्रः सर्वथा तत्र शूद्रः ॥

व्या :- सततमिति :- तत्र पत्तने तस्मिन्नगरे, भूमिदेवः भूसुरः, सततं नित्यं शमितः शान्तः भावः स्वभावो यस्य सः' सततशान्तशील इत्यर्थः। मूर्धाभिषिक्तः राज्यपालकः क्षत्रियोऽपि साधु सम्यक्, पृथौ अग्नौ महत्सु महात्मसु च अनुरक्तः, अनुरागवान् यागकरणशीलः महदाराधकश्चेत्यर्थः, वैश्यः आर्यः सकलविभवैः सर्वसम्पद्भिः दृश्यः दर्शनीयः, शूद्रो वा शूद्रोऽपि सर्वथा परहितैः परानुकूलैः गुणैः भ्रदः मङ्गलकरः शुभकरः, प्राभवत् अभूत् प्रपूर्वकभूधातोर्लङ्।

తా॥ ఆ నగరమున బ్రాహ్మణులు నిత్యము శాంతస్వభావులు. క్షత్రియులును యజ్ఞయాగాదికముల నాచరించుచు మహాత్ముల నారాధింతురు. వైశ్యులు సర్వసంపత్పరిపూర్ణులు, శూద్రులుకూడా పరహితములును మంగళదాయకములునగు గుణములు కలిగియుందురు.

People of all the four *varnas* followed their prescribed duties and did not swerve. The Brahmins were peaceful, *kshatriyas* would perform the sacrificial ceremonies and worshipped the pious and ascetics. *Vaishyas* were affluent and perfect in their trade and the *Shudras* were holy and worked for the welfare of others.

११. अनुपदमपि वर्णी कथ्यमानं स वृद्धै श्चरितमिति पुराणं यन्नगर्याः प्रबुध्य ।
चतुरमतिरपश्यन्मानवानां वितानं सकलकलुषनिघ्नं तत्पुरे कण्ठदघ्नम् ॥

व्या :- अनुपदमिति :- इति पूर्वोक्तरीत्या अनुपदं पदेपदे, वृद्धैः अतीतवयोभिः कथ्यमानं वाच्यमानं, पुराणं प्राचीनं यत् चरितं चरित्रं, तत्, प्रबुध्य अपि, ज्ञात्वापि, चतुरमतिः निपुणबुद्धिः, सः वर्णी ब्रह्मचारी तारकः, तत्पुरे तस्मिन्पत्तने,

In Public domain. Digitization Muthulakshmi Research Academy

मानवानां मनुष्याणां वितानं समूहं, 'पूगोवितानं प्रकरः'' इत्यमरः कण्ठदघ्नं गल परिमाणं यथातथा ''प्रमाणे द्वयसच् दघ्नच् मात्रचः'' इति मानार्थे दघ्नच् प्रत्ययः। सकलकलुषाणां सर्वदोषाणां निघ्नम् अधीनं, 'अधीनो निघ्न आयत्त' इत्यमरः, अपश्यत् ददर्श, दृशिर् प्रेक्षणे इति धातोर्लङ्।

वृद्धजनाः विबुधनगरप्राचीनचरित्रमतिविशिष्टमिति तस्मै तारकाय पदेपदे अबोधयन्, तथापि कुशलमतिस्स तारकः तन्नगरं परिशील्य इदानीमिदं नगरं कण्ठदघ्नं पापकर्माधीनमित्यजानात्। कण्ठदघ्नप्रयोगेन कुत्रचित् क्वचित् सच्चरितमप्यस्तीति सूचितम्।

తా॥ పూర్వోక్త విధముగ వృద్ధులా విబుధనగర చరిత మతిప్రశస్తమని వర్ణించి చెప్పిరి కాని, యాతారకుడు సూక్ష్మబుద్ధి కావున తన మతివైశద్యముచే తాను పరిశీలించి ఇప్పుడా సచ్చరిత్రములో మూడువంతుల ముప్పాతిక లోపించినట్లును, సర్వదోషములతో నిండినట్లును గ్రహించెను.

The picture of *Vibudha* was thus described by the old people to Taraka. However, it did not take long for clever *Taraka* to know that most of the claims were false and on keen observation found that there were many defects in them.

१२. परपरिहृतवित्तं सा यथातथ्यवृत्तं भुवनविदितशिष्टाचारदूरं समन्तात् ।
वपुरिव गतजीवं पत्तनं जीर्णपुण्यं निपुणतरमतिस्सोऽतर्कयद्विप्र इत्थम् ॥

व्या :- परेति :- निपुणतरा अत्यन्तकुशला मतिः बुद्धिः यस्य सः कुशाग्रबुद्धिरित्यर्थः, सः विप्रः ब्राह्मणस्स तारकः, परैः शत्रुभिः परिहृतम् अपहृतं वित्तं धनं यस्मात्तत्, परापहृतधनमित्यर्थः यथातथ्यं यथार्थं न भवतीति अयथातथ्यं, असत्यमित्यर्थः। तेन सह वर्तत इति। सा यथातथ्यं वृत्तं चरितं यस्मिन् तत्, असत्यचरितोपेतमित्यर्थः। ''यथार्थं तु यथातथम्'' इत्यमरः, समन्तात् सर्वत्र, शिष्टानां श्रेष्ठमानवानां यः आचारः नियमः तेन दूरं, शिष्टाचारविहितमित्यर्थः। गतजीवम् अपगतजीवं वपुरिव शरीरमिव, मृतमिवेत्यर्थः, जीर्णपुण्यं शिथिलित पुण्यकार्यं, पत्तनं विबुधनगरमुद्दिश्य, इत्थं वक्ष्यमाणरीत्या, अतर्कयत् तर्कयामास।

In Public domain. Digitization Muthulakshmi Research Academy

तद्विबुधनगरे स्थितं सर्वं धनं शत्रुभिरपहृतमभूत्। शिष्टाचारस्तत्र लुप्तप्राय आसीत्। पूर्ववर्णितं तत्सच्चरितम् असत्यमेव बभूव। जीवरहितं शरीरमिव तन्नगरं पुण्यविहीनमवर्तत, तादृशं नगरमालोक्य स तारक इत्थमचिन्तयत्।

తా॥ ఆ నగరమందలి సంపదనంతను శత్రువులపహరించిరి. శిష్టాచారములన్నియు నడుగంటినవి. వృద్ధులు చెప్పిన సల్లక్షణములేమియు నిటగానరావు. వారి మాటలసత్యములే యయినవి. మృతశరీరము వలె నీ నగరము పుణ్యవిహీనమై కనబడెను. అట్టి నగరమును గూర్చి యా తారకుడీ క్రిందివిధమున జింతించెను.

The city was looted of all its treasures by the enemies. Contrary to what had been said by the old people, the residents of the city have neither decorum nor any good manners. Devoid of luster, it looked like a dead body. *Taraka* started thinking about *Vibudha* thus-

१३. अनयदिह कुमार्गं धर्मशून्याधिकारी सकलजनसमूहं वृत्ततः क्षिप्तमद्य ।
अहमखिलनगर्यामाविलायामपश्यं निखिलमनिलमम्भोरोगमूलं प्रगाढम्॥

व्या :- अनयदिति :- इह अस्मिन्नगरे, अद्य इदानीं धर्मशून्यः अज्ञातधर्मः धर्मरहितः, अधिकारी धर्मव्यवहारद्रष्टा प्राड्विवाक इत्यर्थः। वृत्ततः स्वप्रवर्तनात् क्षिप्तं भ्रष्टं, सकलजनसमूहं सर्वमानवबृन्दं, कुमार्गं कुत्सितपथम् अनयत् निनाय, नी प्रापणे इति धातोर्लङ्। अहम् आविलायां कलुषितायाम् अखिलनगर्यां सर्वस्यां पुर्यां, निखिलं सर्वम्, अनिलं वायुम् अम्भः जलञ्च, प्रगाढं भृशं, रोगमूलं रोगकारणम् अपश्यम् ददर्श, दृशिर् वीक्षणे इति धातोर्लङ्।

తా॥ ఈ నగరమున నిప్పుడు, ధర్మమెఱుగని ధర్మములేని ధర్మాధికారి, సర్వప్రవర్తనాదులనుండి దిగజారిన మానవులను తప్పు మార్గమును బట్టించుచుండెను. పట్టణమందంతట నీరును గాలియు సర్వమును రోగముల కాలవాలమై పూర్తిగ జెడెను.

In this city, now, the administration, who knows nothing about dhrama is taking the people, who stooped, in the wrong direction.

In Public domain. Digitization Muthulakshmi Research Academy

**१४. अभिनववयसा प्रक्षीबितो न्यायकर्ता गुरुरुरुधनलुब्धोऽश्रद्धदानोऽस्य शिष्यः।
पिशुन इह गृहस्थोऽपत्रपाऽलक्ष्यत स्त्री नरपतिरविवेकी वञ्चकस्तस्य मन्त्री ॥**

व्या :- अभिनवेति :- इह अस्मिन्नगरे, न्यायकर्ता न्यायनिर्णेता, अभिनव वयसा, नूत्नयौवनेन प्रक्षीबितः अतिमत्तः, गुरुः अध्यापकः उरुधनलुब्धः अधिकधनलोलुपः अस्य शिष्यः तच्छात्रः, अश्रद्धधानः गुरौ विद्यायामपि श्रद्धाविहीनः श्रद्धाविरहितः गृहस्थः गेहे, पिशुनः सूचकः स्त्री कान्ता अपत्रपा निर्लज्ञा नरपतिः राजा, अविवेकः विवेकशून्यः, तस्य मन्त्री तदमात्यः, वञ्चकः धूर्तः च अलक्ष्यत अदृश्यत, लक्ष् दर्शने इति धातोर्लङ्।

తా॥ ఈ పట్టనమందలి న్యాయాధికారి మదమత్తుడైన యువకుడు. గురువు శిష్య విత్తాభిలాషి, శిష్యుడు శ్రద్ధావిహీనుడు. గృహస్థుడు కొండెగాడు. ఆడుది సిగ్గులేనిది. రాజు వివేకశూన్యుడు వాని మంత్రి మోసగాడు.

The magistrate is an alcoholic young man with no experience, a guru's interest in the disciple is only in his money and the disciple has neither focus nor determination. The married men are slanderous and women, shameless and licentious. The king is an ignorant fool and the minister a cheat.

**१५. नहि कुलगुणविद्याः प्राभवन्गौरवाय द्रविणबलकुतन्त्रासत्यवाक्यैर्विनेह।
अनवरतमसेवन्ताऽग्रजा वेदबाह्यान् स्वसुखमभिलषन्तः पौरुषं त्यक्तवन्तः ॥**

व्या :- नहीति :- इह अस्मिन्पत्तने, द्रविणं धनं, बलं शारीरकशक्तिः, कुतन्त्रं वञ्चनम् असत्यवाक्यम् अनृतं, तैर्विना तानि विहाय, कुलं वंशः, गुणः धर्मादिगुणः, विद्या च विज्ञानादिकञ्च, गौरवाय प्रतिष्ठायै, नहि प्राभवन् योग्या नाऽभवन् प्रपूर्वक भूसत्तायामिति धातोर्लङ्, अग्रजाः ब्राह्मणाः स्वसुखम्, अभिलषन्तः काङ्क्षन्तः, पौरुषं पुरुषयत्नं त्यक्तवन्तः त्यजन्तः, अनवरतं सन्ततं, वेदबाह्यान् वेदाधिकारशून्यान् शूद्रादीन्, असेवन्त अभजन्त, षेवृ सेवायामिति धातोर्लङ्।

In Public domain. Digitization Muthulakshmi Research Academy

अत्र धनवतां बलवतां कुतन्त्रपराणाम् असत्यवादिनामेव गौरवं, न तु कुलीनानां गुणवतां विदुषां च, किञ्चात्र विप्रास्स्वसुखाभिलाषिणः स्वोद्योगं विहाय शूद्रादीनभजन्त।

తా॥ ఈ పురమందు ధనమున్నవారికిని, బలమున్నవారికిని, వంచకులకును, అబద్ధములాడువారి గౌరవమర్యాదలుగాని, కులీనులకును గుణవంతులకును విద్వాంసులకును గౌరవమర్యాదలు లేవు. మరియు నిందలి బ్రాహ్మణులు ప్రయత్నములను విడిచి, తమ సుఖముగోరి వేదబాహ్యులను సేవించుచుండిరి.

This is a place for the rich, those who are physically strong, for cheats and liars. People of good families and good traits and scholars cannot live here respectfully. And the Brahmins here are servile to those who are non-believers of Vedas.

१६. अकुरुत कुलबाह्यः स्वैरिणीवञ्चको दुष्कृतरत मत उच्चैः पत्तने शून्यवादम्।
नटविटभटतीर्थध्वाङ्क्षकापालिकैः प्राणददवगतदेवागारमाचारहीनैः ॥

व्या :- अकुरुतेति :- पत्तने पुर्यां, स्वैरिणीनां जारिणीनां स्त्रीणां, वञ्चकः धूर्तः, दुष्कृतेषु दुष्टकार्येषु, रतः आसक्तः मतः सङ्कल्पो यस्य सः, कुलबाह्यः कुलबहिष्कृतः, मानवः, शून्यवादं देवो नास्ति धर्माधर्मौ न स्तः इत्यादिनास्तिकवादं, उच्चैः उन्नतस्वरेण, अकुरुत चकार, डुकृञ्ः करणे इति धातोर्लङ्।

अवगतं सुप्रसिद्धं, देवागारं देवमन्दिरं, नटैः नर्तकैः, विटैः वेशवाटी सञ्चारिभिः, भटैः रक्षकभटैः तीर्थध्वाङ्क्षैः मूर्खैः "तीर्थे ध्वाङ्क्षा इति-" "ध्वाङ्क्षेण क्षेपे" इति पाणिनिः। कापालिकैः हस्ते कपालं धृत्वा भिक्षामटद्भिः पाशुपतैः च जनैः प्राणदत् दध्वान प्रपूर्वस्य नद नादे शब्दे इति धातोर्लङ्।

తా॥ ఈ నగరమున జారిణీ వంచకులు పాపకార్యసక్తులునగు కులభ్రష్టులచే నాస్తికవాదములు గావింపబడుచున్నవి. దేవాలయ మంటపములన్నియు నటులతో, విటులతో, రక్షకభటులతో, మూర్ఖులతో, కాపాలికులతో నిండి యెల్లప్పుడు వారి

 In Public domain. Digitization Muthulakshmi Research Academy

మాటలచే బ్రతిధ్వనించుచుండెను. దేవాలయమున ధర్మప్రబోధములు లేవు. నాస్తికవాదములు జరుగుచున్నవి. వేదమంత్ర ధ్వనులుగాని పూజాపురస్కారములుగాని లేవు. నట విట భటాదుల ధ్వనులే పెద్దవిగా వినబడుచున్నవి.

Atheism is seeping in as the outcasts, the deceitful, and people who are interested in unlawful, irreligious things are hovering all around. The temple halls are echoing the cacophony of the citizens, and drama artists, and the police instead of the religious discourses. Neither Vedic chants nor the holy bells of religious worship are to be heard.

**१७. जननुतकुलतोऽहं जातवानित्यहंयुर्विबुधसदसि जल्पन्नुत्तमात्मीयगोत्रम्।
अभवदिह स गेहेशूर आजन्मदुष्टोऽनवरतपरनारीलम्पटस्सम्पदन्धः ॥**

व्या :- जननुतेति :- इह पुरे, आजन्म जन्मप्रभृति दुष्टः दोषयुतः दुष्टप्रवर्तन इत्यर्थः। अनवरतं सन्ततं परनारीलम्पटः परकान्तासक्तः, परनारी परायण इत्यर्थः। सम्पदन्धः सम्पन्मदमत्तः गेहेशूरः गृह एव शूरः नतु युद्धे, ''पात्रे समितादय''श्चेति निपातितः, सः तादृशः मनुजः, अहं जननुतकुलतः सर्वजनश्लाघ्या-द्वंशात् जातः उत्पन्नः, इति इत्थम्, अहंयुः अहङ्कारी ''अहंयुस्स्यादहङ्कारी'' इत्यमरः। विबुधसदसि पण्डितसभायाम्, उत्तमं प्रशस्तम्, आत्मीयगोत्रम् आत्मकुलं, जल्पन् वदन्, सर्वगोत्रेषु मदीयं गोत्रं प्रशस्तमिति वदन्नित्यर्थः, अभवत् आस, भू सत्तायामिति धातोर्लङ्।

తా॥ ఆ నగరమున, పుట్టినదాది పాడుపనులు చేయుచు, పరకాంతలతో క్రీడించుచు, నింటికడ గొప్పలు చెప్పుచు, సంపదలచే విఱ్ఱవీగు బ్రాహ్మణుడు, కన్నుమిన్నుగానక, నేనే యుత్తమకుల సంజాతుడను, నాగోత్రమే అన్ని గోత్రములకంటె గొప్పది అని పండితులకడ వదరుచుండెను.

Ever since his birth, doing all wrong deeds, bragging about himself and his birth and being promiscuous, reveling in wealth, an indiscriminate Brahmin talks like a pompous fool.

In Public domain. Digitization Muthulakshmi Research Academy

**१८. अहरह इह मेषान्कुक्कुटान्योधयित्वा सततमधिकपूज्यान्दूषयित्वा मदेन ।
प्रतिदिनमुपदंशैरेष मद्यं निपीयाऽगमयदवधिमात्मायुर्यथाजात इत्थम्॥**

व्या :- अहरह इति :- इह अत्र, एषः यथाजातः अज्ञः, 'अज्ञोमूढ यथाजात मूर्ख वैधेय बालिशाः' इत्यमरः। अहरहः प्रतिदिनं, मेषान् एडकान्, कुक्कुटान् चरणायुधान्, योधयित्वा, सततं नित्यं मदेन गर्वेण, अधिकपूज्यान् पूज्यतमान् जनान्, दूषयित्वा विनिन्द्य, प्रतिदिनं प्रत्यहम्, उपदंशैः व्यञ्जनैः, सह मद्यं सुरां, निपीय पीत्वा, इत्थम् एवम् आत्मायुः स्वजीवितम्, अवधिम् अन्तम्, अगमयत् निनाय, गम्लृ गताविति धातोः ण्यन्ताल्लङ्।

తా॥ ఈ పట్టణమున మూర్ఖుడొకడు ప్రతిదినము గొఱ్ఱెపందెములను కోళ్ళపందెముల నాడించుచు, పూజ్యులయిన మహాత్ములను నిందించుచు, వ్యంజనములతో గలిపి మద్యమును సేవించుచు, తన వయస్సునంతను దాటించుచుండెను.

An ignorant fool whiles away his time in organizing cock fights and sheep fights, talking ill and low about great people, drinking liquor and eating meat snacks .

**१९. क्वचिदरमत सोऽयं जालिकव्याधनीचैः क्वचिदलभत हेयं वेषमन्यालयेषु।
क्वचिदवमतलज्जोऽवङ्निरीशानुकूलं क्वचिदनुवदरिं किं वीरसूस्तस्य माता॥**

व्या :- क्वचिदिति :- सः अयं जनः, क्वचित् कुत्रचित् जालिकाः वागुरिकाः व्याधाः मृगयवः, नीचाः प्राकृताः तैः अरमत अक्रीडत्, रमु क्रीडायमिति धातोर्लङ्, क्वचित्, कुत्रचित्, अन्यालयेषु अन्यदीयभवनेषु, हेयं निन्द्यं, वेषम्, आकल्पम्, अलभत आप्नोत्। डुलभष् प्राप्ताविति धातोर्लङ्। क्वचित् कुत्रचित्, अवमता त्यक्ता लज्जा त्रपा यस्य सः, लज्जाविहीनस्सन्, निरीशानुकूलं नास्तिकानुकूलं यथातथा अवक् अवोचत्, वचपरिभाषणे इति धातोर्लङ्। क्वचित् कुत्रचित्, अरिं रिपुं, तस्य माता जननी वीरसूः वीरसूता किम् इति अनुवत् नुनाव। स्तुतिं चकारेत्यर्थः, णू स्तवन इति धातोस्तौदारिकाल्लङ्।

తా॥ ఇందలి జనుడొక్కచోట జాలరులతో వేటకాండ్రతో పామరులతో గలిసి యానందించెను. ఒక్కచోట పైవారిండ్లలో నింద్యములైన వేషములను ధరించుచుండెను. వేరొక్కచోట సిగ్గువిడిచి నాస్తిక వాదములను గావించుచుండెను. మఱియొకచోట శత్రువును గూడ నీ తల్లి వీరమాతయని పొగడుచుండెను.

Another typical person is happily associated with fishermen, hunters, and the ignorant. Wear different attires, talks about atheism unashamed, exalts even an enemy's mother with a motive.

२०. रुचिरतरुणदासीमेलको वाजिमेधः परयुवतिमुखाम्भोजेक्षणं राजसूयम् । फलमिह निजसौख्यं जीवितेऽनल्पमेव प्रतिदिनमिति खट्वारूढ एष व्यजानात् ॥

व्या :- रुचिरेति :- वाजिमेधः अश्वमेधयागः, रुचिरा सुन्दरी तरुणा युवतिः या दासी वेश्या परिचारिका वा तस्याः मेलकः सम्मेलनदायी तस्य यागस्य दासी सम्मेलनमेव फलमित्यर्थः, राजसूययागः, परयुवतीनां परकान्तानां मुखाम्भोजं मुखपद्मं तस्य ईक्षणं दर्शनं, तस्य यागस्य परकान्तामुखदर्शनमेव फलमित्यर्थः इह अस्मिन्जीविते निजसौख्यमेव आत्मसुखमेव, अनल्पम् अत्यधिकं, फलं लाभः, इति एवं, प्रतिदिनं प्रत्यहम्, एषः अयं खट्वारूढः जाल्मः, मूर्ख इत्यर्थः 'खट्वाक्षेपे' निन्दायाम् एष समासः विधीयते। व्यजानात् जानाति स्म, विपूर्वक ज्ञा धातोर्लङ्।

తా॥ అశ్వమేధయాగము నాచరించినవారికి దాసీ సమాగమ ఫలము మాత్రమే లభించును. రాజసూయము జేసినవారికి పరకాంతా ముఖదర్శనమే ఫలము. ఈ జీవితమున నున్నంత ఫలము మఱెచ్చటను లేదు. ఇదియే మిక్కిలి యధికమైనది. అని యీ మూర్ఖుడు ప్రతిదినము భావించును. ఆ యోగముల ప్రయోజనము వాని కేమాత్రము తెలియదని భావము.

A blockhead has no more value for the highly esteemed sacred *yagnas* like *Ashwamedha Yaga* than for association with lowly people; and the result expected from a *Rajasuya Yaga* is getting a chance to sneak a look at beautiful women. He cannot think beyond these petty desires.

In Public domain. Digitization Muthulakshmi Research Academy

२१. ऋणमिह पिशुनेनादीयत स्वार्थवृद्ध्यै परिजनभृतकेभ्योऽक्रीयताल्पोऽपि मत्स्यः।
सुममधुफलशाकं देवसम्बन्धि सर्वं बहुलकुवदपोष्ट्रा किम्पचानेन तेन।।

व्या :- ऋणमिति :- इह अत्र पिशुनेन लुब्धेन स्वार्थवृद्ध्यै स्वधन संवर्धनाय, ऋणम् उद्धारः, परिजनेभ्यः सेवकेभ्यः भृतकेभ्यः कर्मकरेभ्यः अदीयत दीयते स्म। बहुलाः अधिकाः कुवदाः कुत्सितवादिनः तेषां पोष्टा पोषकः तेन, मितम्पचेन लुब्धेन अल्पोऽपि अतिस्वल्पोऽपि मत्स्यः मीनः देवसम्बन्धि देवताधीनं, सुमं पुष्पं, मधुमाक्षिकं, फलं, शाकः, तेषां समाहारः तत्सर्वमित्यर्थः अक्रीयत क्रीयते स्म। डुक्रीञ क्रयणे इति धातो कर्मणि लङ्।

తా॥ పట్టణమున లుబ్ధుడు వడ్డీలకై సేవకులకును చిన్న జీతగాండ్రకును ఋణములిచ్చుచుండెను. చాలామంది కుత్సితులను బెంచుచు తాను మాత్రము కడుపునిండ దినక బ్రతుకు నాలుబ్ధుడు దేవతలకు సంబంధించిన పువ్వులను తేనెను పండ్లను, కూరలను చివరకు చిన్న చిన్న చేపలను గూడ గొనుచుండెను.

Here, a penny pincher lends money to low satiried labourers. He, in a way endorses meanmindedness by hoarding fruits, flowers and honey, the holy offerings to the God. He makes business on small tiny fish too. (That's the level a miser has stooped to).

२२. श्रुतिसमुदितकन्यादानकालेऽपि मद्यं तरसमिह गवां स प्राशयद्वेदबाह्यान्।
तदपरिमितवस्वग्रस्यत द्रिण्णृपालैः प्रतिदिनमुरुधूर्तोद्योगिभिर्मन्त्रिमुख्यैः।।

व्या :- श्रुतीति :- इह अत्र सः विप्रः, श्रुतिसमुदिते वेदविहिते कन्यादानकाले कन्यादानसमयेऽपि मद्यं सुरां, गवां तरसं गोमांसञ्च, "तरसं क्रव्यमामिष" मित्यमरः। वेदबाह्यान् वेदाधिकारहीनान्, शूद्रादीनित्यर्थः। प्राशयत् भोजयामास। प्रपूर्वकात् अश् अशनायामिति धातोर्लङ्। तस्य, अपरिमितम् असङ्ख्याकं, वसु धनं द्रिण्णृपालैः शतृराजन्यैः। उरु अधिकं ये धूर्ताः वञ्चकाः तैरुद्योगिभिः। मन्त्रिमुख्यैः अमात्यादिभिश्च प्रतिदिनं दिने दिने अग्रस्यत अभक्ष्यत, ग्रस भक्षणे इति धातोः कर्मणि लङ्।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఈ పట్టణమందలి విప్రుడు పరమపవిత్రము వేదవిహితమునగు కన్యాదాన కాలమందు గూడ గోమాంసముతో మద్యముతో శూద్రాదులకు విందుచేయుచుండెను. వాని ధనమును శత్రురాజులు వంచకులైన యుద్యోగులు నమాత్యాదులును నిత్యము మ్రింగుచుండిరి.

One of the administrators of Vibudha, even in a holy ceremony like wedding hosted beef and liquor to the invitees. His money was dwindling as enemies and employees pilfered on a daily basis.

२३. श्रुतिरिपुकुलजाय स्वीयसम्पत्कुमारीमनुचितकरखिन्नां निर्दयस्सोऽर्पयित्वा।
अयमनिशमविन्दज्जीवनं तस्य हेतोरनृजुमतिरपि स्वश्मश्रुयुग्मं विधुन्वन्॥

व्या :- श्रुतिरिपुरिति :- सः अयं द्विजः, निर्दयः दयाविहीनस्सन्, अनुचितेन अनर्हेण करेण अथवा बलिना, खिन्नां, दुःखिताम्, अनर्हपाणिग्रहणदुःखिताम् अथवा अनुचितभागधेयदुःखितां वेत्यर्थः। स्वीयसम्पत्कुमारीं स्वसम्पद्रूपां कन्यां श्रुतिरिपवः शूद्रादयः तेषां कुले वंशे, जाताय उत्पन्नाय दत्त्वा वितीर्य, अनृजुमतिरपि कुटिलबुद्धिरपि, स्वीयं स्वकीयं, श्मश्रुयुग्मं, विधुन्वन् कम्पयन्, तस्य हेतोः जामात्रर्थम्, अनिशं सन्ततं, जीवनं वर्तनम् अविन्दत् प्राप, विद्लृ लाभे इति धातोर्लङ्।

తా॥ ఈ పురమందు బ్రాహ్మణుడు కఠినహృదయుడై తన సర్వస్వమైన కన్యకను, ఆమె యిష్టపడక దుఃఖించుచున్నను, శూద్రునకిచ్చి వివాహముగావించి, ఘనకార్య మాచరించినవానివలె సంతసించి, తన గడ్డమును మీసమును దువ్వుకొనుచు, నిత్యమాయల్లునికై తన జీవితమును వినియోగించుచు బ్రతుకుచుండెను.

A Brahmin gave away his daughter to a *shudra* against her desire, took pride in it as though it was a great accomplishment and spent away his life on his unworthy son-in-law.

२४. विधिनियमितकर्माक्षिप्य शश्वच्छ्ववृत्त्या क्षणिकधनमुपार्ज्य म्लिष्टमेवानुलप्य।
अगमयदवसानं सोऽस्य जातीयवेषैः प्रकटकपटशीलो जीवितं ब्रह्मबन्धुः॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- विधीति :- सः ब्रह्मबन्धुः ब्राह्मणब्रुवः, अधमब्राह्मण इत्यर्थः, विधिनियमितं वेदविहितं, कर्म कर्मविशेषम्, आक्षिप्य त्यक्त्वा, शश्वत् नित्यं, श्ववृत्त्या सेवया, 'सेवाश्ववृत्ति' रित्यमरः। क्षणिकधनम्, अतिचञ्चलं धनम्, उपार्ज्य सम्पाद्य, म्लिष्टमेव अविस्पष्टं यथा तथैव, ''अथ म्लिष्टमविस्पष्ट'' मित्यमरः, अनुलप्य मुहुर्मुहुः कथयित्वा। ''अनुलापो मुहुर्भाषा'' इत्यमरः प्रकटं स्पष्टीकृतं कपटं वक्रं शीलं स्वभावः यस्य सः, प्रकटितकृत्रिमस्वभावस्सन्नित्यर्थः। अन्यजातीय वेषैः इतरदेशजनानुकूलवेषधारणादिना, जीवितम् आयुः अवसानम् अन्तम्, अगमयत् निनाय, गम्ऌ गताविति धातोर्यङन्ताल्लङ्।

తా॥ ఈ నగరమున బ్రాహ్మణాధముడు వేదవిహితములైన తన కర్మములను విడనాడి సేవక వృత్తిచే ధనము నార్జించుచూ, మాటిమాటికస్పష్టముగ గొణుగుచు, తన కపటస్వభావమును బ్రకటించుకొనుచు, అన్యజాతీయ వేషములను ధరించుచు, జీవితమును గడుపుచుండెను.

The worst among the Brahmins, deserted his *swadharma*, earned by taking up a lowly profession not prescribed for him. He would mumble, at times would reveal his guile, and wore attires of people of other kingdoms that suit them and their climate.

२५. बहुलधनयुतश्चेद्दीर्घनामाभिधाय स्वकुलनियतकर्मस्तोममाराद्विधूय ।
सकलपललभोजी सन्ततं मद्यपाय्य न्वसरदवनिदेवोऽसौ दिवाकीर्तिवृत्तम् ॥

व्या :- बहुलेति :- असौ अवनिदेवः अयं भूसुरः, बहुलधनेन अधिकधनसम्पदा युतश्चेत् युक्तो यदि, दीर्घनाम अतिदीर्घं नामधेयम्, अभिधाय उक्त्वा, स्वकुलस्य स्ववंशस्य, नियतः निर्णीतः यः कर्मस्तोमः कर्मसमूहः तम् आरात् दूरं विधूय विक्षिप्य, सकलपललभोजी सर्वजन्तुमांसभक्षकः, सन्ततं नित्यं मद्यपायी सुरां पिबन्, दिवाकीर्तिवृत्तम् चण्डालचरितं, अन्वसरत् अनुससार। ''चण्डाल प्लव मातङ्ग दिवाकीर्ति जनङ्गमाः'' इत्यमरः। अनुपूर्वक सृ गताविति धातोर्लङ्।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఇందలి బ్రాహ్మణుడు పెద్ద ధనవంతుడయినచో తన పేరు పెద్దగాజెప్పి చెప్పుకొనుచు, బ్రాహ్మణాచారములను సంపూర్ణముగ విడిచి, నిత్యము కల్లుద్రావుచు, నన్నిరకములైన మాంసములను దినుచు, చండాలునివలె దనజీవితమును గడుపుచుండెను.

If the Brahmin was rich he would boast about himself, would indulge in merry making by drinking liquor , would eat all kinds of meat and lives lowly , does all the inappropriate things that are least expected of a Brahmin.

**२६. किमपि हितमपश्यन् जीवनोपायमन्यं बहुयजनमिषेणार्थं जडान् भिक्षमाणः।
प्रतिदिनमिह दारान् भूषणैर्भूषयित्वाऽदयमनयमजामालम्भयद्यायजूकः॥**

व्या :- किमपीति :- इह अस्मिन् नगरे यायजूकः यज्वा, पुनः पुनः यजतीत्यर्थे यङ्। ''यजजव दशाः यङः'' इत्यूकप्रत्ययः, हितं क्षेमङ्करम् अन्यम् इतरं, जीवनोपायं जीवसाधनम्, अपश्यन् किञ्चिदप्यजानन्, प्रतिदिनं नित्यं, यजन मिषेण यज्ञच्छद्मना, जडान् मन्दान्, बहु अधिकं, भिक्षमाणः याचमानः, भूषणैः तद्धननिर्मिताभरणैः, दारान् भार्यां, ''दाराः पुंसि च भूम्न्येव'' इत्यमरः, भूषयित्वा अलङ्कृत्य। अदयं दयारहितं यथातथा, अनयं नीतिविरहितं यथातथा, अजां छागीम् आलम्भयत् विशसनमकरोत्, अङ् पूर्वकात् ''लभष् प्राप्ता'' विति धातोः णिचि ''लभेश्च'' इति सूत्रेण नुम्, आलम्भयदीति रूपम्।

తా॥ ఈ నగరమున సోమయాజి జీవికకై మరియొక బ్రతుకుతెరువుగానక, యజ్ఞాచరణమే జీవనాధారముగ గావించుకొని, మందబుద్ధులకడకేగి, యజ్ఞమను మిషతో వారి నెక్కువగా యాచించి, ధనమునార్జించి, యా ధనముతో తన భార్యకు నగలుగావించి యామె నలంకరించి, కనికరములేక మేకను జంపుచున్నాడు. తాను బ్రతుకుటకును భార్యను సంతోషపెట్టుటకును యజ్ఞాచరణ మాతనికి ఫలము.

Yagnas are performed for the welfare of the world. But one of the *somayajis* (yagna performer) did *yagnas* to make his living, extracted money from ignorant people in the name of sacrifices, and with the money earned pleased his wife by

In Public domain. Digitization Muthulakshmi Research Academy

buying her jewelry. It is merciless killing of the goat here in the name of sacrifice.

२७. उरुतरमिह दत्तं पादपूजाधनं चे दयमकुरुत दासीपुत्रगेहेऽपि भिक्षाम् ।
अनयमखिलबन्धूनस्वान् परिव्राडपुष्यत्सकलमतनियन्ताऽश्रान्तपीठाधिगन्ता ॥

व्या :- उरुतरमिति :- इह अत्र, सकलमतानां द्वैताद्वैतादिसर्वमतानां, नियन्ता नियामकः, अश्रान्तं सन्ततं पीठाधिगन्ता सन्यासिपीठमारूढः अयं परिव्राट् एष संन्यासी, उरुतरम् अत्यधिकं, पादपूजायै धनं वित्तं, दत्तं चेत् दीयेत यदि, दासीपुत्रगेहेऽपि परिचारिकापुत्रगृहेऽपि भिक्षामकुरुत, भिक्षामगृह्णात्, डुकृञ् करणे इति धातोर्लङ्, स्वान्, बन्धून् बान्धवान्, अपुष्यत् पुपोष। 'पुष् पुष्टौ' इति दैवादिकात् धातोर्लङ्।

తా॥ ఈ పురమందు, సర్వమతముల వారిని నియమించువాడును, నిత్యము పీఠమందేయున్న పీఠాధిపతియగు సన్యాసి, పాదభిక్షనధికముగా నిచ్చినయెడ దాసీపుత్రుని ఇంటియందు గూడ భిక్షగైకొనుచు, పాదభిక్షలచే లభించిన ధనముతో తమ బంధువులను బోషించుచుండెను. ధనార్జనముకొరకు సన్యాసముగాని ముక్తికొరకు కాదు.

A monk in the monastery here had no qualms in accepting *bhiksha* from a low class person if the *bhiksha* was a big amount. With such income he would help his family and relatives. Renunciation and embracing of monastic life was just another profession to make a living.

२८. बहुधनपरधूर्तैः पूरिते धर्मगेहे मुहुरिह विरचय्यानर्थकं कूटसाक्ष्यम् ।
अविदितनिगमार्थोऽजस्रमेषोऽग्रजातिः समचरदुरुमूल्यक्रीतवादाधिकारः ॥

व्या :- बहुधनेति :- इह अस्यां विबुधनगर्याम्, एषः अग्रजातिः अयं विप्रः, अविदितः अज्ञातः निगमार्थः वेदार्थस्सन्, कूटसाक्ष्यादिदुष्टकर्माचरणेन नरकयातना सम्भविष्यन्तीत्यजानन्नित्यर्थः। उरुमूल्येन अधिकधनेन क्रीतः वादने अधिकारः येन

In Public domain. Digitization Muthulakshmi Research Academy

सः, अधिकधनं दत्त्वा वादनाधिकारप्रभुत्वं क्रीत्वेत्यर्थः। बहुधने अधिकधनसम्पादने ये पराः आसक्ताः तैः धूर्तैः वञ्चकैः, पूरिते सम्पूर्णे धर्मगेहे धर्माधिकरणे, मुहुः पुनः पुनः, अनर्थकम् अनर्थदायि, कूटसाक्ष्यम् असत्यसाक्ष्यं विरचय्य निर्माय, अजस्रं सन्ततं, समचरत् सञ्चचार, सम्पूर्वक चर भक्षणे सञ्चारे च इति धातोर्लङ्।

తా॥ ఈ నగరమున బ్రాహ్మణుడు ధర్మాధికరణమున (కోర్టు) వాదించుట కుపయుక్తమైన యధికార పత్రమును (ప్లీడరుపట్టా) హెచ్చు ధనమిచ్చికొని, కూట సాక్ష్యము నరకప్రదమను వేదార్థము నెరుంగక, ధనాశాపరులతో నిండిన యధికరణమునకు బోయి, యచ్చట కూట సాక్ష్యములను జెప్పించి నిత్యము బ్రతుకుచున్నాడు.

A Brahmin, bought the certificate which qualified him to plead in the court, without knowing the dire consequences he would have to pay in the god's court. He with false pleadings and fake witnesses would take the side of greedy and lived off them.

२९. सकलनिगमबाह्यं कर्षकं द्यूतकारं भृतिभुजमिह कन्याविक्रयं सार्थवाहम्।
द्विजकुल उरुवृद्ध्या जीव माद्यूनमैक्षे प्रकटकपटवेषं शिश्निदानं भ्रुकुंसम्॥

व्या :- सकलेति :- इह अत्र, द्विजकुले विप्रजातौ, सकलनिगमबाह्यं सर्ववेदशास्त्रविहीनं, कर्षकं कृषीवलं, द्यूतकारं सभिकं, ''सभिकाद्यूतकारकाः'' इत्यमरः, भृतिभुजं कर्मकरं, ''भृतको भृतिभुक्कर्मकरो वैतनिकश्च सः'' इत्यमरः। कन्याविक्रयं कन्याविक्रेतारं, सार्थवाहं पण्याजीवम्, उरुवृद्ध्या जीवम् अधिककुसीदेन जीवन्तं, ''कुसीदं वृद्धिजीवन'' मित्यमरः आद्यूनम् औदरिकं, परान्नजीविनमित्यर्थः। ''आद्यूनस्स्यादौदरिकः'' इत्यमरः। प्रकटकपटवेषं धूर्तं, शिश्निदानं दुराचारं, ''शिश्निदानो कष्टकर्मा'' इत्यमरः। भ्रुकुंसं स्त्रीवेषधारिणं, 'भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकं, स्त्रीवेषधारी पुरुषः'' इत्यमरः। ऐक्षे अपश्यम्। ईक्ष दर्शने इति धातोर्लङ्।

తా॥ ఈ నగరమందలి బ్రాహ్మణులు వేదశాస్త్రములను పూర్ణముగ విడిచినవారు, నేలను దున్ని వ్యవసాయము జేసి బ్రతుకువారు, జూదమాడువారు,

In Public domain. Digitization Muthulakshmi Research Academy

కూలిపనివలన బ్రతుకువారు, కూతుండ్రనమ్ముకొనువారు వర్తకముజేయువారు, హెచ్చువడ్డీలకప్పునిచ్చి యా వడ్డీధనముతో జీవించువారు, ఇతరులపై నాధారపడి పొట్టపోషించుకొనువారు కపటవేషముల ధరించి తిరుగువారు, దురాచారపరాయణులు, స్త్రీ వేషములను దాల్చి నృత్యముల జేయువారునై యుండిరి.

The Brahmins of this city had come a long way from learning or following the holy scriptures, took to agriculture to make a living, did gambling, sold their daughters , did dishonest businesses, lived off someone else without making their own money, were deceitful and of bad conduct ,wore the attire of women and danced in revelry.

**३०. उदवहदिह वृद्धो निर्घृणः क्षीरकण्ठा मवृणुत कुलबाह्यः सम्पदन्धः कुलीनाम्।
हतमतिरभिशस्तः प्राव्रजद्गूढभोगो बहुलधनरतिर्धिग्ब्राह्मणं नामशिष्टम् ॥**

व्या :- उदवहदिति :- इह अत्र नगरे, वृद्धः अतीतवयाः, निर्घृणः दयारहितस्सन्, क्षीरकण्ठाम् अतिबालाम् उदवहत् पर्यणयत्, उत्पूर्वस्य वह धातोर्लङ्, कुलबाह्यः कुलबहिष्कृतः, सम्पदन्धः सम्पद्गर्वितस्सन्। कुलीनां सत्कुलसञ्जातां कन्यां कुमारीम् अवृणुत वरयामास, अभिशस्तः परकान्ताग्रहणादिना निन्दितः हतमतिः बुद्धिहीनस्सन्, गूढभोगः गुप्तमार्गेण भोगाननुभवन्, बहुलधनरतिः बहूधनार्जनासक्तस्सन्, प्राव्रजत् परिव्राजकः अभूत्, प्रपूर्वक व्रज गताविति धातोर्लङ्। नामशिष्टं नाममात्रावशिष्टं ब्राह्मणं भूसुरं प्रति, धिक् निन्दाऽस्तु।

తా॥ ఈ నగరమున మిక్కిలి వృద్ధుడు చాలా చిన్నపిల్లను వివాహమాడెను. వెలివేయబడినవాడు ధనవంతుడై సత్కులజాతయగు కన్యను వివాహమాడదలంచెను. నిందితుడైన మందబుద్ధి గుప్తముగా భోగముల ననుభవించుచు ధనార్జనమునకై సన్యాసాశ్రమమును స్వీకరించెను. ఛీ- ఏమి బ్రాహ్మణుడు. పేరునకు మాత్రము బ్రాహ్మణుడనిపించుకొనుచున్నాడు.

In this place, a very old man married a young girl. Someone who was banished married a girl of high lineage; an accused, dull witted person wore saffron to earn money.

In Public domain. Digitization Muthulakshmi Research Academy

It was disgusting to call them Brahmins, it is by birth, for the name sake they were called Brahmins, not because of their traits.

३१. सकलनिगमपुञ्जस्यायमस्यां मृषार्थं पुरि विकृतवचोभिः बोधितं बुध्यमानः।
अवगणितधरित्रीदेवतो हीनवर्णोऽप्रथयदमितगर्वं कद्वदस्सम्पदन्धः ॥

व्या :- सकलेति :- अस्यां पुरि अस्मिन्नगरे, एषः अयं हीनवर्णः शूद्रादि जनः, विकृतानि विरुद्धानि वचांसि वचनानि येषां तैः, वेदविरुद्धवादिभिरित्यर्थः बोधितं कथितं सकलनिगमपुञ्जस्य सर्ववेदसमूहस्य, मृषार्थम् असत्यार्थं, बुध्यमानः जानन्, अवगणिताः तिरस्कृताः धरित्रीदेवताः भूसुराः येन सः अवमानित विप्रस्सन्नित्यर्थः, कद्वदः कुत्सितानि वदन्, 'रथवदयोश्च' इति सूत्रेण कु शब्दस्य कदादेशः। ''गर्ह्यवादीतु कद्वदः'' इत्यमरः, सम्पदन्धः ऐश्वर्यमदमत्तस्सन्, अमितगर्वम् अपारदर्पम्, अप्रथयत् प्रकटीचकार, प्रथ प्रख्याने इति धातोर्लङ्।

తా॥ ఈ నగరమున కొందరు దుష్టులు వేదముల కపార్థములను కల్పించి ఇదియే పరమార్థమని బోధించుచుండిరి. దానిని విని శూద్రాది హీనవర్ణుడు వేదార్థము నెఱింగినట్లు గర్వించి, బ్రాహ్మణజాతినే యవమానించి, లక్ష్యపెట్టక సమ్పదంధుడై నోటికి వచ్చినట్లు వదరుచు, గర్వముచే దనమాటయే యథార్థమని చాటుకొనుచున్నాడు.

Wicked people distorted the meaning of Vedas, assuming that to be the real essence; a lowly man took pride that he knew Vedas, mocked at the very Brahmin caste, overwhelmed by the wealth he had, talked recklessly about them. He also went on claiming that his self made statements were the ultimate truth.

३२. श्रुतिनिगदितमार्गं नाजहान्निर्विशेषं दृढमिह परपद्यां नह्यवालम्बताऽयम्।
अमनुत बहु दुःखं नो सुखं मानवोऽद्यापकृतमुपकृतं दुर्वृत्त उन्मत्तचित्तः॥

व्या :- श्रुतीति :- इह अत्र, अयं जनः, श्रुतिनिगदितमार्गं वेदविहितं पन्थानं, निर्विशेषं सम्पूर्णतया, न अजहात् न तत्याज, ओहाक् त्यागे इति

In Public domain. Digitization Muthulakshmi Research Academy

धातोर्लङ्, दृढं स्थिरनिश्चयेन, परपद्यां परमार्गं, ''सरणिः पद्धतिः पद्या'' इत्यमरः, नहि अवालम्बत, न स्वीचकार। अवपूर्वकस्य लबि अव स्रंसने इति धातोर्लङ्। अद्य इदानीं, मानवः मनुजः, दुर्वृत्तः दुष्टप्रवर्तनः, उन्मत्तचित्तः उन्मत्तस्वान्तः बहु अधिकं सुखं दुःखञ्च नो अमनुत न मेने मन आलोचन इति धातोर्लङ्। बहु अधिकम् उपकृतम् अपकृतं वा न अमनुत यद्दुःखदायि यत्सुखदायि येनोपकारो भवति येनापकारो भवतीति न वेदेत्यर्थः।

తా॥ ఈ పత్తనమందలి జనమింకను వేదమార్గమును పూర్తిగ విడువలేదు. పరమార్థమునింకను స్థిరబుద్ధితో గ్రహింపనులేదు, ఇందలి జనుడు దుష్ప్రవర్తనుడు నున్మత్తచిత్తుడు నగుటచేత నెద్దాన సుఖముగలదో యెద్దాన దుఃఖమువచ్చునో యేది యుపకారమో యేది యపకారమో తెలియనివాడై యుండెను.

The city dwellers have not completely deserted the path to the divine (*veda marga*) yet. However, they are not focused to know the ultimate truth. They are mentally imbalanced and have bad conduct. They know not what gives them happiness and what causes sadness; what is good and what is bad for them.

३३. स जगदुपचिकीर्षुस्तर्कयन्नित्युदारः क्वचिदपि परिगच्छन्मन्दमालोलदृष्टिः।
प्रमदवनसमीपे गन्धवातेन हृष्टो घनमधुररवेणागायदित्थं महात्मा ॥

व्या :- स जगदिति :- महान् आत्मा अनुभावः यस्य सः, महामना इत्यर्थः, उदारः औदार्ययुक्तः, दातेत्यर्थः, सः तारकः, जगत् लोकम् उपचिकीर्षुः उपकर्तुमिच्छुः, इति पूर्वोक्तप्रकारेण, तर्कयन् ऊहमानः, क्वचिदपि कुत्रचिदपि परिगच्छन् सञ्चरन्, मन्दं शनैश्शनैः आलोलदृष्टिः चञ्चलदृष्टिः इतस्ततः पश्यन्नित्यर्थः। प्रमदवनसमीपे उद्यानवनसन्निधौ गन्धवातेन सुरभिलवायुना हृष्टः प्राप्तहर्षः घनेन गम्भीरेण मधुरेण स्वादुना रवेण ध्वनिना इत्थम् एवम् अगायत् जगौ, गै शब्दे इति धातोर्लङ्।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ మహానుభావుడు నుదారుడునగు నా తారకుడు లోకవృత్తమును గూర్చి తనలోదాను తర్కించుకొనుచు లోకమున కుపకారము గావింపదలంచి యొకనాడెటకో పోవుచు రాజాన్తఃపురసమీపమందలి యుద్యానవన సమీపమునసుజేరి యట ఘ్రూణతర్పణమగు గాలికి బరవశుడై మధురముగ గంభీరస్వభావమున నీ క్రింది విధముగ బాడనారంభించెను.

Taraka, the compassionate and generous exalted personage, was reasoning with his own self and decided to do well to the world. As he was wandering he happened to reach a garden and the cool breeze inspired him to sing and thus he sang earnestly-

३४. जननि तव जनोऽतिक्रम्य वेदोपदेशं प्रतिदिनमचरत्स्वच्छन्दहीनो हताशः।
इति मुहुरभवस्त्वं सुष्ठु रोरुद्यमाना द्विजनिनदविलापैस्सन्ध्ययोः कर्मभूमे॥

व्या :- जननीति :- जननि हे मातः ! तव भवत्याः, जनः मानवसमूहः, वेदोपदेशं वेदधर्मम्, अतिक्रम्य अपहाय, स्वच्छन्दहीनः स्वातन्त्र्यशून्यः, हता आशा येन सः गतसङ्कल्पस्सन्, प्रतिदिनं नित्यं सञ्चचार समचरत्, इति इत्थं हे कर्मभूमे। भारतावनि । त्वं, सन्ध्ययोः उभयोः प्रातस्सायं सन्ध्ययोरपि, द्विजानां पक्षिणां, ''दन्त विप्राण्डजा द्विजाः'' इत्यमरः। निनदाः रवाः एव विलापाः रोदनध्वनयः, तैः मुहुः पुनः पुनः सुष्ठु रोरुद्यमाना रुदन्ती अभवः।

हे मातः भारतावनि । मत्पुत्राः वेदमार्गमपहाय किङ्कर्तव्यताविमूढाः प्रतिदिनं निरर्थकं सञ्चरन्तीति चिन्तयन्ती सन्ध्याद्वयेऽपि विहगरुतमिषेण रोदिषि, अहो दौर्भाग्यं तव।

తా॥ అమ్మా ఓ కర్మభూమీ! నీ పుత్రులందరును వేదోపదేశములను విడిచి యేమిచేయుటకును దోచక, నిరర్థకముగ స్వాతంత్ర్యహీనులై తిరుగుచుండుటనుగాంచి, యిరు సంజలందును పక్షియరపులను మిషచే విలపించుచున్నావు. నీకెట్టి దురవస్థ పట్టినదమ్మా.

In Public domain. Digitization Muthulakshmi Research Academy

Dear motherland! All your children have forsaken Vedic scriptures and are wandering without purpose. They have lost their freedom as they are enslaved to their desires. Looking at the plight of them, you are crying your heart out through the birds in the dawn and the dusk.

३५. **अनिशमिह पुरा मे क्षत्रियोऽधत्त नाम स्फुटतरमधुना तत्सर्ववर्णोऽप्यगृह्णात्।**
इति शिखरतरूणामाशुगेन श्वसित्वा क्षितिभृदयममुञ्चन्निर्झराश्रुप्रवाहम्॥

व्या :- अनिशमिति :- इह अत्र, पुरा पूर्वकाले, क्षत्रियः बाहुजः, अनिशं नित्यं, मे मम, नाम क्षत्रिय इति नामधेयं, स्फुटतरम् अतिस्पष्टम्, अदत्त दधार। क्षतात्त्रायत इति यन्नाम विद्यते तन्नाम बाहुजः एक एव नित्यं दधारेतिभावः अधुना इदानीं, तत् तन्नामधेयं, सर्ववर्णोऽपि विविधजातिसमुद्भवोऽपि, अगृह्णात् जग्राह इति इत्थं शिखरतरूणां कूटस्थवृक्षाणां, आशु गच्छतीत्याशुगः वायुः तेन, शिखरतरुवातेनेत्यर्थः श्वसित्वा निश्वस्य, अयं क्षितिभृत् पर्वतः, राजेति गूढार्थः। निर्झरः जलप्रवाह एव अश्रूणि बाष्पाणि, तेषां प्रवाहं धारासमूहं, अमुञ्चत् तत्याज।

पुरा क्षत्रिय इति नामधेयं तद्वंशीय एव धृत्वा तत्सार्थकमकरोत्, इदानीं तन्नामधेयं सर्ववर्णोऽपि स्वीचकार। अहो मम दौर्भाग्यमिति अयं क्षितिधरः शिखरगतवायुमिषेण निश्वसन्, निर्झरमिषेण अश्रुधाराः अमुञ्चत्। क्षितिभृत्पदेन राजाप्येवं रुरोदेत्यर्थान्तरः द्योत्यते ।

తా॥ పూర్వం క్షత్రియుడనే నామధేయమును ఆ వంశమువారే ధరించి దాన్ని సార్థకము చేసిరి. నేడు ఆ నామధేయమును అన్నివర్ణాలవారూ ధరించినారు. అయ్యో! నా దౌర్భాగ్యం అని ఈ పర్వతము శిఖరముపైనున్న వాయు నెపముతో నిశ్వసించుచూ, జలపాత నెపముతో అశ్రుధారలను విడిచెను. క్షితిభృత్ అన్న పదముతో రాజుకూడా ఈవిధంగా రోదించెనని అర్థాంతరము ద్యోత్యమగుతున్నది.

Once, there was a class of people called *Kshatriyas* (ruling class). But nowadays, people of all classes call themselves rulers. This mountain, as if lamenting, "Oh, my misfortune!", is sighing in the form of the winds at the

In Public domain. Digitization Muthulakshmi Research Academy

mountain peaks; and pouring out tears in the form of rivers running down.

३६. रुचिरमुरुगभीरार्थान्वितं तन्निशम्य स्तनितमिव दविष्ठश्राव्यमक्लिष्टगीतम्।
उपवनतरुकेलीलोलभूपालपुत्रस्तमविविदिषदार्यं साधु गायन्तमुच्चैः ॥

व्या :- रुचिरमिति :- रुचिरं मनोहरं, उरुः गभीरश्च यः अर्थः तेन अन्वितं युक्तं, गम्भीरभावसमुपेतं, स्तनितमिव घनगर्जितमिव, दविष्ठादपि श्राव्यम् अतिदूरादपि श्रवणयोग्यं तत् अक्लिष्टगीतं मधुरगानं निशम्य श्रुत्वा उपवने उद्याने ये तरवः वृक्षाः तेषु केली लीला तस्यां लोलः आसक्तः भूपालपुत्रः राजकुमारः उच्चैः उन्नतस्वरेण साधु सुष्ठु गायन्तं गानं कुर्वन्तम् आर्यं पूज्यं तं तारकं अविविदिषत् वेदितुमैच्छत्। विद्लृ ज्ञाने इति धातोस्सन्नन्ताल्लङ्।

తా॥ గంభీరార్థముతో గూడి దూరముగానున్నను శ్రావ్యమై మధురమై ఘనగర్జితమువలె వినబడుచున్న యాగానమును, సమీపోద్యానమున వృక్షవాటిలో వినోదముగ విహరించుచున్న రాజకుమారుడు విని, యా గాయకుడెవడో వానిని తెలిసికొనవలెనని సంకల్పించెను.

The melodious song of *Taraka* with its deep meaning was loud enough to be heard by the prince who was on a stroll in the nearby park and he was keen on knowing who the singer was.

३७. विकसितलपनेनानन्तरं जाङ्घिकेन क्षितिपसुतभटेन प्रार्थ्यमानस्स विद्वान्।
ललितधवलवर्णस्सच्चिदानन्दपूर्णस्समचरदिव मन्दं मत्तमातङ्गपोतः ॥

व्या :- विकसितेति :- अनन्तरं गानश्रवणानन्तरं, विकसितलपनेन उल्लसदाननेन, ''वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्'' इत्यमरः। जाङ्घिकेन जङ्घाकरिकेन, जङ्घे जीवनकार्यौ यस्य सः जङ्घालत्वात्त्वरितगमनेन, दूरवार्तादिकं नीत्वा जीवतेत्यर्थः ''जङ्घाकरिकजाङ्घिका''वित्यमरः क्षितिपसुतभटेन राजकुमारसेवकेन प्रार्थ्यमानः प्रार्थितस्सन्, राजकुमारस्त्वामाह्वयति, तत्समीपमागच्छेत्याहूतस्सन्नित्यर्थः,

In Public domain. Digitization Muthulakshmi Research Academy

ललितः सुन्दरः धवलः श्वेतः वर्णशरीरकान्तिर्यस्य सः सच्चिदानन्दपूर्णः परमात्मस्वरूपः, स विद्वान् पण्डितस्तारकः, मत्तमातङ्गपोत इव मदगजशिशुरिव, 'पोतः पाकोऽर्भको डिम्भः' इत्यमरः मन्दं शनैश्शनैः समचरत् सम्यगगमत्, सम्पूर्वकचर गताविति धातोर्लङ्, उपमालङ्कारः।

తా॥ తారకుని గానమును విని, యా రాజకుమారుడాతని నొక భటునిద్వారా పిలిపించెను. ఆ భటుడును వికసన్ముఖుడై యా తారకుని సమీపించి రాజకుమారుడు మిమ్మాహ్వానించుచున్నాడని విన్నవించెను. అంత, సుందరుడు ధవళగాత్రుడు పరమానందరూపుడునగు నాతారక పండితుడు, మందమంద గమనమున గున్న యేనుగువలె నాతనికడకేగెను.

One of the soldiers was sent to fetch *Taraka*. With a gleeful smile the soldier approached and conveyed him the prince's message to bring him along. The handsome, crystal clear voiced *Taraka* walked elegantly with the pace of an elephant cub.

३८. स उपवनविशेषानद्भुतान्दर्शनीयान् स्मितललितमुखाब्जो लक्षयन्सत्कवीन्द्रः ।
अभिनवबहुराजत्कल्पनामूहमानोऽतरदवगतमार्गं तोषितप्राणिवर्गम् ॥

व्या :- स इति :- सत्कवीन्द्रः सत्कविश्रेष्ठः, सः तारकः अद्भुतान् आश्चर्यकरान् दर्शनीयान् रमणीयान्, उपवनविशेषान् उद्यानवनदृश्यविशेषान्, लक्षयन् पश्यन्, स्मितेन दरहसितेन ललितं सुन्दरं मुखाब्जं मुखपद्मं यस्य सः, हासविकसित मुखारविन्दस्सन्नित्यर्थः, अभिनवां नूतनां बहु अधिकं राजन्तीं कल्पनाम्, ऊहमानः आलोचयन्, तोषितप्राणिवर्गं सन्तुष्टजनाक्रान्तम्, अवगतं विदितं मार्गं पन्थानम् अतरत् अतिचक्राम तॄ तरणे इति धातोर्लङ्।

తా॥ సత్కవిశ్రేష్ఠుడైన యా తారకుడు ఉద్యానవనమందలి వింతలను విశేషములను గాంచుచు, వాని సౌందర్యమునకు మెచ్చుకొనుచు దనలోదాను క్రొంగ్రొత్త కల్పనల నూహించుకొనుచు, సంతుష్టులైన జనులతో నిండిన యా తెలిసినత్రోవ వెంటనేగెను.

 In Public domain. Digitization Muthulakshmi Research Academy

The greatest poet *Taraka*, looking at the wonderful and remarkable things, mesmerized by their beauty, lost in his dream world for a while walked in the park that was crowded with people who were visibly happy and content.

३९. विनयनमितमूर्धद्वार्स्थितानीक्षमाणः प्रकटितसचिवाद्यैरञ्जसा वन्द्यमानः।
अनुपदमपि धन्यं स्वं मुदा मन्यमानः नृपतिसुतचकोरायात्र सोऽपूर्णचन्द्रत्॥

व्या :- विनयेति :- अत्र, स तारकः, विनयेन विनमिताः नम्रीकृताः मूर्धानः शिरांसि येषां तान्, द्वार्स्थितान् द्वारपालकान्, ईक्षमाणः पश्यन्, प्रकटिताः कृतपरिचयाः ये सचिवाद्याः अमात्यादयः तैः अञ्जसा त्वरितं, वन्दमानः नमस्कृतस्सन्, अनुपदं पदे पदे, स्वमपि आत्मानमपि, मुदा प्रीत्या, धन्यं धन्यजीविनं, मन्यमानः भावयन्सन्, नृपतिसुतः राजकुमार एव चकोरः जीवं जीवः, चन्द्रिकापायी पक्षिविशेष इत्यर्थः, तस्मै राजपुत्रचकोराय, अपूर्णचन्द्रत् पूर्णचन्द्रवदभवत्। पूर्णचन्द्र इव आचरतीति पूर्णचन्द्रति, आचारार्थे क्विप्, लङ् अपूर्णचन्द्रत्।

पूर्णचन्द्रं दृष्ट्वा चकोरः यथा मुदमवाप्नोति तथा तं तारकं दृष्ट्वा राजपुत्रो मुदमवापेति भावः, उपमालङ्कारः।

తా॥ మార్గమధ్యమున నమ్రశిరస్కులై నిలబడియున్న ద్వారపాలకులను జూచుచు, తమ్ము తాము పరిచయము గావించుకొని త్వరగా నమస్కరించుచున్న మంత్రి సామంతాదుల నమస్కృతులనందుకొనుచు, మాటిమాటికి దన్నుదాను ధన్యునిగ భావించుకొనుచు, చకోరపక్షికి జంద్రుడువలె నా తారకుడు రాజకుమారునకు ఆనందమును గూర్చెను.

On his way to the prince, *Taraka* was saluted by the guards at the entrance with their heads bent in respect. He was well received by the ministers and vassals who introduced themselves to him. The prince, like a *chakora* that derives food from the moon light, was happy at the sight of *Taraka*.

In Public domain. Digitization Muthulakshmi Research Academy

४०. **समतरुणवयस्कं स्वीयरूपानुकारं सरसिजसदृशाक्षं सन्नुतं राजपुत्रम् ।**
सविनयनतशीर्षं सोमबिम्बास्यमार्यं सपदि तमवलोक्यासावसुख्यद्द्विजेन्द्रः॥

व्या :- समेति :- सः असौ द्विजेन्द्रः सोऽयं ब्राह्मणश्रेष्ठः तारकः, समं तुल्यं तरुणं नूतनं वयः यस्य तं, स्वसमाननूतनवयस्कमित्यर्थः, स्वीयं स्वकीयं यत् रूपम् आकारः तस्य अनुकारं, स्वसमानरूपमित्यर्थः, सरसिजाभ्यां पद्माभ्यां सदृशे तुल्ये अक्षिणी नेत्रे यस्य तं, पद्मनयनमित्यर्थः सद्भिः सज्जनैः नुतं स्तुत्यं, विनयेन नतं नम्रं शीर्षं शिरः यस्य तं, विनयविनमितोत्तमाङ्गमित्यर्थः। सोमबम्बिवत् चन्द्रमण्डलतुल्यम् आस्यं मुखं यस्य तम्, आर्यं पूज्यं तं राजकुमारम्, अवलोक्य दृष्ट्वा, सपदि सद्यः, असुख्यत् सुखमवाप, सुख धातोः, कण्ड्वादित्वाद्यक्।

తా॥ వయస్సులో రూపములో తనకు సమానుడై, సుందరుడై, తామర పువ్వులాంటి కన్నులు చంద్రబింబమువంటి ముఖమును గలిగి సజ్జనస్తుతిపాత్రుడును వినయవినమితోత్తమాంగుడునైయున్న యా రాజపుత్రునిగాంచి యీ తారకుడు మిక్కిలి యానందించెను.

In beauty and in age, the prince felt that *Taraka* was a match for him. *Taraka* too was happy to look at the beautiful face of the prince with lotus eyes, who is as beautiful as the moon, the handsome man who is worthy of praises by the virtuous and humble.

४१. **अवनिपतिकुमारो धारुणीदेवमौलिं सहृदयमपि पुंसां मोहनाकारयुक्तम् ।**
तमपरिमिततेजश्शालिनं सर्ववेदं सकलगुणनिधिं सोऽवन्दतावाप्तकामम् ॥

व्या :- अवनिपतीति :- सः अवनिपतिकुमारः राजपुत्रः, सहृदयं शोभनहृदयं, पुंसामपि पुरुषाणामपि, मोहनः आकर्षकः यः आकारः रूपं तेन युक्तं, जगन्मोहनमित्यर्थः। अपरिमितेन अत्यधिकेन तेजसा शालिनं सहितम्, अधिकतेजोवन्तमित्यर्थः, सर्ववेदं सकलवेदवेदिनं, सकलगुणनिधिं सर्वगुणनिधानम् अवाप्तकामं पूर्णकामं, निष्काममित्यर्थः, तं धारुणीदेवमौलिं ब्राह्मणश्रेष्ठं तारकम्, अवन्दत अनमत्, वदि अभिवादनस्तुत्योः इति धातोर्लङ्।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ పురుషులనుగూడ మోహింపజేయు రూపముతో ఉత్తమమైన మనస్సుతో, అపరిమితమైన తేజస్సుతోనొప్పుచు, సర్వవిద్యావిశారదుడై సకలగుణనిధియై సంపూర్ణకాముడైయున్న యా తారకునకు రాజపుత్రుడు నమస్కారమును గావించెను.

The prince greeted *Taraka* whose beauty would make even men fall in love with him, who is good hearted, radiant, had scholarliness and who had all his desires fulfilled(*sampoorna kamah*)

४२. द्रुतलयपरिमेयं गीतमुद्बुद्धतारं बहुगुणललितं सङ्गायवाग्गेयकारः ।
अनुपमकविराजोऽवक्सदाशीर्वचांसि क्षितिपतिवरसूनोस्स प्रवृद्ध्यै स्मितास्यः॥

व्या :- द्रुतेति :- वाग्भिः गातुं योग्यं गेयं वाग्गेयं तत्करोतीति वाग्गेयकारः, न विद्यते उपमा सादृश्यं यस्य सः अनुपमः कवीनां राजा कविराजः कविश्रेष्ठः ''राजाहस्सखिभ्यष्टच्'' इति टच्, सः तारकः, द्रुतलयेन द्रुताख्येन लयविशेषेण, परिमेयं परिमातुं योग्यम्, उद्बुद्धः विकसितः तारः तारस्वरः यस्य तत्, बहुभिः गुणैः रागलक्षणैः ललितं मनोहरं, गीतं गानं, सङ्गाय सम्यक् गात्वा स्मितास्यः हासालङ्कृतवदनस्सन् क्षितिपतिवरसूनोः राजकुमारस्य, प्रवृद्ध्यै अभिवृद्धये, सन्ति योग्यानि आशीर्वचांसि आशीर्वादान्, अवक् अवोचत्, वच परिभाषण इति धातोर्लङ्।

తా॥ ఆ తారకుడు కవిరాజు, వాగ్గేయకారుడు అందుచే నాతడు తారస్థాయిలో ద్రుతలయతో చక్కనిరాగము నాలపించి మంచిమాటలతో నా రాజకుమారుని ఆశీర్వదించెను.

Taraka, the composer and the lyricist sang in full throat in a beautiful tune and blessed the prince in sweet words.

४३. परिजन उभयोरन्योन्यसख्यं चिकीर्ष्वोर्द्विजनृपसुतयोर्द्रागिङ्गितं बोबुधित्वा।
मणिवलयवदेषोऽद्वैतयोरिद्वयोगोऽभवदिति स समस्तो निर्भरानन्दमाप्नोत्॥

व्या :- परिजनेति :- सः समस्तः परिजनः सर्वपरिवारजनः अन्योन्यसख्यं परस्परमैत्रीं, चिकीर्ष्वोः कर्तुमिच्छतोः, उभयोः, द्विजसुतश्च नृपनुतश्च द्विजनृपसुतौ

In Public domain. Digitization Muthulakshmi Research Academy

द्विजकुमारराजकुमारौ तयोः। ''द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकं सम्बध्यते'' इति न्यायेन सुतशब्दस्य उभयत्राप्यन्वयः, इङ्गितं हृद्गतं भावं, बोबुधित्वा नितरां विज्ञाय, अद्य इदानीम् एतयोः कुमारयोः, एषः अयम्, इद्धयोगः प्रकाशमानः मैत्रीसम्बन्धः मणिवलयवत्, मणिना रत्नेन वलयवत् कङ्कणमिव, वलयेन कङ्कणेन मणिवत् रत्नमिव, अभवत् आसीत्, इति इत्थं, निर्भरानन्दं सम्पूर्णप्रीतिम्, आप्नोत् अवाप आप्लृ व्याप्तौ इति धातोर्लङ्। उपमालङ्कारः।

తా॥ ఆ రాజకుమార విప్రకుమారులిరువురు నొకరితోనొకరు మైత్రిగావింప నుత్సుకులైరి. వారి యభిప్రాయమునచ్చటనున్న పరివారజనము బాగుగాగ్రహించి, స్వర్ణకంకణముతో రత్నము, రత్నముతో స్వర్ణకంకణము కలియునట్లు వీరిమైత్రి గొప్పగానున్నదని మిక్కిలి యానందించెను.

Both the prince and *Taraka* were eager to befriend each other. Having sensed the intention of the two, the people around were happy that their friendship looked great like the golden bracelet and a precious stone that complement each other.

४४. तरुणपुरुषरत्नं सर्वविद्यासनाथं क्षितिपतितनयस्स्वच्छन्दशीलं विदित्वा ।
सपदि स निजपित्रे दर्शयिष्यन्विनीतं यवनहयमसावारोहयद्भूमिदेवम् ॥

व्या :- तरुणेति :- सः अयं क्षितिपतितनयः सोऽयं राजकुमारः, भूमिदेवं भूसुरं तारकं, तरुणं युवानं, पुरुषरत्नं पुरुषश्रेष्ठं ''जातौ जातौ यदुत्कृष्टं तद्रत्नमिति गीयते'' इति सूक्तिः सर्वविद्याभिस्सनाथं युक्तं, स्वच्छन्दशीलं स्वतन्त्रस्वभावं च, विदित्वा ज्ञात्वा, सपदि तदानीमेव, स्वपित्रे स्वजनकाय, दर्शयिष्यन् दर्शनं कारयितुमिच्छन्, विनीतं सुशिक्षितं, यवनहयं यवनाश्वम्, आरोहयत् आरोहयामास, आङ् पूर्वक रुह बीजजन्मनि प्रादुर्भावे चेति धातोः ण्यन्ताल्लङ्।

తా॥ ఈ విప్రకుమారుడు యువకుడు, పురుషశ్రేష్ఠుడు, సకల విద్యాపారంగతుడు స్వతంత్రుడు అని గ్రహించి యా రాజకుమారుడు వానిందన తండ్రికి జూపింపదలంచి, మచ్చికపడిన మంచి యాజానేయాశ్వముపై నా తారకుని గూర్చుండబెట్టెను.

In Public domain. Digitization Muthulakshmi Research Academy

Assuming rightly that this young chap to be the best among men, learned, independent, the prince wanted to introduce *Taraka* to his father and hence got him a tamed horse to ride on.

४५. गगनमणिरिव स्वच्छन्दभावोऽतिरस्य त्तिमिरमिव महानास्तिक्यमौरस्यदत्र।
आकलयदिव तेजो ज्योतिरिङ्गोऽल्पविद्वान् समचरदिव घूकः प्राङ्मतस्थापकारिः॥

व्या :- गगनमणिरिति :- अत्र नगरे, स्वच्छन्दभाव इव स्वतन्त्रभाव इव, गगनमणिः सूर्यः, अतिरस्यत् अन्तर्धानमगच्छत्। महानास्तिक्यमिव अत्यधिकनास्तिक भाव इव, तिमिरम् अन्धकारः' औरस्यत् बलिष्ठमभूत्, ''तिरस्-उरस्-इति कण्ड्वादिगणे धातू, ताभ्यां कण्ड्वादिभ्यो यक्'' इति यक् प्रत्ययः, यगन्तस्य ''सनाद्यन्ता धातवः'' इति धातुसंज्ञा, ततो लङ् अतिरस्यत्, औरस्यत् - इति रूपे अल्पविद्वानिव अल्पज्ञः पण्डित इव, ज्योतिरिङ्गः खद्योतः, तेजः कान्तिम्, अकलयत् अवाप्नोत्, कलगतौ सङ्ख्याने च इति धातोर्लङ्। प्राङ्मतस्थापकाः प्राचीनाः मतस्थापकाचार्याः, तेषाम् अरिः इव शत्रुरिव मतविरोधीवेत्यर्थः, घूकः उलूकः समचरत् सम्यक् सञ्चचार, स्पूर्वकचर गताविति धातोर्लङ् मालोपमालङ्कारः।

श्लोकेऽस्मिन्नात्रिर्वर्ण्यते नगरसाम्येन। राजान्तःपुरप्रवेशसमये रात्रिरासीदिति च सूच्यते।

अत्र नगरे स्वतन्त्रभाव इव सूर्यः अन्तर्धानमवाप, नास्तिकभाव इव अन्धकारः बलीयानभूत्। अल्पज्ञ इव खद्योतः तेजस्वी बभूव, प्राचीनमतविरोधीव उलूकः समन्ततः चचार।

తా॥ ఇందు సూర్యాస్తమయముతో రాత్రి వర్ణింపబడుచున్నది. వీరు రాజాంతఃపురమును జేరుసరికి రాత్రియయ్యెనని సూచింపబడుచున్నది.

ఈ నగరమున స్వతంత్రభావ మంతరించినట్లు సూర్యుడస్తమించెను. నాస్తిక్యభావము ప్రబలమయినట్లు చీకటి దట్టముగ వ్యాపించెను. అల్పజ్ఞుడు తన ప్రతిభను జూపుచున్నట్లు మిణుగురు పురుగు మిలమిల మెఱయుచుండెను. ప్రాచీన మత విరోధి యంతట తిరుగునట్లు గుడ్లగూబ యంతట దిరుగజొచ్చెను.

In Public domain. Digitization Muthulakshmi Research Academy

సూర్యుడస్తమింపగనే చీకటి వ్యాపించుటయు మిణుగురులు మెఱయుటయు గుడ్లగూబలు తిరుగుటయు సహజము. ఇది రాత్రి లక్షణము.

(By the time they reached the king's palace it was sunset time) The sun had set withdrawing light, that resonated with the death of people's sovereignty over themselves. The thick darkness resembled the ignorance and atheism prevalent in the kingdom. The glowworm flashing light was here and there with its movement like a man of poor knowledge. An owl flew everywhere like a profane, sacrilegious person campaigning against religion.

४६. उडुगण इव शिष्टाचारवारोऽप्यराजत्तुहिनकिरणशोभेवाभ्युदैद्दैवभक्तिः।
तत इव समफुल्लत्कैरवश्रीस्समन्तादुरुतरनिरतिस्स्वच्छन्दजीवे जनस्य।।

व्या :- उडुगण इति :- ततः अनन्तरम्, उडुगणः नक्षत्रसमूहः शिष्टाचारवारमिव शिष्टाचारसमूहः इव, व्यराजत् अराजत विपूर्वक राजृ दीप्ताविति धातोर्लङ्। तुहिनकिरणस्य चन्द्रस्य शोभा कान्तिः दैवभक्तिः इव देवताप्रीतिरिव, अभ्युदैत् अभिवृद्धा अभूत्। अभिपूर्वक इण् गताविति धातोर्लङ्, कैरवश्रीः कुवलयशोभा, जनस्य मानवस्य, स्वच्छन्दजीवे स्वतन्त्रजीवने, उरुनिरतिरिव अधिकासक्तिरिव, समफुल्लत्, विकसिता आसीत्, समपूर्वक फुल्लविकसने इति धातोर्लङ्। उपमालङ्कारः।

तत्र नगरे नक्षत्रसमूहाः शिष्टाचार इव रराज। चन्द्रकान्तिः दैवभक्तिरिव वृद्धिमगमत्। कुवलयशोभा जनस्य स्वच्छन्दजीवनासक्तिरिव समन्ताद्विकासमवाप, पूर्ववदत्रापि रात्रिवर्णनमेव नगरसाम्येन निरुपितम्।।

తా।। నక్షత్రగణము శిష్టాచారమువలె మిలమిల మెఱయుచుండెను. చంద్రకాన్తి దైవభక్తివలె వెలుగుచుండెను. కలువలశోభ మానవులందలి స్వేచ్ఛాజీవనాసక్తివలె నంతట వికసించెను.

ఈ శ్లోకద్వయమందు రాత్రి వర్ణనముద్వారా నగర జన జీవితము నిరూపింపబడెను.

In Public domain. Digitization Muthulakshmi Research Academy

The stars brightly twinkled religiously, the moon light shined like devotion to god, the luster of the lotuses resembled the human race's want for free lives.

४७. चतुरतरधरित्रीदेवता वाजिराजं परिचितमिव धृत्वा लीलयाऽसौ खलीनम्। सहनृपतिसुतेनास्कन्दिताक्लिष्टगत्याऽगमयदनरिबाधं संल्लपन्राजसौधम्॥

व्या :- चतुरतरेति :- असौ चतुरतरधरित्रीदेवता अतिनिपुणः भूसुरः, लीलया विलासेन, खलीनं कविकां, "कविका तु खलीनोऽस्त्री" इत्यमरः। धृत्वा गृहीत्वा, नृपतिसुतेन राजकुमारेण, संल्लपन् सम्भाषणं कुर्वन्, परिचितमिव परिचयोपेतमिव स्थितं, वाजिराजम् अश्वरत्नम्, आस्कन्दिता नातिवेगा नातिविलम्बा, आक्लिष्टा सुखप्रदा या गतिः गमनं तया, "आस्कन्दितं धोरतिक रेचितं वल्गितं प्लुतम्' गातयोऽमी पञ्चधाराः" इत्यमरः अनरिबाधं शत्रुपीडाविरहितं राजसौधं राजप्रासादम् अगमत् अनयत्, गम्लृ गताविति धातोर्ण्यन्ताल्लङ्।

తా॥ నిపుణమతియగు నా తారకుడు, విలాసముగా కళ్ళెమును బట్టుకొని, పరిచయమున్న దానివలెనున్న యా గుఱ్ఱమును నడిపించుచు, రాజకుమారునితో మాటలాడుచు సహజగమనమున నెట్టి యాటంకములు లేకుండ రాజభవనము చేరెను.

The skillful *Taraka,* nonchalantly holding the bridle of the horse which behaved as though it was well acquainted with him, held a conversation with the prince as he rode to the palace.

४८. हयवरमथ हित्वा स्वस्तिकं सोऽतिरिच्या द्भुतकरबहुदीपैर्दीप्यमानो महात्मा। नृपतिसुतग्रहीतस्वीयहस्तो मुदा प्रा विशदधिपगृहानारुह्य सोपानपालिम्॥

व्या :- हयवरमिति :- अथ अनन्तरं, सः महात्मा महानुभावस्स तारकः, हयवरम्, अश्वराजं, हित्वा त्यक्त्वा, स्वस्तिकं प्राचीद्वारं गृहं, "स्वस्तिकस्सर्वतो भद्र" इत्यमरः। अतिरिच्य अतिक्रम्य, अद्भुतकरैः आश्चर्यदायकैः बहुभिः अनेकैः दीपैः, प्रदीपैः, दीप्यमानः प्रकाश्यमानः, नृपतिसुतेन राजकुमारेण, गृहीतः स्वीकृतः,

In Public domain. Digitization Muthulakshmi Research Academy

स्वीयहस्तः स्वकरः यस्य सः, मुदा प्रीत्या, सोपानपालिं सोपानपङ्क्तिम् आरुह्य अधिष्ठाय, अधिपगृहान् राजभवनम्, अत्र गृहशब्दो नित्यबहुवचनः पुंलिङ्गश्च ''गृहाः पुंसि च भूम्न्येव'' इत्यमरः। प्राविशत् प्रविवेश, प्रपूर्वक विश प्रवेशने इति धातोर्लङ्।

తా॥ ఆ తారకుడు వెంటనే గుఱ్ఱమునుండి దిగి, తూర్పుదేవిడీగల భవనమును దాటి, మధ్యమధ్య చిత్రవిచిత్రములైన దీపకాంతులలో వెలుగుచు, రాజకుమారుడు తన చేతినందుకొని నడచుచుండ, సంతోషముగా మెట్లన్నియును దాటి రాజసౌధమును బ్రవేశించెను.

After dismounting the horse, *Taraka* crossing the fort-gate with north entrance with hand in hand with the prince, looking bright in the light of wonderful lamps entered the king's palace.

४९. सवयसमनिरुद्धं रूपवन्तं कुलीनं कृतिनमवनिदेवं रञ्जकं लब्धवर्णम् ।
गुरुमिह भजनीयं मे पितोपादिशत्प्रागभजमिति तथैवेत्सम्मदं राजपुत्रः ।।

व्या :- सवयसमिति :- इह अस्मिन्जीविते सवयसं समानवयस्कम्, अनिरुद्धं स्वतन्त्रं, रूपवन्तं सुन्दरं, कुलीनं सत्कुलसमुत्पन्नं, कृतिनं निपुणं, रञ्जकं वाक्चेष्टादिभिर्मनोहरं, लब्धवर्णं विचक्षणं, अवनिदेवं भूसुरं, भजनीयं सेवनीयं, गुरुम् आप्नुहि लभस्व, इति, प्राक् पुरा, पिता मुञ्जनकः, मे मह्यम् उपादिशत् उपदिदेश, उपपूर्वक दिश अतिसर्जने इति धातोर्लङ्। अहं, तथैव पित्रुक्तप्रकारेणैव तादृशं गुरुम्, अभजम् प्राप्नवम्, इति, राजपुत्रः राजकुमारः, सम्मदं प्रमोदं, ऐत् अवाप। भज सेवायामिति धातोर्लङ्। इण् गताविति धातोर्लङ्।

తా॥ సమానవయస్కుడు, స్వతంత్రుడు, సుందరుడు, ఉత్తమకులసంజాతుడు, నేర్పరి, పండితుడు, మనోరంజకుడు నయిన బ్రాహ్మణుని గురువునుగాజేసికొని యాతని సేవింపుమని నాతండ్రి నా కింతకుముందే చెప్పియుండెను. నేడట్లే యట్టి గురువును నేను పొందగలిగితినని యా రాజకుమారుడు మిక్కిలి యానందించెను.

The prince told thus- My father had told me to look for someone who is of my age, who is independent, who is good to look at, and who can keep me in good spirits in order to make him my guru. I am excited to find my guru in you with all these qualities.

५०. सपदि स कृतकृत्यं पण्डितं भोजयित्वा परिषदमथ नीत्वाऽकुण्ठितं राजकीयाम्।
पितरमधिकविद्याकौतुकं स्वं वदान्यं तमवनिपतिपुत्रोऽदर्शयद्भूमिदेवम्॥

व्या :- सपदीति :- सः अवनिपतिपुत्रः सोऽयं राजकुमारः सपदि सद्यः, कृतकृत्यं निर्वर्तितकर्मकलापं, पण्डितं विद्वांसं तारकं, भोजयित्वा भोजनादिना तर्पयित्वा, अथ ततः, राजकीयां राजसम्बन्धिनीं, परिषदं सभाम्, अकुण्ठितं निर्निरोधं यथा तथा, नीत्वा प्रापय्य, अधिकविद्यासु कौतुकं कुतूहलिनं, वदान्यं दातारं, स्वं पितरं स्वजनकं, तं भूमिदेवं तं भूसुरं तारकम् अदर्शयत् दर्शयामास, दृशिर् प्रेक्षणे इति धातोर्ण्यन्ताल्लङ्।

తా॥ స్నానసంధ్యాది కర్మకలాపములను నెరవేర్చుకొనియున్న యా తారకునకు వెంటనే భోజనమును పెట్టించి, యా రాజకుమారుడా తారకుని రాజసభకెట్టి యాటంకములు లేకుండ గొనిపోయి, విద్యాసక్తుడు వదాన్యుడునగు తన తండ్రి కాతని జూపెను.

After the ablutions and daily prayers *Taraka* was served food and the prince escorted him to the king's palace and there he was introduced to the king who had great interest in studies and who was a great donor.

५१. द्विजतनयमुदारं सर्वविद्यावतारं धरणिपतिवरेण्योऽश्मश्रुजातं विलोक्य।
निटलघटितहस्तद्वन्द्व आर्यं प्रणम्याशु तममितमुदोपावेशयद्रत्नपीठम्॥

व्या :- द्विजेति :- धरणिपतिवरेण्यः राजश्रेष्ठः, उदारं महान्तं, सर्वविद्या यस्मिन्नवतरन्ति स सर्वविद्यावतारः, सकलविद्यापरिपूर्ण इत्यर्थः, तम्, अश्मश्रुजातम् अजातश्मश्रुं, द्विजतनयं ब्राह्मणकुमारं विलोक्य वीक्ष्य, निटलतटे फालभागे घटितं

In Public domain. Digitization Muthulakshmi Research Academy

विन्यस्तं, हस्तद्वन्द्वं करद्वयं येन सः, करतलालङ्कृतफालभागस्सन्नित्यर्थः, आर्यं पूज्यं, तं तारकं, प्रणम्य नमस्कृत्य, आशु शीघ्रम्, अमितमुदा अधिकप्रीत्या, तं बालकं ब्राह्मणपुत्रं, रत्नपीठं रत्नासनम् उपावेशयत्, संन्यवेशयत्। उपपूर्वक विशप्रवेशने इति धातोः ण्यन्ताल्लङ्।

తా॥ గడ్డము మీసమురాని లేత వయస్సులోనే సర్వవిద్యావిశారదుడై వదాన్యుడై యొప్పు నా బ్రాహ్మణ బాలకునింగాంచి, యా రాజన్యశ్రేష్ఠుడు తన తలపై జేతులుజోడించుకొని నమస్కరించి వెంటనే పరమానందముతో నా తారకుని రత్నాసనముపై గూర్చుండబెట్టెను.

The king was taken by surprise to look at *Taraka,* who even before puberty had mastered every possible branch of studies. In extreme happiness saluted the Brahmin boy and offered him a seat embedded with precious stones.

५२. रुचिरमुदमनायन्तार्यमालोक्य केचित् सपदि तमगुरूयन्विस्मयं प्राप्य केचित् ।
अपरिमितमुदोपाश्लोकयन्ताशु केचित् द्विजमणिमसुखायन्ताभिवन्द्यात्र केचित्॥

व्या :- रुचिरेति :- अत्र तत्सभायां, केचित् कतिचन सभ्याः, आर्यं पूज्यं तं तारकम्, आलोक्य वीक्ष्य, रुचिरं सुन्दरम् उदमनायन्त सोत्सुका अभवन्, केचित् सपदि सद्यः, विस्मयम् आश्चर्यं प्राप्य तं तारकम् अगुरूयन् गुरुं भावयन्ति स्म केचित्, आशु शीघ्रम्, अपरिमितमुदा अमितानन्देन, उपाश्लोकयन्त अवर्णयन्, केचित् द्विजमणिं ब्राह्मणश्रेष्ठम्, अभिवन्द्य अभिवादनं कृत्वा, असुखायन्त स्वीयं सुखं वेदयामासुः उत्पूर्वकमनश्शब्दात् क्यङि लङ्। गुरुशब्दात् क्यचि लङ्, उपपूर्वक श्लोकृ धातोः णिचि लङ्। सुखशब्दात् क्यङि लङ्।

''सुखादिभ्यः कर्तृवेदनायाम्'' इति क्यङ्। स्वीयसुखवेदनायामेवायं क्यङ्। परस्य सुखवेदनायान्तु 'परस्य सुखं वेदयते' इति व्यस्तरूपमेव, न वृत्तिः।

తా॥ ఆ సభలోనున్న సభ్యులలో గొందరా తారకునిజూచి, యుత్సుకులయిరి మరికొందరాతని గౌరవించిరి. ఇంకొక కొందరు కీర్తించిరి. వేరొక కొందరు నమస్కరించి సుఖవంతులమని తెలిపిరి.

In Public domain. Digitization Muthulakshmi Research Academy

After looking at *Taraka*, a few in the king's court became enthusiastic to know more about him, a few started praising as yet a few other exchanged pleasantries.

**५३. अभिनवरुचिरोहाचित्रसत्काव्यसृष्टेरपि सकलजनानां मोहकृद्गानशक्तेः।
प्रमदबहुलपारावारमध्ये न्यमज्ञन्नखिलविबुधवन्द्यस्यास्यराण्मुख्य सख्याः॥**

व्या :- अभिनवेति :- राण्मुख्यसख्याः राजवरेण्यसभासदः, निखिलविबुधैः सर्वपण्डितैः वन्द्यस्य नमस्करणयोग्यस्य, अस्य तारकस्य, अभिनवा नूतना रुचिरा मनोहरा या ऊहा भावना तया चित्रं यत् सत् उत्तमं काव्यं ग्रन्थः तस्य सृष्टेः निर्माणात्, सकलजनानां सर्वेषामपि मोहकृत् अत्यानन्ददायकं यत् गानं गीतं तस्य शक्तेः प्रभावाच्च, प्रमदेन आमोदेन बहुलः पूर्णः यः पारावारः समुद्रः तस्य मध्ये, आनन्दसागरमध्य इत्यर्थः, न्यमज्ञन् निमग्ना बभूवुः, निपूर्वक मर्जि धातोर्लङ्।

తా॥ ఆ రాజసభలోని సభ్యులందరును సర్వవిబుధ వంద్యుడైన యా తారకునియొక్క, మనోహరకల్పనలతో నపూర్వముగానున్న కవితాచమత్కృతికిని, సర్వులను ముగ్ధులనుగావించు గాన శక్తికిని, పరవశులై యానందసాగరమున మునింగిరి. పరమానంద మనుభవించిరి.

Euphoria surrounded *Taraka* as everyone present there were swept off their feet at his inimitable, spontaneous, creative poetic charm and by his mellifluous voice.

**५४. कवितिलकमुपास्याऽथाच्छगत्यास्य सख्यं हितकरमभिवाद्याऽसौ समस्तागमज्ञम्।
स्वसुतमिव विभूष्य क्षोणिभर्ता स्वयं तं सुखमुचितनिवासेऽवासयद्भूमिदेवम्॥**

व्या :- कवितिलकमिति :- अथ अनन्तरम् असौ क्षोणिभर्ता स राजा, कवितिलकं कविश्रेष्टम्, अच्छगत्य अभिमुखं गत्वा, अच्छ इत्यव्ययस्य ''अच्छगत्यर्थवदेषु'' इत्यनेन गतिसंज्ञायां, ''कुगतिप्रादयः'' इत्यनेन गतिसमासे क्त्वोल्यबादेशे रूपमिदम्, उपास्य संसेव्य, सख्यं मैत्रीम्, आप्य प्राप्य, अभिवाद्य नमस्कृत्य, समस्तागमज्ञं सर्ववेदशास्त्रवेत्तारं, तं. स्वसुतमिव स्वपुत्रमिव, स्वयं

In Public domain. Digitization Muthulakshmi Research Academy

विभूष्य स्वयमेवाभरणैरलङ्कृत्य, उचितनिवासे समुचितभवने, भूमिदेवं भूसुरं, तं तारकं, सुखं सुखं यथातथा, अवासयत् न्यवेशयत्, वसनिवासे इति धातोः ण्यन्ताल्लङ्।

తా॥ పిమ్మట నా రాజు కవిశ్రేష్ఠుడయిన యా తారకున కెదురుగానేగి, సేవించి, మైత్రివిగాంచి, మిత్రుడయిన యాతనికి నమస్కరించి, తనంతట తాను స్వయముగ జక్కని యాభరణములతో దన కుమారు నలంకరించినట్లలంకరించి, మంచి భవనమున వానిని సుఖముగా నుండునట్లు గావించెను.

The king within no time befriended *Taraka,* went to him and adorned him with gorgeous ornaments as he would do to his son and arranged a comfortable stay for him in one of the palaces.

५५. उदभवदिव कल्यं प्रेम वेदाधिकारेऽरटदिव बलिपुष्टोऽसम्प्रदायानुवादी ।
अरुणरुचिरिव स्वच्छन्दजीवे चिदासीदरजदिव रथाङ्गस्स्वीयदेशाभिमानी॥

व्या :- उदभवदिति :- कल्यं उषःकालः ''प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि'' इत्यमरः, वेदाधिकारे वेदमार्गे प्रेमेव स्नेह इव उदभवत् आविर्बभूव। उदयमियायेत्यर्थः। उत्पूर्वक भू धातोर्लङ्। बलिपुष्टः काकः, ''काकेतु करटारिष्ट बलिपुष्ट सकृत्प्रजाः'' इत्यमरः, असम्प्रदायानुवादीव सनातनसदाचारविरोधीव, अरटत् दध्वान, रट ध्वनाविति धातोर्लङ्। अरुणरुचिः अरुणकान्तिः।

स्वच्छन्दजीवे स्वेच्छाजीवने चिदिव चैतन्यमिव आसीत् बभूव, रथाङ्गः चक्रवाकः, ''कोकश्चक्रः चक्रवाको रथाङ्गाह्वयनामकः'' इत्यमरः, स्वीयदेशाभिमानीव, स्वदेशाभिमानीव अरजत् अतुष्यत्, रञ्ज् रागे इति धातोर्लङ्।

उषः कालः वेदमार्गाभिमान इवाविरभूत्। काकः सनातनसम्प्रदायविरोधीव अरटत्, अरुणोदयकान्तिः स्वतन्त्रजीवने चैतन्यमिवोदचलत्, चक्रवाकः स्वदेशाभिमानीव अतुष्यत् अत्र सूर्योदय उपपर्णितः उपमालङ्कारः।

 In Public domain. Digitization Muthulakshmi Research Academy

తా॥ వేదమార్గమున ప్రేమ యుదయించినట్లు ఉషః కాలమారంభమయ్యెను. సనాతన సమ్ప్రదాయ విరుద్ధవాది యరచునట్లు, కాకి యరవ నారంభించెను. స్వచ్ఛన్దజీవనునియందు చైతన్యమువలె నరుణకాంతి ప్రకాశించుచుండెను. దేశాభిమానివలె జక్రవాక పక్షి సంతసించెను. ఉషఃకాలముకాగానే కాకులరచును. పిమ్మట నరుణోదయమగును. స్వేచ్ఛాజీవులకు జైతన్యము లభించును, వియోగముతో నున్న చక్రవాకము సంతసించును. ఇట్లు సూర్యోదయము లోకమునకు సరిపోల్చి చక్కగ వర్ణింపబడెను.

There rose the Sun and with its warm rays it appeared as though the love for Vedic tradition and culture had reappeared. Contrarily a crow started to caw like the shriek of an opponent of *sanatana dharma*. The bright rays of the rising sun resembled the vitality of the one who lives with a free spirit. Sunrise is a great relief for the *chakravaka* bird who suffers the night long separation and who eagerly waits for the company of his mate. And the sunrise brings a new hope to a patriot. On the whole, yet another sunrise brings with it a lot of aspirations to all the creatures.

५६. सततमनुचरन्तौ सर्वशास्त्रप्रमाणं मुहुरभिजनयोगक्षेममालोचयन्तौ ।
द्विजसुतनृपपुत्रावध्यतिष्ठासतां तौ बहुनिपुणतयैकग्रीवमुद्दिष्टकार्यम् ॥

व्या :- सततमिति :- तौ द्विजसुतनृपपुत्रौ ब्राह्मणराजकुमारौ, सततं नित्यं, सर्वशास्त्रप्रमाणं सर्वशास्त्रजन्यप्रमाणज्ञानं अनुचरन्तौ अनुसृत्य सञ्चरन्तौ, मुहुः पुनः अभिजनस्य जन्मभूमेः योगम् अप्राप्तस्य प्राप्तिं, क्षेमं प्राप्तस्य रक्षणञ्च, आलोचयन्तौ, चिन्तयन्तौ बहुनिपुणतया अधिककुशलत्वेन, एकग्रीवम् ऐककण्ठ्यम्, उद्दिष्टकार्यं निश्चितकरणीयं कार्यम्, अध्यतिष्ठासताम्, साधयितुमिच्छन्तावभूताम्। अधिपूर्वक स्था धातोः सन्नन्ताल्लङ्।

తా॥ ఆ కుమారులిరువురును వేదప్రమాణముననుసరించుచు, మాటిమాటికి దమ జన్మభూమి యోగక్షేమములంగూర్చి యాలోచించుచు మంచి నేర్పరులగుటచే నెట్టి భేదాభిప్రాయములు లేనివారలయి, స్వసంకల్పిత నిశ్చితకార్యముల నెరవేర్ప గోరుచుండిరి.

In Public domain. Digitization Muthulakshmi Research Academy

The duo always thought about the welfare of their motherland and followed everything as prescribed by the Vedas. Both the young ones were efficient and longed to do things agreed upon without any differences.

५७. स्वयमचिरमुपज्ञावैभवेनोपलभ्या ञ्चितचतुरगुरूणां बोधनेन प्रबुध्य ।
प्रथितसकलविद्याचारभाषाजगत्याः समजिगमिषतां तौ मन्दिरं स्वाधिपानाम्॥

व्या :- स्वयमिति :- तौ कुमारवरौ, जगत्याः भूमेः प्रथिताः प्रख्याताः याः सर्वाः विद्याः, आचाराः प्रवर्तनपद्धतयः, भाषाः ताः, स्वयम् उपज्ञा वैभवेन स्वाद्यज्ञान प्राभवेन, "उपज्ञा ज्ञानमाद्यं स्या" दित्यमरः अचिरं शीघ्रम्, उपलभ्य सम्पाद्य, अञ्चिताः पूज्याः चतुराः निपुणाः ये गुरवः आचार्याः, तेषां बोधनेन उपदेशेन, प्रबुध्य ज्ञानं लब्ध्वा, स्वाधिपानां स्वप्रभूणां, सार्वभौमानामित्यर्थः, मन्दिरं भवनं सार्वभौमनिवासस्थानमित्यर्थः। समजिगमिषताम्, सम्यग्गन्तुमैच्छताम्, सम्पूर्वकगम्लृ गताविति धातोस्सन्नन्ताल्लङ्।

तत्कुमारद्वयमतिशीघ्रकालेन स्वबुद्धिकौशलेन स्वयमेव सर्वा विद्याः सकलाः भाषाः सर्वदेशाचारांश्च विदित्वा अनन्तरं पूज्यगुरूपदेशेन परिपूर्णं विज्ञानमाकलय्य, भारतसार्वभौमनिवासस्थानं गन्तुमैच्छदिति भावः।

తా॥ ఆ బ్రాహ్మణ రాజకుమారులిరువురును, స్వోపజ్ఞా ప్రభావమున, స్వయముగ నచిరకాలమున, అన్ని విద్యలను, అన్ని దేశభాషలను అన్ని దేశముల యాచార వ్యవహారములను, ఎఱింగి, గురూత్తముల నాశ్రయించి, వారి యుపదేశమహిమచే మంచి జ్ఞానవంతులై భారతదేశమునకు సార్వభౌములైయున్న పాశ్చాత్య ప్రభువుల నివాస స్థానమునకు బోవ సంకల్పించుకొనిరి. పాశ్చాత్యదేశ ప్రయాణము గావించ నిశ్చయించిరి.

The prince and the Brahmin boy, both being brilliant mastered all studies in no time, were able to discern different kingdoms; traditions and culture and grasped the profound knowledge from the best teachers. Now they both wanted to travel overseas to visit the home town of the foreign kings who were reining our nation Bharata.

In Public domain. Digitization Muthulakshmi Research Academy

५८. जगदधिपतिमन्वग्भूय गोपायितुं स्वे बहुविदितयुवानौ प्रार्थ्य तौ देवदेवम्।
न सुखमिति विदित्वा स्वैरितामन्तरेण प्रथितदृढमनस्कावाप्लुतां धूमनौकाम्।।

व्या :- जगदिति :- तौ बहुविदितयुवानौ बहुज्ञौ युवानौ तौ द्विजराजपुत्रौ, जगदधिपतिं सार्वभौमम्, अन्वग्भूय अनुकूलं कृत्वा, स्वे स्वदेशविषये, गोपायितुं रक्षितुं देवदेवं राजश्रेष्ठं, प्रार्थ्य अर्थयित्वा, स्वैरितामन्तरेण स्वेच्छां विना न सुखं, सुखं न भवेत्, इति विदित्वा ज्ञात्वा प्रथितं प्रख्यातं दृढं स्थिरं मनः स्वान्तं ययोस्तौ, स्थिरनिश्चयौ सन्ताविर्त्यर्थः। धूमनौकां बाष्पयानं नावम् आप्लुताम् अवापतुः आप्लृ व्याप्तौ इति धातोर्लङ्।

తా।। ఆ కుమారులిరువురును సకలవిద్యాసనాథులు, యువకులు, తమదేశ స్వాతంత్ర్య సంపాదనమునకు సార్వబౌముల యనుగ్రహమావశ్యకమనియును స్వేచ్ఛలేనిదే సుఖము లేదనియును నిశ్చయించుకొని వారిరువురును రాజును బ్రార్థించి దృఢనిశ్చయముతో ధూమనౌక కడకు (ష్టీమర్) వెళ్ళిరి.

The young, learned duo, realized the fact that there is no happiness in slavery. Hence for the freedom of their country, having known that the emperor's favor was needed, they were all set for a voyage after taking a nod from the king.

५९. सांयात्रिकमातरेणाऽप्रियेतां नाविकोत्तमम् ।
प्रीत्या साप्तपदीनेन पोतवाहं सुहृद्वरौ ।।

इति ब्रह्मश्री श्रीमदज्ञाडादिभट्टनारायणदासमहाकविविरचिते तारकाख्ये महाकाव्ये द्वितीयस्सर्गः ।

व्या :- सांयात्रिकमिति :- सुहृद्वरौ मित्रश्रेष्ठौ, तौ कुमारौ, आतरेण तरपण्येन, ''आतरस्तरपण्यं स्या'' दित्यमरः, सांयात्रिकं पोतवणिजं, ''सांयात्रिकः पोतवणिगि'' त्यमरः, प्रीत्या प्रेम्णा, नाविकोत्तमं कर्णधारश्रेष्ठं, 'कर्णधारन्तु नाविक' इत्यमरः सप्तभिः पदैः भवतीति साप्तपदीनं स्नेहः, तेन, पोतवाहं नौकायन्तारं ''नियामकाः पोतवाहाः''इत्यमरः, अप्रीयेताम् -प्रीतान् चक्रतुः।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఆ మిత్రులిరువురును నౌకాప్రయాణమున రుసుముపుచ్చుకొను వర్తకునకు సుంకము జెల్లించి, చుక్కానిపట్టు కర్ణధారుని ప్రియవాక్యముల దృప్తిపరచి, పడవనడుపువానితో మైత్రిగావించుకొని వారి ముప్వుర నానందపరచిరి.

They paid the accountant the required amount of money to travel, befriended the helmsmen, and impressed the vanguard with a pleasant talk, thus making all the three key persons of the ship happy.

इति ब्राह्मीभूषणब्रह्मश्रीराम्भट्लक्ष्मीनारायणशास्त्रिविरचितायां भावार्थदीपिकाख्यायां व्याख्यायां द्वितीयस्सर्गः।

In Public domain. Digitization Muthulakshmi Research Academy

तारके तृतीयस्सर्गः

लिडधिकारः

१. धुन्वन्तौ देहसौख्याभिमानं धूममिव द्विजौ ।
श्रितांस्तारयितुं कोलाञ्चक्रतुस्स्वौ भवाम्बुधेः ॥

व्या :- धुन्वन्ताविति :- द्विः जायत इति द्विजः, तौ द्विजन्मानौ ब्राह्मण क्षत्रियकुमारौ, मातृगर्भान्निर्गमनं प्रथमं जन्म, उपनयनसंस्कारः, द्वितीयं जन्म, लोके ब्रह्मक्षत्रियविशां द्विजत्वं प्रसिद्धम्। देहसौख्ये स्वशरीरसुखे, अभिमानम् आदरं, धूममिव, धुन्वन्तौ परित्यजन्तौ, भवाम्बुधेः संसारसागरात्, श्रितान् आश्रिताञ्जनान्, तारयितुं तीर्णान्कर्तुं, स्वौ स्वात्मानौ कोलाञ्चक्रतुः कोलवदकुरुताम् "उडुपन्तु प्लवः कोलः" इत्यमरः।

यथा धूमनौका धूममुत्सृजन्ती स्वसंनिविष्टाञ्जनान् सागरं तारयति, तथा एतौ युवानौ स्वदेहसुखं परित्यज्य स्वजनानुद्धर्तुम् उद्युक्तावभूताम्।

द्विजयोः कोलत्वकथनेन रूपकालङ्कारः। नामधातुत्वे कृञ् धातोरनुप्रयोगे लिट्।

తా॥ ధూమనౌక పొగను బయటికి జిమ్ముచు తనయందున్న జనులను సముద్రమునుండి దాటించునట్లు, ఈ ద్విజరాజకుమారులిరువురు తమ్మాశ్రయించిన జనుల నుద్ధరించుటకై సిద్ధపడిరి. ఆ కార్యక్రమమున వారు నిజదేహసుఖమును గూడ బరిత్యజించిరి.

The steamboat toils hard giving out the steam in order to ferry the passengers on the sea, safely to the shore. Similarly the two young men, without paying attention to their bodily comforts, set forth to emancipate their countrymen.

२. चक्रपत्रे विधुन्वानः चलदुच्चूडचूडवान् ।
प्लवः प्रबोधयामास ध्वनङ्कुक्कुटवज्जनान् ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- चक्रपत्र इति :- चक्रे पत्रे इव चक्रपत्रे, पक्षाकारं चक्रद्वयमित्यर्थः। विधुन्वानः कम्पयन्, उन्नता उद्गता चूडा ध्वजयष्टिः यस्यास्सा उन्नतचूडा, चलन्ती उन्नतचूडा यस्यास्सा चलदुच्चूडा, चलदुच्चूडा चूडा पताका यस्यास्सा चलदुच्चूडचूडा, ''गोस्त्रियोरुपसर्जनस्ये''ति उपसर्जन ह्रस्वः, सा अस्मिन्नस्तीति चलदुच्चूडचूडवान्, प्लव इत्यर्थः, चलदुन्नतपताकालङ्कृत इति भावः, कुक्कुटोऽप्येतादृश एव, उन्नतशिखालङ्कृतशिरस्कत्वात्, तादृशः प्लवः कोलः, ध्वनन् शब्दं कुर्वन्, कुक्कुटवत् चरणायुध इव जनान् प्रयातृमानवान्, प्रबोधयामास, उपमालङ्कारः।

शिखावलः कुक्कुटः स्वपक्षौ कम्पयन् उषःकाले ध्वनिं कृत्वा, यथा मानवान् निद्रातः प्रबोधयति, तद्वदयम् उन्नतध्वजपटालङ्कृतः प्लवः स्वचक्रे कम्पयन्, उच्चैस्स्वरं कृत्वा, प्रयाणोन्मुखान्मानवान् प्रबोधयामास।

తా॥ తలపైబెద్ద పింఛముగల మగకోడి, వేకువజామున తన రెండు రెక్కలను జాడించి, పెద్దగా కూతపెట్టి నిద్రనుండి జనులను లేపునట్లు, ఎత్తయిన ధ్వజయష్టి పతాకాగ్రములతో నొప్పు నా పడవ తన రెండు చక్రములను గదుపుచు, ప్రయాణోద్యుక్తులయిన వారిని సిద్ధముగా నుండుడని బోధించునట్లు పెద్దగా గూతవేసెను.

A rooster stretches its wings and crows in the early morning thus giving a wakeup call to all. With the jack on the jack staff flying high and the two wheels all set to move, the steamboat blew a whistle alerting the passengers to be ready for the voyage.

३. वातप्रकोपं शमयन्दीपयञ्जठरानलम् ।
नौ तनोरूर्जयन्धातून्वैद्यामास स नाविकः ॥

व्या :- वातेति :- सः नाविकः कर्णधारः, वातप्रकोपं वायुवेगं, वैद्यपक्षे वातदोषाधिक्यं, शमयन् शान्तिमापादयन्, जठरानलं प्लवगर्भदेशस्थमग्निम् अन्यत्र जाठराग्निम् उद्दीपयन्, दीप्तं कुर्वन्, नौः एव तनुः शरीरं, तस्याः धातून् अवयवान् अन्यत्र रक्तमज्जादिधातुविशेषान्, ऊर्जयन् ऊर्जस्वलान् दृढान्कुर्वन्, वैद्यामास वैद्य इव बभूव। वैद्यशब्दादाचारार्थे क्विपि लिट्।

In Public domain. Digitization Muthulakshmi Research Academy

यथा वैद्यः वातपित्तकफानां मध्ये वातस्य प्रकोपं शमयन्, जाठराग्निमुद्दीपयन्, रक्तादिधातूनां पुष्टिं तनोति, तथा अयं नाविकः वायुबाधां वारयन्, गर्भस्थाग्नि-मुज्ज्वलयन्, अवयवभागान् दृढीकुर्वन्, उपचचार, श्लेषगर्भितोऽयं रूपकालङ्कारः।

తా॥ ఆయుర్వేదవైద్యుడు ముందుగ వాతప్రకోపమును దగ్గించి, అజీర్ణతను బోగొట్టుటకు జఠరాగ్నిని వృద్ధిగావించి, ధాతువులకు బుష్టినొసంగి, శరీరము నారోగ్యవంతముగావించునట్లు, ఈ నావికుడు, వాయువేగము నడ్డుకొనుచు, లోనున్న యగ్నిని మండించుచు, పడవభాగములను దృఢములుగా నొనర్చి, పడవను సిద్ధముగానుంచెను.

Just as the doctor treating the patient, first reduces the wind (*vaata*), increases the digestive fire (*jathara*), and strengthens the vital juices of the body and thus restores health, the sailor overwhelms the wind, ignites the inner fire, and steadies and readies the ship.

४. अन्तर्दधौ मही दूरे प्रज्ञान इव संसृतिः ।
पयोधिमध्ये दिक्कालभेद एव न दिद्युते ।।

व्या :- अन्तर्दधाविति :- दूरे दूरदेशे, मही भूमिः प्रज्ञाने सम्पूर्णे आत्मज्ञाने, संसृतिरिव संसार इव, अन्तर्दधौ अन्तर्धानमगात्, महीमण्डलं दृष्टिविषयमतिक्रान्त-मित्यर्थः। पयोधिमध्ये समुद्रस्य मध्यभागे, दिशां प्राच्यादीनामाशानां, कालस्य भूत वर्तमानादिकालस्य च, भेद एव विकल्प एव, न दिद्युते न ज्ञायते, डुधाञ् धारण पोषणयोरिति धातोः लिट्, द्युत दीप्ताविति धातोर्लिट्।

धूमनौकायां दूरङ्गतायां भूमिरदृष्टाऽसीत्, यदा नौका मध्येसमुद्रं गता तदा दिग्भेदः कालभेदश्च नाज्ञायेताम् इति भावः। उपमालङ्कारः स्वभावोक्तिश्च।

తా॥ ఆ ధూమనౌక సముద్రములో దూరముగ నేగుచుండ, భూమి యాత్మ జ్ఞానము కలుగ సంసారము కనబడనట్లు కానరాదయ్యెను. "జ్ఞాతే తత్త్వే కస్సంసారః" అని జగద్గురు వచనము. పడవ సముద్ర మధ్యమును ప్రవేశింపగనే, యే దిక్కే ప్రక్కనున్నదో, యెంతకాలమయినదో యేమియును దెలియబడలేదు.

In Public domain. Digitization Muthulakshmi Research Academy

As the steamboat furrowed into the water for a distance, there was no ground in the near sight, just like, for a realized soul there is no world of delusion. "*Jnate tattve kaha Samsaarah*" says Jagadguru. In the middle of the sea the passengers knew neither what the time was nor the cardinal directions.

५. क्षयवृद्धी आशयस्य जन्मभूम्यन्यराष्ट्रयोः ।
क्रमशोऽनुबभूवाते जनैर्मातृकलत्रवत् ॥

व्या :- क्षयवृद्धी इति :- जनैः नौकाप्रयातृमानवैः, जन्मभूमौ जन्मस्थले, अभिजन इत्यर्थः। अन्यराष्ट्रे राज्यान्तरे च, परराष्ट्र इत्यर्थः, आशयस्य अभिप्रायस्य, तत्सम्बन्धिनी सम्बन्धार्थे षष्ठी। क्षयश्च वृद्धिश्च क्षयवृद्धी नाशनाभिवृद्धी, मातरि जनन्यां, कलत्रे भार्यायां च, इव क्रमशः क्रमानुसारेण, अनुबभूवाते अन्वभूयेताम्। अनुपूर्वस्य भूसत्तायामिति धातोः कर्मणि लिट्। माता च कलत्रं च तयोरिव मातृकलत्रवत्। मातरीव कलत्र इव इति सम्बन्धः। उपमागर्भितः यथासङ्ख्यालङ्कारः।

यथा आदौ मातरि स्थितोऽनुरागः पश्चात् भार्यायामागतायां क्षीणो भूत्वा, तस्यां वर्धते। तथैव जन्मभूमिस्थितोऽनुरागः क्रमशः क्षयं यात्वा अन्यराष्ट्रे वृद्धिमगच्छदिति भावः।

తా॥ ముందు తల్లియందున్న ప్రేమ, భార్యరాగానే యచ్చట పెరిగి యిచ్చట క్షీణించుచుండును. అట్లే యీ పడవ యందలి జనులు మాతృభూమియందలి యభిమానమును విడుచుచు, పరరాష్ట్రమందభిమానమును క్రమముగా బెంచుకొనుచుండిరి.

The love for one's mother wanes on the arrival of the spouse. Similarly as the love for the homeland dwindled, the passion for the foreign land grew gradually to those on board.

In Public domain. Digitization Muthulakshmi Research Academy

६. भेदं भेदं कूपकेन दिवमभ्याधरातलम् ।
खानंखानमकूपारं दारं दारं जगाम नौः ॥

व्या :- भेदं भेदमिति :- नौः धूमनौका, कूपकेन गुणवृक्षकेण, नौकाध्वजेनेत्यर्थः, ''कूपको गुणवृक्षक'' इत्यमरः, दिवमभि गगनमभितः, भेदं भेदं भित्वा भित्वा, भिदिर् विदारणे इति धातोर्णमुल्, आधरातलम् आरसातलं खानं खानं खात्वा खात्वा, खन अवदारणे इति धातोर्णमुल्। अकूपारं समुद्रं, ''समुद्रोब्धिरकूपारः'' इत्यमरः। दारं दारं विदीर्य विदीर्य, द्रॄ, विदारणे इति धातोर्णमुल्, जगाम अगमत्, गम्लृ गताविति धातोर्लिट्।

తా॥ ఆ ధూమనౌక తనయం దెత్తుగానున్న ధ్వజస్తంభముచే నాకాశమును వేరుచేయుచు, అడుగుననున్న అంపముచే పాతాళమును ద్రవ్వుచు సముద్రమును జీల్చుకొనుచు బోవుచుండెను.

The boat's mast split the sky apart, and the stern wheel tore the sea water asunder.

७. दिक्सूचियन्त्रमनसा कर्णधारात्मनाऽन्विता ।
सर्वभूतमयी नौकेवाबभौ जलदेवता ॥

व्या :- दिक्सूचीति :- दिशः प्रागादीन् सूचयति बोधयति इति दिक्सूचि तत् यन्त्रं साधनं, मनः इव, तेन, मनस्सदृशदिक्सूचियन्त्रेणेत्यर्थः, कर्णधारः आत्मा चेतनेव तेन, जीविरूपनाविकेनेत्यर्थः, अन्विता युक्ता, सर्वभूतमयी सर्वप्रयातृजनसहिता, अथवा अग्निवाय्वादिभूतसहिता, अन्यत्र सकलजलजन्तुसमुपेता, नौका प्लवः, जलदेवतेव जलाधिष्ठानदेवतेव, आबभौ चकाशे, आङ् पूर्वक भा धातोर्लिट्।

यथा सकलयादोभिः मनसा जीवेन च सहिता जलदेवता भाति, तथा असौ नौका प्रयातृजनैः अग्निवाय्वादिभूतैः, दिक्सूचियन्त्रेण, कर्णधारेण च समुपेता रराजेति भावः श्लेषानुप्राणितोपमालङ्कारः।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఆ ధూమనౌకయందు దిక్కులను దెల్పు యంత్రము గలదు. చుక్కాని పట్టుకొని నావికుడు కూర్చొండెను. అగ్ని వాయ్వాది భూతములును చాలమంది ప్రయాణికులు నుండిరి. అట్టి నౌక, మనస్సుతో జీవునితో సర్వప్రాణి జాతముతో గూడిన జలాధిష్ఠాన దేవతవలె రాణించుచుండెను.

The steam boat had a machine to tell the cardinal directions, a steer man with a helm, the fire, the wind and the rest of the *panchabhutas* along with many passengers on it. The boat looked like the presiding deity of water with all the creatures with body and soul.

८. उपरिष्ठात्पार्श्वतोऽधो दर्पणीभूतवारिधेः ।
दर्शनाद्दिक्षु वियतस्सान्तराल इवाट नौः ॥

व्या :- उपरिष्टादिति :- सा नौः, असौ धूमनौका, पार्श्वतः उभयपार्श्वयोः, अधः अधोभागे च, दर्शनात् दृष्टिगोचरत्वात्, अदर्पणः दर्पणः सम्पद्यमानः भूतः दर्पणीभूतः, आदर्शीभूत इत्यर्थः, वारिधिः समुद्रः यस्य, तस्य वियतः गगनस्य, उपरिष्टात् ऊर्ध्वभागे, अन्तराले मध्यस्थले, दिक्षु सर्वासु दिशासु, आट इव सञ्चचारेव, उत्प्रेक्षालङ्कारः, अट गताविति धातोर्लिट्।

अधोभागे पार्श्वद्वये च, स्वच्छजलतया आदर्श इव स्थिते समुद्रे प्रतिबिम्बितस्य गगनस्य उपरि अन्तराले दिक्षु गच्छतीव सा नौका रराजेति भावः।

తా॥ సముద్రము స్వచ్ఛజలమగుటంజేసి, ఆ నీటియందు గగనము అద్దమందువలె ప్రతిబింబించుచుండెను. అన్నివైపుల క్రిందుమీదుల నాగగనము ప్రతిబింబించుటచే, సముద్రముపై పోవునౌక ఆకాశమున మీద, మధ్యభాగమునుండి దిక్కులకేగుచున్నదా యనునట్లుండెను.

The mirror-reflection of the sky in the clear waters rocked, giving the feeling that it was going in and above the sky and into space.

In Public domain. Digitization Muthulakshmi Research Academy

९. उत्तानेऽब्धिस्सकालुष्याऽस्थिरताऽडम्बरान्वितः ।
अल्पज्ञ इव गम्भीरे बभूवाच्छस्सुधीरिव ॥

व्या :- उत्तान इति :- सः अब्धिः समुद्रः उत्ताने गाधप्रदेशे, कालुष्येण आविलत्वेन, अस्थिरतया चाञ्चल्येन, आडम्बरेण संरम्भेण च, अन्वितः युक्तः, अल्पं जानातीत्यल्पज्ञः अल्पज्ञानी, स इव, गम्भीरे अगाधे, अच्छः निर्मलस्सन्, सुधीरिव पण्डित इव, बहुज्ञ इवेत्यर्थः, बभूव अभूत्।

यथा अल्पज्ञानी कलुषबुद्ध्या, चपलस्वभावेन, अधिकसंरम्भेण च संयुक्तो भवति तथा अयं सागरः गाधस्थले कलुषजलेन चपलतरङ्गैः अधिकाडम्बरेण च वर्तते। यद्वत् सुधीः बहुज्ञः अच्छहृदयः शान्तस्वभावः निराडम्बरश्च भवति तद्वत् अयमगाधस्थले निश्चलो निर्मलो निराडम्बरश्च बभूवेति भावः। उपमालङ्कारः भूसत्तायामिति धातोर्लिट्।

తా॥ అల్పజ్ఞుడెప్పుడును, కలుషితస్వాంతుడై చపలచిత్తుడై డాబుదర్పములతో గూడియుండును. అట్లే యీ సముద్రముకూడ లోతులేనిచోట్ల కలుషజలముతో కదలుచున్న తరంగములతో నధిక సంరంభముతో పెద్ద ధ్వనితోనున్నది. బహుజ్ఞుడైన పండితుడు నిత్యము నిర్మలస్వాంతుడై శాంతచిత్తుడై నిరాడంబరుడై యుండును. అట్లే యీ సముద్రముగూడ లోతైనచోట్ల స్వచ్ఛజలముతో నిస్తరంగమై నిరాడంబరమై యున్నది.

A man of shallow intellect is evil at heart, is wavering and has pride and vanity. In the same way, the sea where it was not so deep was with all the filth and polluted water and it screamed loud through the waves; on the other hand, the parts of the sea where it was very deep, the water was crystal clear and the waves were gentle and noiseless resembling a highly knowledgeable scholar who is composed and simple without any hype.

In Public domain. Digitization Muthulakshmi Research Academy

१०. अन्वग्भावं तरिं निन्ये सत्पथं सखिवन्मरुत् ।
भाग्ये नापुश्चिरारोग्यं सर्वे नौयात्रिका अपि ॥

व्या :- अन्वग्भावमिति :- मरुत् वायुः। तरिं नौकां, सखिवत् मित्रमिव अन्वग्भावम् अनुकूलो भूत्वा सत्पथं क्लेशरहितं पन्थानं मित्रपक्षे सत्पुरुषमार्गं निन्ये अनयत् नी प्रापणे इति धातोर्लिट्, सर्वे नौयात्रिका अपि नौकाप्रयातारः सर्वेऽपि, भाग्येन भाग्यवशेन, चिरारोग्यं चिरकालं रोगहीनताम्, आपुः अवापुः, आप्लृ व्याप्तौ इति धातोर्लिट्। उपमालङ्कारः, अग्रतः पार्श्वतः पृष्ठतो वायुः अनुकूलो भूत्वा आस्ते सः अन्वग्भाव इत्यर्थः।

यथाऽत्मानमनुसृत्यायान्तं जनं वयस्योत्तमस्सन्मार्गं नयति तथा वायुः स्वमनुसृत्यागच्छन्तं प्लवं निरातङ्कं निनाय तदा तस्मिन् स्थिता यात्रिकाः भाग्यवशादधिकमारोग्यमवापुः।

తా॥ ఉత్తమ మిత్రుడు తన్నునుసరించి వచ్చువానిని సన్మార్గమునకు గొనిపోవునట్లు అనుకూలవాయువు పడవను మంచిమార్గమునకే తీసికొని పోవుచుండెను. ఆ పడవయందలి యాత్రికులందరును భాగ్యవశమున ఆరోగ్యవంతులై చిరకాలముండిరి.

A good and trusted friend would always lead the one who follows him in the right direction; similarly the boat too continued sailing on the right track on its way to the destination. The passengers were lucky enough not to have any health issues due to seasickness.

११. नूत्नकाल मनुष्याणां समावेशस्सविस्मयैः ।
आहोरात्रे विदाञ्चक्रे धूमनौकाप्रयातृभिः ॥

व्या :- नूत्नेति :- नूत्नकाले नूतनसमये ये समागताः मनुष्याः जनाः, तेषां, समावेशः समागमः, सविस्मयैः आश्चर्यपरवशैः, धूमनौकाप्रयातृभिः धूमनौका प्रयाणमाचरद्भिर्जनैः, अहश्च रात्रिश्च अहोरात्रे दिवारात्रे विदाञ्चक्रे अज्ञायि, विद ज्ञाने इति धातोः लिट्।

In Public domain. Digitization Muthulakshmi Research Academy

मार्गमध्ये तत्र तत्र केचन जना आगत्य अहनि च रात्रौ च तां नौकामारोहन्तिस्म, तदा तत्रस्था जनाः आश्चर्यपरवशा अभूवन्, कालज्ञाश्च अभवन्।

తా॥ రేయింబవళ్ళు మార్గమధ్యమున బడవనెక్కి తమతో గలియుచున్న ప్రయాణికులను జూచి, పడవయందున్నవారు ఆశ్చర్యపడుచుండిరి. రేయింబవళ్ళను గ్రహించుచుండిరి.

At a few shores there were passengers boarding and unboarding the steamboat, and the ones who were on the long sail would look at them in surprise, would know through them what time of the day it was.

१२. अन्तस्समुद्रे भूमीध्रास्तस्थुर्नौकापकारिणः ।
सज्जनोपद्रवकरा राड्वास इव सूचकाः ॥

व्या :- अन्तस्समुद्र इति :- समुद्रस्य अन्तः अन्तस्समुद्रं तस्मिन् सागरान्तराले, नौकापकारिणः नौकानामपायमाचरन्तः, धरन्तीति ध्राः मह्याः ध्राः महीध्राः महीधराः, राड्वासे राजमन्दिरे, सज्जनानां सत्पुरुषाणाम् उपद्रवकराः अपकारकारिणः, सूचका इव कर्णेजपा इव तस्थुः अतिष्ठन्। स्थाधातोर्लिट्। उपमालङ्कारः।

తా॥ రాజంతఃపురములలో సత్పురుషుల కపకార మాచరించు కొండె గాండ్రున్నట్లు, ఆ సముద్రాంతర్భాగమున పడవల కపాయమును కలిగించు కొండలు గలవు.

Usually in a king's palace there are some secret informers employed by enemies to spy , and exactly in the same way, en route there were some mountains that could invite a great disaster.

१३. डोलायामिव वीच्यां स्त्री डोलयामास कच्छपी ।
विहङ्गम इवोलूपी सण्डिड्ये गुणवृक्षकम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- डोलायामिति :- वीच्यां तरङ्गे कच्छपी कूर्माङ्गना डोलायां डोलिकायां, स्त्री इव कान्तेव, डोलयामास, डोलनञ्चकार, डोलिधातोर्लिट्, उलूपी मत्स्यशिशुः ''उलूपी शिशुकस्समा'' वित्यमरः, गुणवृक्षकं कूपकं, नौकाध्वजमित्यर्थः, विहङ्गम इव पक्षीव, सण्डिड्ये उदडयत, डी विहायसा गताविति धातोर्लिट्। उपमालङ्कारः।

यथा अङ्गना डोलिकायां स्थित्वा मुहुर्मुहुः पुरः पश्चाच्च डोलिकया सह चलति, तथा काचन कच्छपाङ्गना तरङ्गमारुह्य अग्रतः पृष्ठतश्च तरङ्गेण सह चलति, यथाविहङ्गः वृक्षाग्रं डयते तथा कश्चन मत्स्यशिशुः नौकाध्वजाग्रमारोढु-मुदडयत।

తా॥ ఉయ్యెలలో గూర్చొని యాడుది ముందుకు వెనుకకు నుయ్యెలతోకలిసి యూగునట్లొకయాడ తాబేలు తరంగముపై నూగుచున్నది. పక్షి నేలనుండి చెట్టుకొమ్మపైకి ఎగురునట్లు ఒక చిన్న చేపపిల్ల పడవ స్తంభము మీదికెగురుచుండెను.

There swayed a tortoise on the waves like a girl on a swing. A small fish jumped onto the mast like a bird to a tree.

१४. बहुगम्भीरमध्येऽब्धे रासाञ्चक्रे तिमिङ्गिलः ।
जीवनस्य क्षोभकारी लोभो राज्ञो यथाहृदि ॥

व्या :- जीवनस्य जलस्य, अन्यत्र जीविकायाः क्षोभकारी भङ्गकर्ता, ''जीवनं भुवनं वनं'' ''आजीवो जीविकावार्तावृत्तिर्वर्तन जीवने'' इति चामरः, तिमिङ्गिलः महामत्स्यः, तिमिङ्गिलति ग्रसत इति तिमिङ्गिलः, राज्ञां नृपालानां, हृदि हृदये, लोभो यथा लोभगुण इव, अब्धेः समुद्रस्य, बहुगम्भीरः अधिकागाधः यः मध्यदेशः अन्तर्भागः, तस्मिन्, समुद्रागाधान्तर्जल इत्यर्थः, आसाञ्चक्रे उवास। आसधातोः कर्तरि लिट्। श्लेषगर्भितोपमालङ्कारः।

తా॥ రాజుల హృదయములలో బ్రతుకునకే ముప్పునుదెచ్చు లోభగుణమున్నట్లు, ఆ సముద్రమున అగాధజలాంతరమున లోతు నీళ్ళలో తిమింగలమను పెద్దచేప నివసించెను.

In Public domain. Digitization Muthulakshmi Research Academy

అన్ని దోషములకంటె లోభము మహాదోషము. "లోభః పాపస్య కారణం" అని సూక్తి. అది జీవితమునకే ప్రమాదమును తెచ్చును. అట్లే ప్రమాదకరమగు మత్స్యము తిమింగలము. అది పెద్ద పెద్ద చేపలనే మ్రింగును. అది యీ సముద్రమున నున్నదని భావము.

Greed if bred in heart could see the downfall of a king, similarly in the depths of the sea there lived a dangerous whale that would eat up even big fish.

१५. चकासामास सीतेव तोयरेखा तरीकृता ।
पोताधानोद्गमो बीजवापेन सदृशो बभौ ॥

व्या :- चकासामासेति :- तरीकृता नौकागमनेन निष्पन्ना तोयरेखा सीमन्तवद्भासमाना जलरेखा, सीतेव लाङ्गलपद्धतिरिव, ''सीता लाङ्गलपद्धति'' रित्यमरः। चकासामास आबभौ, चकासृ दीप्ताविति धातोः अस् धातोरनुप्रयोगे लिट्, पोताधानस्य क्षुद्रमत्स्याण्डसङ्घातस्य, ''क्षुद्राण्डमत्स्यसङ्घातः पोताधान'' मित्यमरः, उद्गमः बहिराविर्भावः, बीजानां धान्यादीनां वापेन आवापेन सदृशः समानः, बभौ चकाशे भा दीप्ताविति धातोर्लिट्। उपमालङ्कारः।

తా॥ ధూమనౌక సముద్ర మధ్యమునుండి యేగుచుండగా అందలి జలము రెండు పాయలుకాగా మధ్యనేర్పడిన రేఖ నాగేటిచాలువలె కనబడుచున్నది. ఆ నీటియడుగున నున్న చిన్న చిన్న చేపగ్రుడ్లు, నీటినుండి బయటికివచ్చి ఆ చాలులోదేలి, పొలములో నాగటిచాలులో జల్లబడిన విత్తనములవలె గనబడుచుండెను.

As the steamboat sailed, it furrowed the water like a plough on land and the eggs of the fish gushing out of water looked like seeds to be sown in the grooves of the ploughed land.

१६. जीवनक्षयसन्देहो बडिशानाय वेदना ।
कुवेणीबन्धनं नात्र झषैरनुबभूविरे ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- जीवनेति :- अत्र समुद्रमध्ये, झषैः मत्स्यैः जीवनस्य जलस्य क्षयः नाशः तस्मिन् तद्विषये, सन्देहः संशयः, जलं क्षयं यास्यति किम्विति संशयः, बडिशस्य मत्स्यबन्धनस्य। ''बडिशं मत्स्यबन्धन'' मित्यमरः, आनायस्य जालस्य, ''आनायः पुंसि जालं स्या'' दित्यमरः, वेदना यातना, कुवेण्यां मत्स्यनिक्षेपणपात्रे बन्धनं, बन्धः ''मत्स्याधानी कुवेणी स्या'' दित्यमरः न अनुबभूविरे, नान्वभूयन्त। अनुपूर्वक भूसत्तायामिति धातोर्लिट्। अत्र जीवनक्षय इति स्थले, जलाभावः जीवननाशश्चेत्यर्थद्वयम्।

తా॥ ఈ సముద్ర మధ్యమున నివసించుచున్న చేపలకు, నీరింకిపోవునను సందేహముగాని, గాలమునకు లొంగుదుమను భయముగాని, వలలో జిక్కెదమను వెఱవుగాని, బుట్టలో బంధింపబడెదమను భయముగాని లేవు. ఇట్టి ప్రమాదములీ సముద్ర మధ్యజలమున చేపలకు గలుగనవకాశము లేదు.

The fish in the sea had no worries of the sea water getting dried up, the fear of giving in to a hook, getting caught in the net or put in a basket. These fish were safe in the middle of the sea and the chances of getting caught by fishermen were bleak.

१७. कालः परस्परालापैर्भूतभाव्यर्थचिन्तनैः ।
जनैर्विचिक्षिपेऽश्नीतपिबतायां समुत्सुकैः ॥

व्या :- काल इति :- अश्नीत भोजनं कुरुत, पिबत पानीयं पिबत इति वदन्ति यस्यां क्रियायां सा अश्नीतपिबता, तस्यां, पानभोजनव्यापार इत्यर्थः। समुत्सुकैः आसक्तैः, जनैः मनुजैः, परस्परम् अन्योन्यम् आलापैः सम्भाषणैः भूतः अतीतः, भावी आगामी, यो अर्थः प्रयोजनं, तयोः चिन्तनैः, कालः समयः विचिक्षिपे अक्षिपत, कालो नीत इत्यर्थः। अश्नीतपिबतेत्यत्र तिङां तिङा समासः क्षिप् क्षेपणे इति धातोः कर्मणि लिट्।

తా॥ తినుట త్రాగుటయను భోజన వ్యాపారమందాసక్తులైన యందలి జనులు, ఒకరితో నొకరు సంభాషించుకొనుచు, గతాగతార్థములను గూర్చి యాలోచించుకొనుచు, కాలమును వెళ్ళించిరి.

 In Public domain. Digitization Muthulakshmi Research Academy

The gourmets discussed the food, the past and the future and thus whiled away time.

१८. उदीच्यां द्योतनं भानोरवाच्यां प्रतिवारणं ।
ईक्षामासे तदा नौकायात्रिकैर्दिग्भ्रमान्वितैः ॥

व्या :- उदीच्यामिति :- तदा समुद्रमध्यप्रयाणकाले, दिग्भ्रमान्वितैः दिग्भ्रान्तिमुपेतैः, अविदितदिग्भिरित्यर्थः। नौकायात्रिकैः नौकाप्रयातृजनैः उदीच्याम् उत्तरस्यां दिशि, भानोस्सूर्यस्य, द्योतनं प्रकाशः, अवाच्यां दक्षिणस्यां दिशि, प्रतिवारणम् अन्तर्धिश्च, ईक्षामासे ददृशे।

తా॥ సముద్ర మధ్యమునకు ఆ పడవ పోవుసరికి అందున్న యాత్రికులకు ఉత్తరమున సూర్యకాంతియు, దక్షిణమున అంధకారమును కనబడుచుండెను. ఉత్తరదక్షిణములందుదయాన్తర్ధానములు కనబడెను.

As the boat was halfway through, the passengers witnessed sunlight in the north and darkness in the south. It appeared like there was sunrise and sunset at the same time in the two opposite directions.

१९. सर्पिर्निधायं हित्वा स पानीयं क्लिष्टमानसः ।
तदानीं बुभुजे भिस्सां यावद्वेदं तरीजनः ॥

व्या :- सर्पिरिति :- तदानीं तस्मिन्समये, सः तरीजनः धूमनौकाप्रयातृ जनसमूहः, पानीयं जलं, सर्पिर्निधायं घृतमिव सुरक्षितं, हित्वा निधाय, संरक्ष्येत्यर्थः, क्लिष्टमानसः क्लेशयुतमनास्सन्, भिस्साम् अन्नं, ''भिस्सास्त्रीं भक्तमन्धोऽन्न'' मित्यमरः, यावद्वेदं यावल्लभते तावत्, बुभुजे अभक्षयत् भुज भोजने अनुभवे च इति लिट्, सर्पिर्निधायं- ''उपमाने कर्मणि च'' इति णमुल्, यावद्वेदं- यावति विन्दजीवोः'' इति णमुल्।

తా॥ పడవలో ప్రయాణముగావించు జనము, మంచినీటిని నేతినివలె సంరక్షించుకొని, కొంచెమే త్రాగి బాధపడుచు, దొరికినంత వఱకన్నమునే తినుచుండెను.

In Public domain. Digitization Muthulakshmi Research Academy

The passengers on board drank water sparingly as they would consume clarified butter and ate very little food and thus faced difficulty.

२०. अरुच्यं लवणङ्कारं जघान सतृणं जनः ।
स्वदेहधारणायान्नबुभुक्षुः क्लिशितो भृशम् ॥

व्या :- अरुच्यमिति :- भृशम् अत्यन्तं, क्लिशितः क्लेशयुतः, जनः, स्वदेहधारणाय स्वशरीररक्षणार्थम्, अन्नबुभुक्षुः अन्नं भोक्तुमिच्छुः, अरुच्यं स्वादुताहीनं, लवणङ्कारं स्वादुकृत्वा, अलवणं लवणं कृत्वा भुङ्क्ते लवणङ्कारं, अत्र लवणशब्दः स्वादुपर्यायः। सतृणं तृणमप्यपरित्यज्य, साकल्येनेत्यर्थः, जघास अभक्षयत्, अद भक्षणे इति धातोर्लिट्। लवणङ्कारं ''स्वादुमि णमुल्'' इति णमुल्, सतृणम् 'अव्ययीभावे चाकाले' इति सहस्य सः।

తా॥ మిక్కిలి యాకలిచే బాధపడుచు నాపదవయందున్నవారు, అన్నము దినవలెనని తలంచి, రుచిలేక పోయినను రుచిగా జేసికొని, కొంచెమైనను మిగులకుండ అన్నమును దినిరి.

Those that were terribly hungry made the insipid bland food a little relishable and ate up till the last morsel.

२१. भयङ्करस्तदा जज्ञे प्रतिकूलः प्रभञ्जनः ।
अभीक्ष्णमब्धिस्संक्षुभ्नन् क्षोभयामास तां तरिम् ॥

व्या :- भयङ्कर इति :- तदा तस्मिन्समये प्रतिकूलः अपसव्यः, भयङ्करः अतिभयदायी, प्रभञ्जनः पवमानः, जज्ञे उदभूत्, जनी प्रादुर्भावे इति धातोर्लिट्। अब्धिः, समुद्रः अभीक्ष्णम् अत्यन्तं, क्षुभ्नन् संचलन्, तां तरिं तां धूमनौकां, क्षोभयामास, कम्पयामास, क्षुभ् सञ्चलने इति धातोर्णिचि लिट्।

తా॥ ఆ సమయమున మిక్కిలి భయమును గలిగించుచు పెద్దగాలి, పడవకెదురుగా వీచుచుండెను. సముద్రముకూడ నల్లకల్లోలమై పడవ నటునిటు నూపుచుండెను.

 In Public domain. Digitization Muthulakshmi Research Academy

A strong wind in the opposite direction scared everyone as the boat started bucking the rough water.

२२. प्रवेशयामास ततो गर्भं निर्विण्णयात्रिकान् ।
तर्या वितर्दि जठरं नाविकः कुक्कुटानिव ।।

व्या :- प्रवेशयामासेति :- ततः तस्माद्धेतोः, नाविकः कर्णधारः, निर्विण्णाः भीताः ये यात्रिकाः प्रयातारः, तान्, तर्याः नौकाया गर्भं मध्यदेशं, कुक्कुटान् कृकवाकून्, वितर्देः वेदिकायाः जठरमिव अन्तर्भागमिव, 'स्याद्वितर्दिस्तुवेदिका' इत्यमरः, प्रवेशयामास प्रावेशयत्, विश प्रवेशने इति धातोः णिचि लिट्, उपमालङ्कारः।

తా॥ పెద్దగాలి వీచుచుండ యాత్రికులందరును భయపడిరి. అంత నావికుడు వారినందరిని, కోళ్ళను ఇంటియరుగు గూటిలోనికి దెచ్చినట్లు, పడవ లోపల భాగమునకు జేర్చెను.

The steer man got the terrified passengers to the inner side of the boat which was relatively a safer place just as hens would be driven into a shelter at home.

२३. वायुसङ्क्षुभिताम्भोधिर्यदा शान्तिमुपेयिवान् ।
निष्खेदेव तदा नौका रेजे स्वाधीनभर्तृका ।।

व्या :- वाय्विति :- वायुना प्रभञ्जनेन सङ्क्षुभितः अतिचलितः अम्भोधिः समुद्रः यदा यस्मिन् काले, शान्तिं शान्तताम्, उपेयिवान् प्राप, तदा तस्मिन्समये, नौका प्लवः, स्वाधीनः पतिः भर्ता यस्यास्सा स्वाधीनभर्तृका, कान्तेव अङ्गनेव, निष्खेदा शोकरहिता रेजे रराज। राजृ दीप्ताविति धातोर्लिट्, उपमालङ्कारः।

पतिरनुकूलो यदा भवेत्तदा सा कान्ता निश्शोका भवति, तद्वदेव, समुद्रः यदा शान्त आसीत् तदा नौकापि निष्खेदा बभूवेति भावः।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ప్రభంజన వేగముచే అల్లకల్లోలమైన సముద్రము శాంతింపగానే, యా పడవయు ప్రమాదమునుండి తప్పి, స్వాధీనపతికయగు కాంతవలె నిర్విచారయై యుండెను.

After the great turmoil in the sea, once it bounced back to normalcy, the boat having survived a great blow looked like a relieved wife under the protection of her responsible husband.

२४. दरिद्रैरिव सम्पत्तीरुग्युतैरिव वार्तता ।
अनुबोभूयाम्बभूवे यात्रिकैरभयस्थितिः ॥

व्या :- दरिद्रैरिति :- यात्रिकैः नौकाप्रयातृभिः, अभयस्थितिः निर्भयता, दरिद्रैः निर्धनैः सम्पत्तिरिव सम्पदिव, रुग्युतैः रोगिभिः, वार्ततेव आरोग्यमिव, ''वार्तं फल्गुन्यरोगे च'' इत्यमरः। अनुबोभूयाम्बभूविरे अतिशयेन अन्वभूयत। अनुपूर्वक भूसत्तायामिति धातोः यङन्तात्कर्मणि लिट्। उपमालङ्कारः

తా॥ ఆ పడవలోని యాత్రికులందఱును, సంపదలనందిన దరిద్రులవలెను ఆరోగ్యమునందిన రోగులవలెను, మిక్కిలి నిర్భయముగ నుండిరి.

The joy riches would give to a destitute, the restored health would give to a grief-stricken patient, and the same was the relief and confidence of the passengers who narrowly escaped a great disaster.

२५. अथैकस्मिन्सुप्रभाते मित्रेण सह तारकः ।
अवरोहन्धूमतर्या अधितस्थावुरुप्लवम् ॥

व्या :- अथेति :- अथ प्रयाणानन्तरम्, एकस्मिन् सुप्रभाते एकस्मिन्नुषः काले, तारकः, मित्रेण सह वयस्येन साकं, धूमतर्याः धूमनौकायाः, अवरोहन् अवतीर्णस्सन्, उरुप्लवं बृहस्तम् उडुपम्, अधितस्थौ आरुरोह। अधिपूर्वकस्था धातोर्लिट्। ''अधिशीङ्स्थासां कर्मे''ति सूत्रेण प्लवस्य कर्मत्वात् द्वितीया।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఇట్లు సముద్రముపై బయనించిన పిమ్మట నౌక ప్రభాత సమయమున, తారకుడు తన మిత్రుడయిన రాజపుత్రునితో కలిసి, యా ధుమనౌకనుండి దిగి, మఱియొక పెద్ద పడవనెక్కెను.

After dismounting the boat one fine morning, the two friends boarded yet another ship that was bigger.

२६. यातायातोडुपश्रेणी नौका तीरान्तराम्बुधेः ।
निम्नोन्नततरङ्गेषु दृश्यादृश्यस्थितिं ययौ ॥

व्या :- यातेति :- याता गच्छन्ती आयाता आगच्छन्ती उडुपानां प्लवानां श्रेणिः यस्यास्सा नौका धूमनौका, अम्बुधेः समुद्रस्य तीरान्तरा तीरमध्ये, निम्नाः नीचाः उन्नताः उच्चाः ये तरङ्गाः भङ्गाः, तेषु, दृश्या दर्शनयोग्या, अदृश्या दर्शनायोग्या या स्थितिः अवस्था, तां ययौ प्राप, या इति धातोर्लिट्।

తా॥ వచ్చుచుబోవుచునున్న చిన్న చిన్న తెప్పలమధ్యనున్న యా ధూమనౌక, సముద్రతీర మధ్యభాగమున, చిన్న పెద్ద కెరటముల నడుమ కనబడీ కనబడనట్లుండెను.

In the midst of small rafts ferrying, the steam boat in the midst of the sea would be seen only at times from a distance as the waves of big sizes covered it.

२७. जन्मस्थाने स्वाधिपानां विहर्तुमुपचक्रमे ।
मित्रद्वयं महोत्साहफुल्लाननसरोरुहम् ॥

व्या :- जन्मस्थान इति :- मित्रद्वयं द्विजराजकुमारद्वितयं, महता उत्साहेन अधिकानन्देन, फुल्ले विकसिते, आनने एव सरोरुहे पद्मे यस्य तत्, उत्साहविकसितमुख पद्मं सत् स्वाधिपानां स्वप्रभूणां, सार्वभौमानामित्यर्थः। जन्मस्थाने जन्मभूमौ, विहर्तुं सञ्चरितुम्, उपचक्रमे प्रारेभे। उपपूर्वक क्रमु पाद विक्षेपे इति धातोर्लिट्।

తా॥ మిత్రులయిన యా రాజబ్రాహ్మణ కుమారులిరువురును, ఉత్సాహ వికసిత ముఖారవిందులగుచు, తమకు ప్రభువులయిన సార్వభౌముల జన్మస్థలమందు తిరుగనారంభించిరి.

In Public domain. Digitization Muthulakshmi Research Academy

After reaching the emperor's place they longed to travel to, *Taraka* and the prince both quite enthusiastically started walking at length.

२८. चन्द्रद्वीपे नित्यभद्रां स्वतन्त्रप्रभुपालिताम् ।
पुरं चन्द्रमती नाम्नीं तावुभावधिजग्मतुः ॥

व्या :- चन्द्रद्वीप इति :- तौ उभौ कुमारौ, चन्द्रद्वीपे, चन्द्रनाम्नि द्वीपे नित्यभद्रां नित्यमङ्गलां, स्वतन्त्रप्रभुणा स्वतन्त्रराजन्येन, पालितां रक्षितां, चन्द्रमती इति नाम यस्यास्तां चन्द्रमतीनाम्नीं, पुरं नगरीम्, अधिजग्मतुः अध्यगमताम्। अधिपूर्वक गम्लृ गताविति धातोर्लिट्।

తా॥ చంద్రద్వీపమున చంద్రమతియను పేరుగల యొక నగరము గలదు. అది స్వతంత్రులయిన సార్వభౌముల రాజధాని. అందు నిత్యమును మంగళ కార్యములు జరుగుచుండును. ఆ నగరమునకే మిత్రులిరువురును చేరిరి.

On the island named *Chandradveepa*, there was *Chandramati*, a prosperous city where there were auspicious events all around. The two friends reached this very place.

२९. प्रोवाह पृथुलाऽवाच्यां चन्द्रकान्तेति विश्रुता ।
चित्रसेतुर्नित्यनाव्या बहुजीवनदा नदी ॥

व्या :- प्रोवाहेति :- अवाच्यां दक्षिणस्यां दिशि, पृथुला विशाला, चित्रसेतुः विचित्रसङ्क्रमा, नित्यं नौभिः नौकाभिः तर्तुं योग्या, बहुभ्यः जीवनदा जलदायिनी बहुजलदायिनी बहूनां जीविकादायिनी च, चन्द्रकान्ता इति विश्रुता प्रख्याता, नदी सरित्, प्रोवाह प्रवहतिस्म, प्रपूर्वक वह वहने इति धातोर्लिट्।

తా॥ ఆ పట్టణమునకు దక్షిణదిశయందు చన్ద్రకాంత యనెడు ప్రఖ్యాతమైన నది ప్రవహించుచున్నది. దానిపై పెద్ద పెద్ద చిత్రములైన వంతెనలు గలవు. నిత్యము దానిని పడవలపై దాటుచుందురు. ఆ నది పలువురకు నీటిని బ్రతుకుగూడ నిచ్చుచున్నది.

In Public domain. Digitization Muthulakshmi Research Academy

The place got its name because of the river by the name Chandramati that flew to the south of the city. There were wonderful dams on it. People ferried from one shore to the other on boats and the river not only provided them drinking water but also a life source to many.

३०. पञ्चयोजनविस्तीर्णा शतलक्षजनावृता ।
भूगोले बहुना किं सा पुरी पुरमतल्लिका ।।

व्या :- पञ्चेति :- सा पुरी चन्द्रमती नगरी पञ्चभिः योजनैः विंशतिक्रोशैः, विस्तीर्णा विशाला, पञ्चयोजनपर्यन्तं व्याप्तेत्यर्थः। शतलक्षसङ्ख्याकैः जनैः आवृता आक्रान्ता, तस्याम् अनेकलक्षजनास्सन्तीत्यर्थः अत्र शतशब्दस्य अनेकार्थत्वम्। किं बहुना, बहुभिः वचोभिः किं प्रयोजनम्। भूगोले भूमण्डले, सा पुरी, पुरमतल्लिका नगरी श्रेष्ठा। श्रेष्ठनगरीत्यर्थः ''मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ। प्रशस्तवाचकान्यमूनि'' इत्यमरः।

తా॥ ఆ పట్టణము అయిదు యోజనముల విస్తీర్ణత కలిగియున్నది. దానియందు పెక్కులక్షల జనులు నివసించుచుండిరి. ఆ నగరము భూమండలమున కొక భూషణమే. పెక్కు మాటలేల. అదియన్ని నగరములను మించియున్నది.

The city spread over about five miles with millions of people inhabiting there. *Chandramati* was a cut above the rest and to put it briefly it looked like a jewel on the planet.

३१. चन्द्रिका धवलच्छायास्तत्रत्या रेजिरे जनाः ।
सर्वसर्वंसहा चक्रप्रतिपालनदीक्षिता ।।

व्या :- चन्द्रिकेति :- तत्रत्याः तन्नगरवासिनः जनाः, चन्द्रिका चन्द्रकान्तिः तद्वत् धवला श्वेता छाया कान्तिः येषां ते चन्द्रिकावदतिश्वेता इत्यर्थः। सर्वं समस्तं सर्वंसहायाः भूमेः चक्रं मण्डलं ''सर्वंसहा वसुमती'' त्यमरः तस्य प्रतिपालने रक्षणे, दीक्षिताः बद्धश्रद्धाः। रेजिरे चकासिरे राजृ दीप्ताविति धातोर्लिट्।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఆ నగరమందున్న జనులందరును వెన్నెలవలె మిక్కిలి తెల్లని యొడలిరంగు గలవారు. అందరును మహీమండలమునంతను రక్షింప సమర్థులు.

The people were of fair complexion that could be compared to the moonlight. And everyone was strong enough to safeguard the earth.

३२. अन्योन्यमैत्रीं कुर्वन्तस्सञ्जानन्तो यथायथम् ।
प्रियप्रियेण यच्छन्तः किरन्तश्शुक्लशुक्लभाम् ॥

व्या :- अन्योन्यमिति :- अन्योन्यं परस्परं, मैत्रीं स्नेहं कुर्वन्तः, परस्परं मित्रभावेन वर्तमानाः इत्यर्थः। यथायथं यथात्मीयं यथा स्वभावं वा, सञ्जानन्तः सम्यक् जानन्तः। स्वभावम् आत्मीयं वा सम्यक् स्वत एव परिशीलयन्त इति भावः आत्मज्ञा इति यावत्। ''यथा स्वे यथायथ'' मिति द्विरुक्तिः, यथास्वन्तु यथायथ'' मित्यमरः, प्रियप्रियेण अतिप्रियमपि वस्तु यच्छन्तः अनायासेन ददतः, ''अकृच्छ्रे प्रिय सुखयोरन्यतरस्या'' मिति द्विरुक्तिः। शुक्ला शुक्ला या भा कान्तिः सा शुक्लशुक्लभा, ताम्, अति धवलकान्तिमित्यर्थः ''प्रकारे गुणवचनस्य'' इति सूत्रेण द्विरुक्तिः, पूर्वभागस्य पुंवद्भावः, किरन्तः क्षिपन्तः, रेजिरे इति पूर्वेणान्वयः।

తా॥ ఆ నగరమందలి జనులొకరితో నొకరు స్నేహము చేయుదురు. తమ్ముదామెరిగినవారు. ఎంత ప్రియమైన వస్తువునయినను సందేహింపక ఇచ్చువారు. తెల్లని కాంతితో వెల్గువారు.

They were all friendly with one another and were introspective who knew themselves. They were very sharing and without any hesitation would give away the things they cherished. They were radiant (and this could be not just because of their complexion but also because of their nature).

३३. विद्यया समयाकृत्य प्रियाकृत्य मुहुर्गुरून् ।
आत्मनो राजसात्कृत्वा दुःखाकृत्य विरोधिनः ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- विद्ययेति :- विद्यया विद्याभ्यासेनैव समयाकृत्य कालं यापयित्वा, गुरून् अध्यापकान्, प्रियाकृत्य प्रियान्कृत्वा, गुरूणामनुग्रहं सम्पाद्येत्यर्थः आत्मनः स्वान् राजसात्कृत्वा राजाधीनान्कृत्वा, विरोधिनः शत्रून् दुःखाकृत्य दुःखितान् कृत्वा, रेजिरे इति पूर्वेणान्वयः, "समयाच्च यापनाया" मिति डाच्, "तदधीन वचने" इति सात्।

తా॥ అందలి జనులు విద్యార్జనమునకై కాలమును వెళ్ళించుచుండిరి. గురువులను సంతోషపరచి, వారి అనుగ్రహము నార్జించుచుండిరి. తామెల్లప్పుడును ప్రభువునకధీనులై యుండిరి. శత్రువులను దుఃఖితులను గావించుచుండిరి.

Time was well spent in studies, and the students pleased the teachers and always had their blessings. The people were obedient to the king and were tough on enemies.

३४. चारित्रतोऽतिगृह्णन्तो व्यथमाना न वृत्ततः ।
भवन्तो दीनतोऽजस्रं जीवन्तो देवतः प्रति ॥

व्या :- चारित्रत इति :- चारित्रतः अतिगृह्णन्तः, चारित्रेण अन्यानतिक्रम्य वर्तमानाः, वृत्ततः न व्यथमानाः, वृत्तेन न चलन्तः, "अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः" इति तसिः, अजस्रं सततं, दीनतः भवन्तः, दीनानां पक्षे भवन्तः "षष्ठ्या व्याश्रये" इति तसिः, देवतः प्रति जीवन्तः, देवप्रतिनिधयो भूत्वा जीवन्तः, "प्रतियोगे पञ्चम्यास्तसिः" इति तसिः, रेजिरे इति पूर्वेणान्वयः।

తా॥ అందలి జనులు చారిత్రముచే నితరులను మించినవారు. వృత్తివలన బాధపడువారు లేరు. నిత్యము దీనుల నాదుకొనుచుందురు. దేవతాప్రతినిధులై యుందురు.

They had a good history of excelling others in many aspects, had no qualms about their work (profession), reached out to the needy and behaved as if they were representatives of god.

In Public domain. Digitization Muthulakshmi Research Academy

३५. एकतानास्सांयुगीना वाग्मिनो हृदयालवः ।
क्षेमङ्करा महोत्साहा उरस्वन्तो यशस्विनः ॥

व्या :- एकताना इति :- एकतानाः अनन्यवृत्तयः ''एकतानोऽनन्यवृत्ति'' रित्यमरः। सांयुगीनाः रणे साधवः, युद्धविशारदा इत्यर्थः। ''सांयुगीनो रणे साधु'' रित्यर्थः वाग्मिनः वाचोयुक्तिपटवः, युक्तियुक्तसम्भाषणचतुरा इत्यर्थः, ''वाचो युक्तिपटुर्वाग्मी'' इत्यमरः, हृदयालवः सुहृदयाः, क्षेमङ्कराः शुभकर्तारः, महोत्साहाः महोद्यमाः, उरस्वन्तः उरसिलाः, प्रशस्तोरस्का इत्यर्थः। ''स्यादुरस्वानुरसिलः'' इत्यमरः। यशस्विनः कीर्तिमन्तः। रेजिरे इति पूर्वेणान्वयः।

తా॥ అందలి జనులందరు ఏకాగ్రచిత్తులు. యుద్ధవిశారదులు. యుక్తియుక్తముగ మాటలాడువారు. మంచి మనసుగలవారు. శుభకర్మముల నాచరించువారు. పెద్ద పెద్ద ప్రయత్నములు గలవారు. ఉత్సాహవంతులు. వ్యూఢోరస్కులు. కీర్తిమంతులు.

They were all focused, excellent at martial arts, talked rationally and logically, good-hearted, would do all good deeds, had high aspirations, were loud and powerful and were famous.

३६. समानपङ्क्तिभोक्तारस्समवर्णविभूषिताः ।
सामान्यभाषावक्तारस्समानाचारवर्तिनः ॥

व्या :- समानेति :- समाना एका पङ्क्तिः श्रेणी, वीथीत्यर्थः तस्यां भोक्तारः, एकपङ्क्तिभोजनकर्तार इत्यर्थः। अत्र समानशब्दस्य एकार्थत्वम्। समवर्णेन एकजात्या, विभूषिताः अलङ्कृताः, एकजातय इत्यर्थः। अत्र वर्णशब्दस्य शरीरकान्तिरित्यप्यर्थः। तेन एकशरीरकान्तयः धवलवर्णा इत्यर्थः सामान्यभाषावक्तारः एकभाषाभाषिणः समानाचारवर्तिनः एकाचारवन्तः रेजिरे इति पूर्वेणान्वयः।

తా॥ అచ్చటి వారందరు ఒకే పంక్తిలో భోజనము చేయుదురు. ఒకే జాతివారు. ఒకే భాష మాట్లాడువారు. ఒకే యాచారము గలవారు.

In Public domain. Digitization Muthulakshmi Research Academy

They all ate together without any caste or creed discrimination. They all talked in the same language and had the same customs and culture.

३७. वयः परिणयं स्त्रीणां विद्याभ्यासं स्वतन्त्रताम् ।
प्रापयन्तोऽवतन्वन्तस्स्वराज्यविहितोद्यमान् ॥

व्या :- वय इति :- स्त्रीणां कान्तानां, वयः परिणयं युक्तवयसि विवाहं, विद्याभ्यासं, विद्याभ्यासार्हतां, स्वतन्त्रतां स्वातन्त्र्यञ्च, प्रापयन्तः, यच्छन्तः, स्वराज्यस्य स्वीयराष्ट्रस्य, विहितान् क्षेमङ्करान्, उद्यमान् प्रयत्नान्, अवतन्वन्तः कुर्वाणाः, रेजिरे, इति पूर्वेणान्वयः।

తా॥ ఇందలివారు యుక్తవయస్సునందే స్త్రీలకు వివాహముగావింతురు. బాల్యవివాహములు లేవని యర్థము. స్త్రీలందరును విద్యాభ్యాసము గావింతురు. స్త్రీలకు స్వేచ్ఛాస్వాతంత్ర్యములున్నవి. ఇందలివారు స్వరాజ్యమభివృద్ధి నందుటకు వలయు యత్నములు నాచరించుచుందురు.

Girls were married only after turning young (there were no child marriages), and they were all educated. They had all the freedom on par with their male counterparts. And they all wished and worked for the welfare of their kingdom.

३८. सामाजिका आस्तिकास्सत्कुलीना धार्मिका बुधाः ।
शाकाहारा वावदूकाः कृतिनः पुरुषोत्तमाः ॥

व्या :- सामाजिका इति :- समाजं समूहं समवयन्तीति सामाजिकाः, सभ्याः, अस्ति धर्मः देवः इति मन्वानाः आस्तिकाः, विश्वस्तधर्मा इत्यर्थः। सत्कुलीनाः उत्तमकुलसञ्जाताः, धार्मिकाः धर्मप्रधानमतयः, बुधाः पण्डिताः। शाका एव आहारः येषां ते शाकाहाराः, न तु मांसाशिन इत्यर्थः। वावदूकाः अतिवक्तारः "वावदूकोऽतिवक्तरि" इत्यमरः। कृतिनः निपुणाः, पुरुषोत्तमाः पुरुषश्रेष्ठाः रेजिरे इति पूर्वेणान्वयः, एकक्रियया श्लोकाष्टकस्य समन्वयात् एतत्पर्यन्तं कुलकम्। द्वाभ्यां युग्मं, त्रिभिः कालापकं, चतुर्भिः कुलकमिति प्राचीनानां समयः।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ అచ్చటివారందరును సభలో నుండుటకు దగినవారు. ధర్మమున్నది. దేవుడున్నాడు అను ఆస్తిక్య బుద్ధికలవారు. మంచి కులమున జన్మించినవారు. ధర్మబుద్ధి కలవారు, మంచి పండితులు, శాకాహారులేగాని మాంసాహారులుగారు. చాలాసేపు మాటలాడు శక్తిగలవారు. మంచి నేర్పరులు. పురుషులలో శ్రేష్ఠులు.

Each and every citizen was worthy of being in the king's court. They believed in dharma and in god. They were born into families of good lineage, were righteous and scholarly. They abstained from eating meat and were all vegetarians (ate soft food). They could talk at length, were strong, skillful, and were all great men.

३९. तत्रत्यिका बभूव स्त्री वीरमाता सुलक्षणा ।
गृहकार्यपरा प्राज्ञी बुधमान्या पतिव्रता ॥

व्या :- त्यत्रत्यिकेति :- तत्रत्यिका तत्र नगरे स्थिता, स्त्री कान्ता वीरमाता वीरजननी, शोभनानि लक्षणानि यस्यास्सा सुलक्षणा, शुभलक्षणेत्यर्थः गृहकार्येषु गृहकृत्येषु, रता आसक्ता, प्राज्ञी प्रज्ञावती, बुधमान्या पण्डितादरणीया, पतिव्रता पतिमनोनुकूलप्रवर्तिनी, जात्येकवचनम्, तत्रस्थास्सर्वाः नार्य एतादृश्यः इत्यर्थः।

తా॥ ఆ నగరమందున్న కాంతలందరును వీరమాతలు, శోభనాంగులు, గృహకృత్య నిర్వహణ సమర్థులు. అన్నియు నెఱింగిన ప్రజ్ఞావతులు. పండితులచే నాదరింపదగినవారు. పతివ్రతలు.

The women were mothers of great men, good-looking with beautiful features, efficient at all household chores and at the same time were well read and were appreciated by scholars. They were all chaste women.

४०. वीथीर्विशाला अमला जलयन्त्रपरिष्कृताः ।
निषद्यास्तौ ददृशतुस्सर्ववस्तुसमन्विताः ॥

 In Public domain. Digitization Muthulakshmi Research Academy

व्या :- वीथीरिति :- तौ तारकराजकुमारौ, विशालाः विपुलाः, अमलाः निर्मलाः, जलयन्त्रपरिष्कृताः जलयन्त्रालङ्कृताः, वीथीः सर्ववस्तुभिः सकलपदार्थैः, समन्विताः समुपेताः निषद्याः आपणान्, ''आपणस्तु निषद्याया'' मित्यमरः, ददृशतुः अपश्यताम्, दृशिर् प्रेक्षणे इति धातोर्लिट्।

తా॥ ఆ తారక రాజకుమారులిరువురును, చెత్తచెదారములేక మిక్కిలి వెడల్పుగలిగి, కొళాయీలచే నిండియున్న వీధులను, అన్ని రకముల వస్తువులతో నిండిన దుకాణములను జూచిరి.

Taraka and the prince looked at the city that was well developed with clean roads devoid of garbage. There was good water supply in every street and plentiful of groceries were available in the shops with a good variety and amount of stock.

४१. सौधास्समुन्नता रम्या अद्भुतारामदीर्घिकाः ।
नानाविधाश्शिल्पशालास्ताभ्यामीक्षाम्बभूविरे ॥

व्या :- सौधा इति :- समुन्नताः अत्युच्चाः रम्याः सुन्दराः, सौधाः प्रासादाः, अद्भुताः आश्चर्यकराः आरामाः उपवनानि। दीर्घिकाः वाप्यः, नानाविधाः बहुप्रकाराः, शिल्पशालाः शिल्पगृहाणि, ताभ्यां द्विजराजकुमाराभ्याम्, ईक्षाम्बभूविरे। अवैक्ष्यन्त, ईक्ष दर्शने इति धातोः कर्मणि लिट्।

తా॥ ఆ కుమారులిరువురును, అందముగా నెత్తుగానున్న మేడలను, వింత వింతలైన తోటలను, మంచి మంచి దిగుడుబావులను, పలువిధములైన శిల్పశాలలను గాంచిరి.

The duo looked at the edifices, wonderful public parks, wells and museums of sculpture.

४२. आकाशयानानि धूमशकटांस्तौ मनोजवान् ।
तन्त्रीवार्तावहांस्तत्र लुलोकाते महाद्भुतान् ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- आकाशेति :- तत्र तस्मिन्नगरे, तौ कुमारौ, आकाशयानानि विमानानि, मनोजवान् मनोवेगान्, धूमशकटान् बाष्पशकटान्, महाद्भुतान् अत्याश्चर्यकरान्, तन्त्रीवार्तावहान् तन्त्रीवार्ताप्रसारकान्, लुलोकाते अपश्यताम्, लोकृ लोकने इति धातोर्लिट्।

తా॥ వారిరువురు నా నగరమందు, విమానములను, మంచి వేగమున బోవు రైలుబండ్లను, ఆశ్చర్యమును గలిగించు తంత్రీ ప్రసారములను, (టెలిగ్రాముచోట్లు) చూచిరి.

Airplanes, fast trains and telegrams- all were so commonplace here.

४३. ततः पौरान्वशीकर्तुं गेयं तद्देशभाषया ।
गायन्तौ तावुभौ तत्र प्रतोलीषु विजहृतुः ॥

व्या :- तत इति :- ततः नगरदर्शनानन्तरं, तौ उभौ, द्विजनरवरकुमारौ, पौरान् पुरजनान्, वशीकर्तुं स्वाधीनान्विधातुं, तद्देशभाषया चन्द्रद्वीपजनाभ्यस्त भाषया, गेयं गीतं, गायन्तौ, तत्र नगरे, प्रतोलीषु रथ्यासु, ''रथ्या प्रतोलि'' रित्यमरः। विजहृतुः चेरतुः। विपूर्वक हृञ् हरणे इति धातोर्लिट्।

తా॥ పట్టణమును జూచిన పిదప, నా కుమారులిరువురును, ఆ నగరమందలి జనమును స్వాధీనముగావించుకొనుటకై, వారి దేశభాషలోనే కీర్తనలను పాడుచు తిరుగనారంభించిరి.

After a close look at all these, the two of them in order to impress and to catch the attention of people around started singing in their language.

४४. समुन्नतौ तावाजानुबाहू सर्वाङ्गसुन्दरौ ।
बहुतेजस्विनौ दृष्ट्वा मुमोह नगरीजनः। ॥

व्या :- समुन्नताविति :- समुन्नतौ प्रांशू, आजानुबाहू जानुपर्यन्तलम्बमान भुजयुगलौ, सर्वाङ्गेषु सकलावयवेषु, सुन्दरौ रमणीयौ, बहुतेजस्विनौ अधिकतेजो-

In Public domain. Digitization Muthulakshmi Research Academy

विराजमानौ, तौ द्विजनृपकुमारौ, दृष्ट्वा वीक्ष्य, नगरीजनः पौरसमूहः, मुमोह अमुह्यत्, आश्चर्यपरवशो बभूवेत्यर्थः। मुह् मोहे इति धातोर्लिट्।

తా॥ మంచి పొడగరులై ఆజానుబాహులై సర్వాంగసుందరులై తేజస్వంతులై యున్నఆ కుమారుల నిరువరనుగాంచి, ఆ నగరమందలి జనులు ఆశ్చర్యపరవశులైరి.

The people of *Chandramati* were very happy to see the two tall, bright, handsome young men.

४५. तत्सौन्दर्यं तदौन्नत्यं तत्तेजस्तत्पराक्रमः ।
तत्तारुण्यं तत्प्रतिभा मुमोष जनमानसम् ॥

व्या :- तत्सौन्दर्यमिति :- तयोः कुमारयोः सौन्दर्यं लावण्यं, तयोः औन्नत्यम् उन्नतत्त्वं, तयोः तेजः तेजस्वित्वं, तयोः पराक्रमः, तयोः तारुण्यं यौवनं, तयोः प्रतिभा नवनवोन्मेषशालिनी प्रज्ञा च, जनमानसं, पौरजनहृदयं, मुमोष अमुष्णात्, मुष् अपहरणे इति धातोर्लिट्।

తా॥ ఆ కుమారద్వయముయొక్క చక్కదనము, వారి యౌన్నత్యము, వారి తేజస్సు, వారి పరాక్రమము, వారి యౌవనము, వారి ప్రతిభయును అందలి జనుల మనస్సులను దోచుకొనెను.

The two with their beauty, nobility, radiance, valor and talent- very high an expectation of someone of their age, won the hearts of all.

४६. द्वितन्त्रगौलक्षणिकमीमांसकसवार्तिकान् ।
पराजिग्याते धार्मिकवैयाकरणतार्किकान् ॥

व्या :- द्वितन्त्रेति :- द्वे तन्त्रे अधीयते इति द्वितन्त्राः, यस्मिन्कस्मिन्नपि शास्त्रद्वये पण्डिता इत्यर्थः, तान् गोलक्षणमधीयत इति गौलक्षणिकाः गोशास्त्रिण इत्यर्थः। तान्, मीमांसकान् मीमांसाशास्त्रवेदिनः तान् सवार्तिकमधीयत इति सवार्तिकाः तान्, धार्मिकाः धर्मशास्त्रविद्वांसः तान्, वैयाकरणाः व्याकरणशास्त्रविशारदाः

In Public domain. Digitization Muthulakshmi Research Academy

तान्, तार्किकाः न्यायशास्त्रविशारदाः तांश्च। पराजिग्याते पराजितांश्चक्रतुः। परापूर्वक जि अभिभवे इति धातोर्लिट्।

తా॥ ఆ కుమారులిరువురును, రెండు శాస్త్రములను నేర్చినవారిని, గోలక్షణ వేత్తలను, మీమాంసా శాస్త్రజ్ఞులను, వార్తికములతో గూడ శాస్త్రములను జదివినవారిని, ధర్మశాస్త్ర విశారదులను, వైయాకరణులను తార్కికులను ఓడించిరి.

The two boys defeated in the debates those well versed in twin *sastras*, those adept in studying the features of cows, those learned in logic along with commentary, and those erudite in the science of ethics, and the grammarians.

४७. लोकैकवीरौ तौ सर्वतन्त्रौ स्वातन्त्र्यशालिनौ ।
सिंहसंहननौ द्रष्टुमियेष नगरीजनः ॥

व्या :- लोकैकेति :- नगरीजनः नगरवासीजनसमूहः लोके जगति, एकवीरौ मुख्यवीरौ, केवलवीरौ वा। ''एके मुख्यान्यकेवलाः'' इत्यमरः। सर्वाणि तन्त्राणि शास्त्राणि अधीयाते सर्वतन्त्रौ, सर्वशास्त्रविशारदावित्यर्थः। स्वातन्त्र्यशालिनौ स्वच्छन्दभावोपेतौ, सिंहसंहननौ वराङ्गरूपोपेतयुवानौ। ''वराङ्गरूपोपेतो य सिंहसंहननो युवा'' इत्यमरः। दिव्यसुन्दरविग्रहावित्यर्थः। तौ कुमारौ, द्रष्टुं, वीक्षितुं इयेष चकमे इष इच्छायां लिट्।

తా॥ లౌకైకవీరులును, సకలశాస్త్ర విశారదులును, స్వతంత్ర భావోపేతులును, దివ్యసుందర విగ్రహులును, యువకులునగు నా బ్రాహ్మణ క్షత్రియ కుమారులను జూచుట కానగరమందలి జనబృందము సంకల్పించెను.

The people there were eager to see these two young champions with beautiful physique, who are masters of all arts, and who are disposed to freedom (who are independent).

 In Public domain. Digitization Muthulakshmi Research Academy

४८. हैयङ्गवीननिष्ठानकूर्चिकामस्तु संयुतम् ।
स्नातानुलिप्तौ मृष्टान्नं बुभुजातेऽथ सात्त्विकम् ॥

व्या :- हैयङ्गवीनमिति :- अथ, तौ कुमारौ, स्नातौ च तौ अनुलिप्तौ च स्नातानुलिप्तौ, स्नात्वा गन्धादिना अलङ्कृतशरीरौ, हैयङ्गवीनेन सद्यः कृतेन गोघृतेन, "तत्तु हैयङ्गवीनं स्यात् ह्योगोदोहोद्भवं घृतं," इत्यमरः, निष्ठानेन तेमनेन, "स्यात्तेमनन्तु निष्ठान" मित्यमरः। कूर्चिकया क्षीरविकृत्या। "कूर्चिकाक्षीरविकृति" रित्यमरः। मस्तुना मण्डेन, "मण्डं दधिभवं मस्तु" इत्यमरः। संयुतं सहितं सात्त्विकं सत्त्वगुणाभिवर्धकं मृष्टञ्च तत् अन्नञ्च, मृष्टान्नं शोधितमन्नं। बुभुजाते भुज परिपालनाभ्यवहारयोरिति धातोः कर्तरि लिटि आत्मनेपदम् अभुञ्जताम्।

తా॥ తరువాత ఆ కుమారులిరువురును స్నానము గావించుకొని, శరీరములకు గంధద్రవ్యములనలంది తొలినాటి వెన్నను మరగించి అప్పుడే సిద్ధము చేసిన ఆవునేతితో, తిమ్మనముతో, జున్నుతో, పాలమీగడతో గూడిన పరిశుద్ధమైన సాత్త్వికాహారమును భుజించిరి.

After taking bath, the two applied perfume made of sandalwood. Ate soft and hygienic food made of dairy products such as ghee, butter, cream and cheese made of best of cow's milk.

४९. प्रसाधितौ तौ रोचिष्णू वेषेण समयोचितौ ।
विशेषकभ्रमरकस्फीतफालौ रराजतुः ॥

व्या :- प्रसाधिताविति :- तौ वीरकुमारौ, वेषेण वस्त्राभरणाद्याकल्पेन, प्रसाधितौ अलङ्कृतौ, रोचिष्णू कान्त्या विराजमानौ, समयोचितौ कालानुगुणौ, विशेषकेन तिलकेन, "तमालपत्त्रतिलकचित्रकाणि विशेषक" मित्यमरः भ्रमरकैः ललाटो परिपतितचिकुरैः "ते ललाटे भ्रमरकाः चिकुराश्चूर्णकुन्तला" इत्यमरः, स्फीतः आक्रान्तः फालः फालभागः ययोस्तौ, सन्तौ रराजतुः। रेजतुः, राजृ दीप्ताविति धातोर्लिट्।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఆ కుమారులిరువురును, భోజనానన్తరమున వస్త్రాభరణాదులచే శరీరము నలంకరించుకొని, దివ్యకాంతులతో వెల్గుచు, కాలానుగుణముగ నొసట బొట్టు బెట్టుకొని, ముంగురులు నుదిటియందు వ్రేలాడుచుండ చూడముచ్చటగానుండిరి.

They both got dressed up with fine garments and ornaments, and wore *tilakam* on their foreheads a-la-mode. With a few curls of hair dangling on the forehead, the two were a sight to see.

५०. **महाधननिशाराप्रपदीनांशुकसुन्दरौ ।**
ग्रैवेयकोर्मिकादेवच्छन्दकुण्डलभासुरौ ॥

व्या :- महाधनेति :- महाधनं बहुमूल्यं, निशारं हरिद्राञ्चलम्, आप्रपदीनं पादाग्रव्यापि, यत् अंशुकं वस्त्रं तेन, सुन्दरौ रमणीयौ, ग्रैवेयकेन कण्ठाभरणेन, ''ग्रैवेयकं कण्ठभूषा'' इत्यमरः। ऊर्मिकाभिः अङ्गुलीयकैः ''अङ्गुलीयकमूर्मिका'' इत्यमरः। देवच्छन्देन शतयष्टिकमुक्ताहारेण ''देवच्छन्दोऽसौ शतयष्टिकः'' इत्यमरः। कुण्डलाभ्यां कर्णभूषणाभ्यां च भासुरौ प्रकाशमानौ रेजतुरिति पूर्वेणान्वयः।

తా॥ ఆ వీర కుమారులిరువురు మిక్కిలి విలువగలిగిన పసుపుపచ్చని అంచులుగల పాదగుల్ఫపర్యన్తము వ్రేలాడుచున్న వస్త్రములను ధరించిరి. మెడయందు కంఠాభరణముతోపాటు నూరుపేటల ముత్యాల హారమును వేసికొనిరి. చెవులకు కుండలములను పెట్టుకొనిరి. చేతివ్రేళ్ళకు ఉంగరములనుంచుకొనిరి. ఇట్లలంకృతులైరి.

The garb they wore was an expensive one with yellow border and was of foot length. A hundred layered pearls necklace, ear rings and rings on their fingers were the accessories to the attire.

५१. **तौ चार्वनुपदीनाविराजच्चरणसारसौ ।**
स्वच्छक्षौमोष्णीषरम्यौ धृतकालोचितायुधौ ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- ताविति :- तौ द्विजराजपुत्रौ चारुभ्यां रुचिराभ्याम् अनुपदीनाभ्यां पादायतोपानद्भ्यां विराजती प्रकाशमाने चरणसारसे पादपद्मे ययोस्तौ ''सैवानुपदीना चरणायता'' इत्यमरः। स्वच्छं धवलं यत् क्षौमं दुकूलं तस्य उष्णीषेण शिरोवेष्टनेन रम्यौ सुन्दरौ, धृतः कालोचितः कालानुगुणः आयुधः याभ्यां तौ, कालोचित आयुधधारिणावित्यर्थः। रेजतुरिति पूर्वेणान्वयः।

తా॥ వారిరువురును, అందమైన కాలికి సరిపోయిన జోళ్ళను ధరించిరి. తెల్లని పట్టుబట్టతో పాగాలు చుట్టుకొనిరి. కాలోచితములైన ఆయుధములను ధరించిరి. మిక్కిలి అందముగా నుండిరి.

They wore footwear that was suitable and nice; and turbans made of silk; and were armed with ultra modern weapons.

५२. पारसीकौ वयस्यौ तावारुह्य द्राङ्मनस्विनौ ।
जग्मतू राजसदनं युवानावकुतोभयौ ॥

व्या :- पारसीकाविति :- मनस्विनौ मानवन्तौ, युवानौ तरुणौ, न विद्यते कुतः भयं ययोः तौ निर्भीकौ, तौ वयस्यौ सखायौ, विप्रराजकुमारौ, द्राक् शीघ्रं, पारशीकौ पारशीकदेशोद्भवौ, हयौ अश्वौ आजानेयावित्यर्थः, आरुह्य अधिष्ठाय राजसदनं राजगृहं, जग्मतुः अगच्छताम्। गम्लृ गताविति धातोर्लिट्।

తా॥ మానధనులు, యువకులు, నిర్భయులు, మిత్రులునగు నా ద్విజ రాజకుమారులిరువురును, వేగముగా నాజానేయములైన పారశీకాశ్వముల నెక్కి రాజభవనమునకేగిరి.

The dignified, young, confident friends quickly mounted excellent Persian horses and reached the monarch's palace.

५३. सायाहनि सुपन्थानं गच्छन्तौ दशकैस्सह ।
संशोधितहिमानीकं लक्षयामासतुस्सभाम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- सायाहनीति :- सायाहनि सायङ्कालसमये, संशोधिता सम्मार्जिता हिमानी हिमसंहतिः यस्मिन् तं, ''हिमनी हिमसंहति'' रित्यमरः। सुपन्थानं राजमार्गं दर्शकैस्सह मार्गदर्शकजनैस्साकं, गच्छन्तौ यान्तौ, सखाम् आस्थानीं, लक्षयामासतुः ददृशतुः।

తా॥ సాయంకాలమున, త్రోవలోబడిన పెద్ద మంచును తుడిచి శుభ్రము చేయబడిన రాజమార్గమునుండి కొందరు జనులు త్రోవజూపుచుండ పయనించి, వారిరువురును రాజసభను గాంచిరి.

They rode to the palace where the snow was shoveled away and they were there by evening.

५४. अध्यासीनं भद्रपीठं पृच्छन्तं मन्त्रिणः कृतीः ।
प्रकृत्या सुन्दरं वीक्षाञ्चक्राते चक्रवर्तिनम् ॥

व्या :- अध्यासीनमिति :- तौ कुमारौ, भद्रपीठं सिंहासनम्, अध्यासीनं अधिष्ठितं, महासनासीनमित्यर्थः। मन्त्रिणः अमात्यान्, कृतीः कार्याणि, पृच्छन्तं प्रकृत्या निसर्गेण, सुन्दरं रूपिणं, सहजसुन्दरमित्यर्थः। चक्रवर्तिनं सार्वभौमं, वीक्षाञ्चक्राते अपश्यताम्। विपूर्वक ईक्ष धातोर्लिटि आम् प्रत्यये लिटो लुकि आमन्तात् लिट् परकस्य कृञोऽनुप्रयोगः।

తా॥ సింహాసనము నలంకరించి, మంత్రులతో రాజకార్యములను గూర్చి ముచ్చటించుచున్న సహజసుందరుడైన సార్వభౌముని ఈ కుమారులిరువురును చూచిరి.

Sitting on the throne the naturally beautiful emperor was discussing the public affairs with his ministers when the two friends entered his court.

५५. आलोक्य सार्वभौमस्तौ प्रत्युत्थानपुरस्सरम् ।
व्यूढोरस्कौ ततस्ताभ्यां ददौ समुचितासने ॥

व्या :- आलोक्येति :- ततः अनन्तरं, सार्वभौमः चक्रकर्ती व्यूढं पृथुलं उरः वक्षः ययोः तौ। विशालोन्नतवक्षस्कावित्यर्थः। तौ द्विजराजकुमारौ, आलोक्य

In Public domain. Digitization Muthulakshmi Research Academy

वीक्ष्य, प्रत्युत्थानं प्रत्युद्गमनं पुरस्सरं यस्मिन्कर्मणि तत् यथा तथा, प्रथमतः प्रत्युद्गमनादिमर्यादां कृत्वेत्यर्थः। ताभ्यां वीरकुमाराभ्यां, समुचिते अर्हे आसने पीठे द्वे आसने इत्यर्थः। ददौ अदात् दाण् धातोर्लिट्। ''व्यूढस्तु पृथुले त्रिषु'' इत्यमरशेषः।

తా॥ ఆ చక్రవర్తియు, విశాల వక్షస్కులై వీరలక్షణములతో నొప్పు నా కుమారుల వీక్షించి, ఎదురేగి, తోడితెచ్చి, మర్యాదగావించి, ఉచితాసనములపై వారిని గూర్చుండజేసెను.

The monarch looked at the statuesque duo, walked up to them to receive and escorted them to their seats.

५६. पूर्णेन्दुबिम्बसदृशी पश्यन्तोऽपि मुहुस्तयोः ।
दर्शनीयानने सभ्या नापुस्तृप्तिं सविस्मयाः ॥

व्या :- पूर्णेति :- सभ्याः सामाजिकाः, पूर्णश्चासाविन्दुश्च पूर्णेन्दुः, राकाचन्द्र इत्यर्थः। तेन सदृशी समाने, तयोः कुमारयोः, दर्शनीयानने सुन्दरमुखमण्डले, मुहुः पुनः पुनः, पश्यन्तोऽपि वीक्षमाणा अपि, सविस्मयाः आश्चर्यपरवशास्सन्तः, तृप्तिं सन्तुष्टिं, न आपुः न प्राप्नुवन्। तन्मुखमण्डलमासेचनकमिति भावः, आप्लृ व्याप्तौ इति धातोर्लिट्।

తా॥ పూర్ణచంద్రబింబములవలె అందముగా కలకలలాడుచున్న ఆ కుమారవరుల ముఖమండలములనుగాంచి, ఆ సభయందున్నవారు ఆశ్చర్యపరవశులై తృప్తితీరక మాటిమాటికి జూచుచుండిరి.

There were two full moons now in the court at whom everyone in the court turned to see again and again.

५७. उररीकृत्योपहारं नमस्कारपुरस्सरम् ।
तयोरुदन्तं पप्रच्छ सार्वभौमस्सविस्मयः ॥

व्या :- उररीकृत्येति :- सार्वभौमः चक्रवर्ती, सविस्मयः आश्चर्याविष्टमनाः, नमस्कारपुरस्कृतं प्रथमं नमस्कृत्य तदनन्तरं दत्तम्, उपहारम् उपदाम्, उररीकृत्य

In Public domain. Digitization Muthulakshmi Research Academy

अङ्गीकृत्य, स्वीकृत्येत्यर्थ। तयोः द्विजराजकुमारयोः, उदन्तं वृत्तान्तं, ''वार्ता प्रवृत्तिः वृत्तान्त उदन्त'' इत्यमरः। पप्रच्छ अपृच्छत्। प्रच्छ प्रश्ने इति धातोर्लिट्।

తా॥ ఆ సార్వభౌముడాశ్చర్యపరవశుడై, నమస్కార పూర్వకముగ వారొసంగిన కానుకను స్వీకరించి, వారి వృత్తాంతము నడిగెను.

The delighted monarch accepted the gift from them respectfully and enquired them of their details.

उपजातिः

५८. **महाभिरूपौ विनयान्वितौ तौ वदावदौ भारतवर्षदीपौ ।**
प्रचक्रमाते गदितुं स्ववार्तां धीरावुदारौ जगदेकवीरौ ॥

इति ब्रह्मश्री श्रीमदज्ञाडादिभट्टनारायणदासमहाकविविरचिते तारकाख्ये महाकाव्ये तृतीयस्सर्गः ॥

व्या :- महाभिरूपाविति :- महाभिरूपौ अति सुन्दरौ अथवा महापण्डितौ, 'प्राप्तरूपसुरूपाभिरूपा बुधमनोज्ञयो' रित्यमरः। विनयान्वितौ विनयोपेतौ, वदावदौ सभायां निर्भयं वक्तारौ, ''वदो वदावदो वक्ता'' इत्यमरः। भारतवर्षस्य भारतभूमेः, दीपौ दीपसदृशौ, धीरौ धैर्यवन्तौ, उदारौ औदार्यभावोपेतौ, अथवा महान्तौ, जगदेकवीरौ लोकैकवीरौ, तौ द्विजराजकुमारौ, स्ववार्तां स्वोदन्तं, गदितुं वक्तुं, प्रचक्रमाते प्रारेभाते। प्रपूर्वक क्रमु पादविक्षेपे इति धातोर्लिट्। वृत्तलक्षणन्तु पूर्वमेवोक्तम्।

తా॥ రూపవంతులు మహాపండితులు, వినయవంతులు, వక్తలు, దాతలు, ధీరులు, లోకైకవీరులు భారతవర్ష దీపములునగు నా ద్విజ రాజకుమారులిరువురు వారి వృత్తాంతమును చెప్పనారంభించిరి.

Both the young princely friends were a perfect blend of beautiful features, scholarliness and obedience. They were

In Public domain. Digitization Muthulakshmi Research Academy

great orators, were philanthropic and valorous and most importantly the lamps of *Bharatadesa*, began to narrate about themselves.

ఇతి బ్రాహ్మీభూషణ బ్రహ్మశ్రీ రాంభట్ల లక్ష్మీనారాయణశాస్త్రి విరచితాయాం
భావార్థదీపికాఖ్యాయాం వ్యాఖ్యాయాం తృతీయస్సర్గః.

इति ब्राह्मीभूषणब्रह्मश्री राम्भट्ललक्ष्मीनारायणशास्त्रिविरचितायां
भावार्थदीपिकाख्यायां व्याख्यायां तृतीयस्सर्गः ।।

In Public domain. Digitization Muthulakshmi Research Academy

तारके चतुर्थस्सर्गः

स्रग्धरा

१. सृष्ट्यादावाविरासीत्तरुविमृगनृणां संश्रयो यो हिमाद्रि
वेदद्रष्टृषिसेव्या विलसति तदवाक्पार्श्वतः कर्मभूमिः।
साऽद्याधीश त्वदीयोऽखिलधनकलिता नावभूत्तत्र जन्म
ब्रह्मक्षत्रौ स्व आवां तव यदि करुणा स्याद्भवेव प्रतीतौ ॥

व्या :- सृष्ट्यादाविति :- सृष्टेः आदौ, सृष्टिप्रारम्भकाले, तरवः वृक्षाः वयः पक्षिणः, मृगाः जन्तवः, नरः मनुष्याः, तेषाम्, उद्भिज्ञाण्डजस्वेदज जरायुजानामित्यर्थः। संश्रयः आधारः यः हिमाद्रिः हिमालयः, आविरासीत् आविर्बभूव, तस्य हिमवतः। अवाक्पार्श्वतः दक्षिणभागे वेदान् मश्यन्तीति वेदद्रष्टारः ये ऋषयः तैस्सेव्या, तेषामाश्रयभूता, कर्मभूमिः भारतभूमिः, विलसति प्रकाशते। अधीश, हे प्रभो । सा भारतभूमिः, अद्य इदानीं, त्वदीयं तावकीनम्, अखिलं सम्पूर्णं, यत् धनं सम्पत्, तेन कलिता युक्ता, अभूदित्यध्याहारः। तत्र तस्यां कर्मभूमौ, नौ आवयोः, जन्म जननम् अभूत् आसीत्, आवां, ब्रह्मक्षत्रौ ब्राह्मणक्षत्रियकुलजातौ स्वः भवावः। तव भवतः कृपा करुणा, स्याद्यदि भवेच्चेत्। प्रतीतौ प्रख्यातौ प्रहृष्टौ च भवेव स्याव। ''प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः'' ''ख्याते हृष्टे प्रतीतस्स्या''दिति चामरः।

सर्गप्रारम्भसमये जरायुजाण्डजस्वेदजोद्भिज्ञानां चतुर्विधभूतजातानामाधारभूतो हिमालयो नाम पर्वतः आविर्बभूव। तत्पर्वतस्य दक्षिणपार्श्वे कर्मभूमिरासीत्। तस्यां वेदद्रष्टारो महर्षयो निवसन्ति स्म। सा कर्मभूमिरिदानीं भवदीयसम्पदा अलङ्कृताऽस्ते। तत्र आवां विप्रक्षत्त्रकुलयोरुत्पन्नौ स्वः, यद्यावयोः भवतः कृपा पतेच्चेदावां प्रसिद्धौ परमानन्दकलितौ च भवेव।

स्रग्धरालक्षणम्

''म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयं''

म - र - भ - न - य - य - याः गणाः त्रिवारं सप्ताक्षरैर्यतिः।

 In Public domain. Digitization Muthulakshmi Research Academy

తా॥ సృష్టి ప్రారంభమున హిమవంతమను పర్వతము ఆవిర్భవించెను. అందు పక్షులు మృగములు క్రిమికీటకాదులు మానవులుగూడనుండిరి. ఆ పర్వతమునకు దక్షిణపార్శ్వమున కర్మభూమియున్నది. అందు వేదద్రష్టలయిన మహర్షులు నివసించిరి. అందు మేము బ్రహ్మక్షత్ర కులములందు జన్మించితిమి. ఆ భారతభూమి తమ సంపద్వైభవములతో నలరారుచున్నది. మీ దయ మా యందు బ్రసరించినయెడల మేము ప్రసిద్ధులము పరమానందభరితులము కాగలము.

Right at the beginning of the creation, there grew a mountain that was later called *Himavanta*. That was an abode for many humans, animals, birds and many more creatures. To the left of the mountain is a land where people who give utmost importance to and who have Vedic experience. We two were born into Brahmin and kshatriya families respectively. Our homeland Bharata is glorious, prosperous and is abounding. And with your kind concern we can be happy and famous.

वसन्ततिलका

२. धर्मं सदान्ववसितेन भवत्खगेन देशेऽद्य नः कुजनदण्डतमो निरस्तम् ।
सच्चक्रसम्मद उरीकृत आततायिघूकोरुभीकररवः सुतरां विलुप्तः ॥

व्या :- धर्ममिति :- अद्य इदानीं, नः अस्माकं, देशे कर्मभूमौ, धर्मं सदा सन्ततम् अन्ववसितेन अन्ववगतेन, नित्यं धर्मबद्धेन, भवानेव खगः सूर्यः तेन, सूर्यरूपेण भवतेत्यर्थः ''शरार्क विहगाः खगा'' इत्यमरः, कुजनानां दुष्टानां, दण्डः शिक्षणं, तदेव तमः तिमिरं, निरस्तं दूरीकृतम्, सन्तः सत्पुरुषा एव चक्राः चक्रवाकपक्षिणः, तेषां सम्मदः प्रमोदः उरीकृतः विपुलीकृतः। ''कोकश्चक्रश्चक्रवाक'' इत्यमरः। आततायिनः वधोद्युक्ताः परानिष्टकारिणो मानवाः, त एव घूकाः उलूकाः, तेषाम् उरुभीकरः अधिकभयङ्करः, रवः रुतं, सुतराम् अत्यन्तं, विलुप्तः नष्टः। ''अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहा, क्षेत्रदारहरश्चैव षडेते ह्याततायिनः'' इत्याततायिलक्षणम्।

In Public domain. Digitization Muthulakshmi Research Academy

यभा सहस्रकिरणे सन्ततं सन्तपति सति नैशान्धकारो विनश्यति, चक्रवाकास्तुष्यन्ति, उलूकरवः सुतरां विनश्यति, तथा धर्ममार्गेण भवति राज्यं पालयति सति, अस्मद्देशे कुजना एव न सन्ति कुतस्तद्दण्डनवार्ता। सत्पुरुषास्सम्मोदभरिता आसन्। आततायिनोऽत्यन्तमस्तङ्गताः।

अत्रराजसूर्ययोः कुजनतमसोः सत्पुरुषचक्रवाकयोः आततायुलूकयोश्च सारोपरूपकालङ्कारः।

वसन्ततिलका लक्षणम्

"उक्ता वसन्ततिलका तभजाजगौ गः"

त - भ - ज - ज - ग - गाः गणाः। पादान्ते लघुस्सर्वत्र गुरुरिति ज्ञेयम्।

తా॥ ఓ రాజా ! సూర్యుడు వెలుగుచుండ చీకటి అంతర్ధానమగును. చక్రవాకములధికముగ నానందించును. గుడ్లగూబల ధ్వనులు వినబడవు. అట్లే నీవు రాజ్యమునేలుచుండ, మాదేశమున కుజనదండనములు అంతరించినవి. సజ్జనులానందభరితులైరి. పరులను బాధించు నాతతాయివర్గము సంపూర్ణముగ నశించినది.

Oh Monarch! Darkness disappears with the rising of the sun. The sunrise gives *chakravaka* bird immense happiness and dispels cries of owls. Similarly, during your tenure our country witnessed the disappearance of punishments to wicked people. Good and virtuous people have peaceful and happy life and those who trouble and inflict pain on others no longer thrive there.

पुष्पिताग्रा

३. सकलधरणिपालका अनु त्वां तव न नभोमणिरस्तमेति राज्ये ।
त्वयि महिमवति प्रभो कवीन्द्राभिहितजडोऽपि विशारदायतेऽद्य ॥

व्या :- सकलेति :- प्रभो हे सार्वभौम । सकलधरणिपालकाः सर्वे भूपतयः, त्वामनुभवन्तमनुसृत्य वर्तन्ते भवतो हीना इत्यर्थः। "हीने" इति अनोः

 In Public domain. Digitization Muthulakshmi Research Academy

कर्मप्रवचनीयत्वम्। नभोमणिः सूर्यः तव राज्ये भवद्राज्ये, अस्तं नैति नास्तं गच्छति। यावत्सूर्यरश्मिः प्रसरति तावत्पर्यन्तं तव राज्यमस्तीत्यर्थः। त्वयि महिमवति त्वयि महिमान्विते सति, कवीन्द्रैः पण्डितोत्तमैः, अभिहितः कथितः, जडोऽपि, मन्दबुद्धिरपि। अयं मन्दमतिरिति कवीन्द्रैः निर्णीतोऽपीत्यर्थः। अद्य विशारदायते विशारद इव सर्वसमर्थ इव आचरति पण्डितो भवतीति भावः।

हे सार्वभौम । सर्वेऽपि धरणिपालाः त्वत्तो हीनाः। अतस्त्वामनुसृत्य वर्तन्ते। महीमण्डले यावत्पर्यन्तमादित्यः प्रतपति तावत्पर्यन्तं तव राज्यमस्ति। त्वदीयमहिम्ना मन्दबुद्धिरपि महापण्डितो भवति। विशारदायते आचारार्थे क्यङ्।

पुष्पिताग्रावृत्तलक्षणम्

"अयुजि नयुग रेफतो यकारः
युजि च नजौ जरगाश्च पुष्पिताग्रा"
प्रथमतृतीयपादयोः न - न - र - य - गणाः
द्वितीयचतुर्थयोस्तु न - ज - ज - र - गाः गणाः पादान्ते यतिः।

తా॥ ఓ సార్వభౌమా ! నేటి ధరణీ పాలకులందరును నీకంటెదక్కువవారే. నిన్నునుసరించి తిరుగువారే. సూర్యుడు ప్రకాశిస్తున్నంత వరకు నీ యనన్య మహిమచే మందబుద్ధియు మంచి పండితుడగుచున్నాడు.

Hey Monarch, you are unsurpassable and all your counter parts play a second fiddle to you. They can just emulate you. Your reign shall be there as long as the Sun shall endure. Because of your efficacy a dullard too is transmogrifying into a scholar.

अनुष्टुप्

४. सिंहलाब्धौ मौक्तिकन्ति तुहिनन्ति हिमालये ।
वज्रन्ति गौतमीतीरे यशांस्यद्य विभो तव ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- सिंहेति :- हे विभो । सार्वभौम । अद्य इदानीं, तव भवतः, यशांसि कीर्तयः, सिंहलाब्दौ सिंहलद्वीपसमुद्रे, दक्षिणसमुद्र इत्यर्थः, मौक्तिकन्ति मौक्तिकानीवाचरन्ति। "सर्वप्रातिपदिकेभ्यः क्विब्वाच्यः" इति वचनेन क्विबन्तं रूपमिदं, हिमालये हिमगिरौ, तुहिनन्ति तुहिनानीवाचरन्ति। उत्तरदिशीत्यर्थः। गौतमीतीरे गोदावरीनदीतीरे, आन्ध्रदेशे, प्राच्यां दिशीत्यर्थः। वज्रन्ति वज्राणीवाचरन्ति।

भवद्यशः दक्षिणदिशि सिंहलसमुद्रप्रान्ते मुक्ताफलमिव राजते, दक्षिणसमुद्रे मौक्तिकानि लभ्यन्त इति प्रसिद्धिः। हिमालये हिमवद्राजते, हिमालये तुहिनाधिक्यं प्रसिद्धमेव, प्राच्यां दिशि आन्ध्रदेशे गौदावरीतीरे वज्रमिव राजते। आन्ध्रदेशो वज्राणामाकर इति प्रसिद्धिः। सर्वासु दिक्षु तव कीर्तिः मुक्ताफलवत्तुहिनसंहतिवद्वज्रमणिवद्विराजत इति भावः। उपमालङ्कारः।

తా॥ ఓ రాజరాజా ! నీకీర్తి దక్షిణదిశయందున్న సింహల సముద్రమున ముత్యమువలెను, ఉత్తరదిక్కునగల హిమాలయమున మంచుగడ్డవలెను, తూర్పున ఆంధ్రదేశమందలి గోదావరీతీరమున వజ్రమువలెను వెలుగుచున్నది. అన్ని దిక్కులందునను నీకీర్తి వ్యాపించినది.

Oh king of kings! Your fame and prominence shines like a pearl at *Simhala* in the south, like snow at the Himalaya in the north, like a diamond at Andhra region in the east. You are famous and illustrious all over the country.

द्रुतविलम्बितम्

५. **न नृबलिः क्वचिदप्युरुभीकरः प्रहणनं न चितौ कुलयोषिताम् ।**
भरतवर्षतले नरविक्रयो न हि कृपानिलये त्वयि शासति ॥

व्या :- नेति :- कृपानिलये दयाकरे, त्वयि भवति, शासति परिपालयति सति, भरतवर्षतले भारतभूमौ, उरुभीकरः अधिकभयोत्पादकः नृबलिः मनुष्यबलिः, न नास्ति, कुलयोषितां कुलकान्तानां, चितौ चितायां, प्रहणनं वधः, सहगमनमित्यर्थः, न नास्ति, नरविक्रयः मनुष्यविक्रयणं, मानवक्रयविक्रयरूपकार्यकलाप इत्यर्थः, न हि नास्त्येव।

In Public domain. Digitization Muthulakshmi Research Academy

हे सार्वभौम । दयार्द्रहृदये त्वयि परिपालके सति, भारतवर्षे कुत्रापि, मनुष्यबलिर्नास्ति। सहगमनदुराचारो नास्ति। मनुष्यक्रयविक्रयरूपकर्मकलापोऽपि नास्ति।

द्रुतविलम्बितवृत्तलक्षणम्

''द्रुतविलम्बितमाह नभौ भरौ''

न-भ-भ-राःगणाः- पादे यतिः।

తా॥ ఓ సార్వభౌమా ! దయార్ద్రచిత్తుడవైన నీవు రాజ్యమునేలుచుండ, భరత వర్షమున, దేవతాది నిమిత్తమై మనుష్యులను బలిగా చంపుటగాని, భర్త మరణించిన ఆ శవముతో భార్యనుగూడ జితిపైనుంచి కాల్చుటగాని, మనుష్యుల నమ్ముకొనుటగాని లేవు.

Oh Sovereign! Under your rule; in Bharata, now there are no sacrificial offerings to gods under the name of religion, no Sati, where a wife is burnt alive along with the corpse of her husband and there is no human trafficking.

भुजङ्गप्रयातम्

६. **पशूनां विना हिंसयैवातिदूरं नृवार्ता चितान्यन्त्रिणो द्राङ्नयन्ति ।**
मरुर्वप्रतीहापि राज्ये त्वदीये धियाऽसाधनीया क्रिया नास्ति लोके ॥

व्या :- पशूनामिति :- पशूनाम् अश्वादिजन्तूनां, हिंसया विना एव हिंसां विहायैव, नृणां मानवानां याः वार्ताः प्रवृत्तयः तासाम् आचितान् भारान्, नृवार्ताञ्चितालेखादिसञ्चयानित्यर्थः। यन्त्रिणः यन्त्रारूढाः अतिदूरं बहुदूरं, द्राक् शीघ्रं, नयन्ति प्रापयन्ति, त्वदीये भवदीये, राज्ये राष्ट्रे, इहापि अत्रापि मरुः मरुभूमिः, निर्जलप्रदेश इत्यर्थः। वप्रति वप्र इवाचरति केदारायते, ''वप्रः पितरि केदारे'' इत्यमरः। लोके जगति, धिया बुद्ध्या, असाधनीया कर्तुमशक्या, क्रिया कार्यविशेषः, नास्ति न भवति खलु।

पुरा काले अश्वोष्ट्रादिजन्तुद्वारा मानवाः वातप्रिषणमकुर्वन्, इदानीं तव राज्ये, तज्जन्तुपीडां परिहृत्य, यन्त्राधिष्ठानपुरुषाः, अथवा धूमशकटविमानादियन्त्राण्येव

In Public domain. Digitization Muthulakshmi Research Academy

तत्कार्यं कुर्वन्ति। तव राज्ये निर्जला मरुभूमयोऽपि, सजलाः सजलास्सस्यानुकूलकेदारा एव भवन्ति। जगति बुद्धेरसाध्यं किमपि नास्ति। बुद्धिमन्तस्सर्वमपि साधयन्तीति भावः अर्थान्तरन्यासालङ्कारः।

भुजङ्गप्रयातलक्षणम्

''भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः''
य-य-य-याः गणाः पादे यतिः

తా॥ పూర్వపు దినములలో గుఱ్ఱములు ఒంటెలు మున్నగు జంతువులద్వారా, లేక చిలుకలు పావురములు మున్నగు పక్షులద్వారా, వార్తలనంపుచుండిరి. ఇప్పుడు నీ రాజ్యమున నా జంతుజాతమునకు శ్రమలేకుండ యంత్రములును, తదధికారులును ఆ కార్యముల నాచరించుచున్నారు. నీ రాజ్యములో నిర్జలములైన ఎడారు భూములుకూడ జలసమృద్ధములై పంటపొలములైనవి. బుద్ధికి సాధ్యముకాని కార్యములుండవుగదా ! బుద్ధిమంతులన్ని కార్యములను సాధింతురు.

Earlier animals like horses and camels or birds like parrots and doves were the means of sending messages. Now they are relieved of the strain as the operators of the machines that have been invented are doing such tasks. Your able ruling has turned barren land into fertile with the flow of water. Everything is possible for an intellect and you are one.

- स्वागता -

७. **निम्नगाः प्रतिहताः कठिनाल्या जीवनं ददति दूरजनाय ।**
कृत्रिमाल्पनद विस्तृतहस्ताः पीडयैव ददते वसुलुब्धाः ॥

व्या :- निम्नगा इति :- कठिनानां कठिनवस्तूनां पाषाणेष्टकादीनाम्, आल्या पङ्क्त्या, प्रतिहताः निरुद्धाः, दृढसेत्वादिभिर्निरुद्धजला इत्यर्थः। निम्नगाः नद्यः, कृत्रिमाः कल्पिताः अल्पनदाः अल्पकुल्याः त एव विस्तृताः ततः हस्ताः कराः यासां ताः, कृत्रिमनिर्मितकुल्या हस्ता इत्यर्थः। दूरजनाय दूरदेशस्थितजनसमूहाय,

In Public domain. Digitization Muthulakshmi Research Academy

जीवनं जलं जीविकां च ददति यच्छन्ति, लुब्धाः लोभगुणोपेता जनाः, पीडयैव निर्बन्धेनैव, वसु धनं, ददते यच्छन्ति, न सामवाक्यैः। रूपकानुप्राणितः अथान्तरन्यासः।

निम्नं नीचं गच्छन्तीति निम्नगाः नद्यः। ता आपगाः सेतु सङ्क्रमादिकठिन पाषाणादिभिः निरुद्धास्सत्यः, कृत्रिमकुल्यारूपहस्तान् प्रसार्य, दूरस्थितजनेभ्यः जलं यच्छन्ति। प्रकृत्या धनासक्ता लुब्धाः कस्मैचिदपि किञ्चिदपि धनं सामादिवाक्यैर्न यच्छन्ति। किन्तु बलवद्भिः पीडिता एव स्वधनमन्येभ्यो दिशन्ति।

यथा लुब्धाः निर्बन्धेनैव हस्तं प्रसार्य अन्येभ्यः स्वधनं प्रयच्छन्ति तथा नद्य अपि सेत्वादिभिर्निरुद्धास्सत्यः कुल्यादिभिः दूरजनाय जीवनं यच्छन्तीति यावत्।

स्वागतावृत्तलक्षणम्

''स्वागतेति रनभाद्गुरुयुग्मम्''
र-न-भ-ग-गाः गणाः पादे यतिः

తా॥ లోభి వారిని బ్రతిమాలిన ధనమునీయరు. బాధించినచో చేతులను దాచి తమకడనున్న ధనమును ఇతరులకిచ్చెదరు. అట్లే మీ దేశమున నదులన్నియు, ఆనకట్లను గట్టిగా నిర్బంధింపబడి, చిన్న చిన్న కాలువలద్వారా దూరముననున్న వారికి గూడ జీవనమునిచ్చుచున్నవి.

Even on pleading, a miser doesn't part with his money. But when pain is inflicted, gives away his wealth. Similarly the rivers in your kingdom with well-built dams carry channelized water and reach out to people in far off places too.

- शार्दूलविक्रीडितम् -

८. षट्कर्मावगता द्विजातय इला गुप्त्युद्यताः क्षत्रियाः
गोरक्षाकृषिविक्रयक्रयपरा वैश्यास्सदाराधकाः ।
शूद्रा वर्णचतुष्टयप्रकटिता ये भारतीया जना
स्ते दुष्टाधिपदूषिता अपि पुनश्शुद्धिं लभन्ते त्वया ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- षट्कर्मेति :- द्विजातयः ब्राह्मणाः षट्कर्मावगताः ज्ञातषट्कर्माणः। यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहाः षट्कर्माणि, तानि जानन्तः तदाचरणनिरता इत्यर्थः। क्षत्रियाः राजानः, इला भूमिः, तस्याः गुप्तिः रक्षणं, तदर्थम् उद्यताः उद्युक्ताः। भूपरिपालनबद्धदीक्षा इत्यर्थः, ''गौरिला कुम्भिनी क्षमा'' इत्यमरः। वैश्याः विशः, गोरक्षा धेनुरक्षणं, कृषिः कर्षणं, क्रयविक्रयौ वाणिज्यं, तेषु, पराः आसक्ताः, कृषिः गोरक्षावाणिज्यनिरता इत्यर्थः, शूद्राः सतां सत्पुरुषाणाम् आराधकाः, सज्जनाराधनपरायणा इत्यर्थः। ये, वर्णचतुष्टयेन चातुर्वर्ण्येन, प्रकटिताः प्रख्याताः, भारतीया जनाः भारतभूमिनिवासिनो मानवाः, ते सर्वे, दुष्टाधिपेन दुष्टप्रभुणा, दूषिता अपि कलङ्किता अपि, पुनः भूयः, त्वया भवता, शुद्धिं परिशुद्धतां, दोषराहित्यमित्यर्थः। लभन्ते प्राप्नुवन्ति।

भारतवर्षे ब्राह्मणक्षत्रियवैश्यशूद्राः सर्वेऽपि स्वस्वकर्मसु निरता आसन्। तथापि, दुष्टप्रजापलकदोषैः स्वाचारभ्रष्टा अभूवन्। तथापि त्वया पुनश्शुद्धिं प्राप्नुवन्ति।

शार्दूलविक्रीडतलक्षणम्

सूर्याश्वैः मसजस्ततास्सगुरवः शार्दूलविक्रीडितम्''

म-स-ज-स-त-त-गाः गणाः द्वादशभिस्सप्तभिश्च यतिः।

తా॥ భారతదేశమున నాలుగు వర్ణముల జనులు గలరు. అందు బ్రాహ్మణులు షట్కర్మనిరతులు, యజ్ఞములను చేయుట చేయించుట, వేదములను చదువుట చెప్పుట, దానమిచ్చుట పుచ్చుకొనుట అనునవి ఆరుకర్మములు. ఆ కర్మముల నెఱింగినవారు, రాజులు రాజ్య రక్షణ దీక్షితులు, వైశ్యులు వ్యవసాయ వాణిజ్య గోరక్షణముల నాచరింతురు. శూద్రులు సజ్జనారాధకులు, ఇట్లు భారతీయులందరును వారి వారి కర్మముల నాచరించుచున్నను, దుష్టప్రభు పరిపాలన ప్రభావమున వారి వారి కర్మములను విడిచి కలంకితులైరి. అయినను మీ పరిపాలన మహిమచే వారు మరల శుద్ధిని పొందుచున్నారు.

In Public domain. Digitization Muthulakshmi Research Academy

In Bharata country, people are of four *varnas*. Brahmins among the four are prescribed six primary duties. Doing *yagnas* and making people perform the same, studying and teaching of Vedas, giving and taking donations. And they are well versed with these six. Kings have the duty of guarding and taking care of their kingdom. *Vaishyas* do business and have an additional duty of taking care of cows. The *shudras* respect the good people and go by the other three *varnas*. Thus the people of all races though have been discharging their duties, now are influenced by a bad ruler's governance and have forsaken their codes of professional responsibilities. Yet, they come back to track because of your reign and supervision.

भुजङ्गप्रयातम्

९. कुलस्त्रीं हरन् भूमिदेवं प्रणिन्दन् दृणन्देव गेहं दहन्पत्तनानि ।
शकाधीश्वरो भारतैश्वर्यमापज्जनो नान्यदुःखं विनैति स्वसौख्यम् ।।

व्या :- कुलस्त्रीमिति :- शकाधीश्वरः शकदेशप्रभुः कुलस्त्रीं कुलकान्तां, हरन् अपहरन्, भूमिदेवं भूसुरं, प्रणिन्दन् अधिकं दूषयन्, देवगेहं देवालयं, दृणन् दारयन्, नाशयन्नित्यर्थः। पत्तनानि नगराणि दहन् अग्निसात्कुर्वन्, भारतैश्वर्यं भारत भूसम्पदम्, आपत् प्राप, अपाहरदित्यर्थः। जनः मानवः, अन्यदुःखं विना, इतरान् दुःखितानकृत्वा, स्वसौख्यम् आत्मसुखं, न एति न प्राप्नोति। अर्थान्तरन्यासः।

कश्चन शकाधीश्वरः यवनः भारतदेशं प्रविश्य, कुलकान्ताम् अपहरन्, विप्रान्निन्दन्, देवालयान्विध्वंसयन्, नगराणि दहन् सर्वं भारतैश्वर्यम् अपाहरत्, लोके मानवः इतरान् सम्पीड्यैव स्वयं सुखमनुभवति। नान्यथा।

- भुजङ्गप्रयातवृत्तलक्षणं पूर्वमेवोक्तम् -

తా॥ శకాధిపతి యొకడు భారతదేశమును ప్రవేశించి, పరకాంతల నపహరించుచు, బ్రాహ్మణులను నిందించుచు, దేవాలయములను పడగొట్టుచు,

In Public domain. Digitization Muthulakshmi Research Academy

పట్టణములను కాల్చుచు, భారతదేశ సంపదనంతను దోచుకొన్నాడు, లోకమున, పరులను బాధించి తాము సుఖపడుట నిజమైనది. ఇతరులను పీడింపక తాను సుఖపడుట దుర్లభముగదా.

A *shaka* ruler, intruded into our territory, abducted women, defamed Brahmins, destroyed our sacred temples, and has looted away all our wealth. It has become a norm to torture others and derive happiness. To live happily without taking others to task looks like inevitable.

पृथ्वी

१०. यथेष्टमतवृत्तयस्तवजना भजन्ते मुदं समक्षमधुनाऽभयाः प्रतिवदन्ति धर्मं प्रभुम्।
सुवर्णमपि मुष्यते न बहु विच्युतं चत्वरे सदा न हि सुखायते कथमभिज्ञराज्ये जनः ॥

व्या :- यथेष्टमिति :- तव जनाः त्वदीया मनुष्याः, यथेष्टं यथाभिलषितं, मतं, वृत्तिः वर्तनं, च येषां ते, अभीष्टमतावलम्बिनः अभीष्टवृत्तिमन्तश्चेत्यर्थः। मुदं प्रीतिं, भजन्ते प्राप्नुवन्ति। अधुना इदानीम्, अभया निर्भयास्सन्तः समक्षं अक्ष्णोस्समीपे, प्रभुं राजानं, धर्मं धर्मविशेषं, प्रतिवदन्ति कथयन्ति। चत्वरे अङ्गणे, विच्युतं भ्रष्टं, सुवर्णं काञ्चनं, बह्वपि अधिकमपि, न मुष्यते नापह्रियते। अभिज्ञस्य सर्वज्ञस्य, राज्ये राष्ट्रे, जनः जनसमूहः, सदा नित्यं, कथं नहि सुखायते, किमर्थं सुखं नानुभवति, सदा सुखमनुभवत्येवेत्यर्थः।

हे प्रभो । भवदीयराज्ये सर्वेऽपि जनाः स्वेच्छानुरूपं मतं, स्वशक्त्यनुकूलां वृत्तिं च स्वीकृत्य परमानन्दमनुभवन्ति। सभायां राज्ञस्समक्षमेव धर्मं निर्भीका वदन्ति। त्वदीयराज्ये प्रमादवशादङ्गणे च्युतं सुवर्णं बह्वपि तत्रैव वर्तते। न केनाप्यपह्रियते, तदुचितमेव। अभिज्ञे राजनि राज्यं पालयति, सति सर्वोऽपि सुखमेवानुभवति। न दुःखमिति भावः काव्यलिङ्गमलङ्कारः। ''समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थन'' मिति तल्लक्षणम्।

In Public domain. Digitization Muthulakshmi Research Academy

पृथ्वीवृत्तलक्षणम्

''जसौ जसयलावसुग्रहयतिश्च पृथ्वीगुरुः''

ज-स-ज-स-य-ल-गाः गणाः, अष्टभिर्नवभिश्च यतिः।

తా॥ ఓ స్వామీ! మీ రాజ్యమున మీ వారందరును, తోచిన మతమును తోచిన వృత్తిని గ్రహించి ఆనందించుచున్నారు. సుఖముగా జీవించుచున్నారు. మీ రాజ్యమున, ప్రమాదవశమున త్రోవలో జారిపడిన బంగారము ఎంత అధికముగానున్నను, దానినెవ్వరును ముట్టరు. అది ఉచితమే ఏమనగా, సర్వజ్ఞుడైన ప్రభువు రాజ్యము నేలుచుండగా ప్రజలకు సుఖమే లభించునుగాని దుఃఖమెట్లు కలుగును? దుఃఖముండదు, సుఖమే ఉండును.

Hey Lord! Your subjects here have the freedom to embrace the faith and profession too of their choice and are thus living happily. Even if they found good amount of gold on the street, they wouldn't flick it off. And that's the proper gesture expected of honest people. Under the ruling of someone like you, who knows everything and takes good care of people in his kingdom, people are happy and content. (They don't eat bread unearned).

शिखरिणी

११. अमात्यास्सर्वज्ञाः पिपुरति सदा कर्मसचिवा महामात्रा धीराश्चतुरमनसोऽमी प्रणिधयः। पुरोधोऽध्यक्षास्सन्नुतपृथुलवैदग्ध्यकलिता यशोभिस्साम्राज्यं तव सकलभूपालकमणे॥

व्या :- अमात्या इति :- सकलभूपालकमणे । सर्वराजन्यश्रेष्ठ । सर्वज्ञाः सकलज्ञानविशारदाः अमात्याः मन्त्रिणः, कर्मसचिवाः सामान्यकार्यनियुक्ताः नियोगिनः, धीराः धैर्योपेताः महामात्राः, सेनाधिपतयः, चतुरमतयः, निपुणबुद्धयः अमी एते प्रणिधयः गूढचाराः, सन्नुतं सज्जनश्लाघ्यं पृथुलं विस्तृतं यत् वैदग्ध्यं नैपुणं तेन कलिताः युक्ताः पुरोधसां पुरोहितानाम् अध्यक्षाः नायकाश्च, तव साम्राज्यं भवत्सार्वभौमत्वं, यशोभिः कीर्तिभिः, सदा सन्ततं, पिपुरति पूरयन्ति, पृपालन पूरणयोरिति धातोर्लट्।

In Public domain. Digitization Muthulakshmi Research Academy

हे राजन्यश्रेष्ठ ! तवामात्यास्सर्वार्थविशारदाः, कर्मसचिवाः सकलकार्यकर्तारः। सेनानायकाः धैर्यसाहसोपेताः, गूढचारिणोऽतिनिपुणमतयः, पुरोहिताध्यक्षास्सर्वजन श्लाघ्यकर्मकरणदक्षाः, एते सर्वेऽपि तव राज्यं सदा यशोभिः पूरयन्ति। साम्राज्य कीर्तिं वर्धयन्ति।

शिखरिणीवृत्तलक्षणम्

''रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी''
य-म-न-स-भ-ल-गाः गणाः षड्भिरेकादशभिश्च यतिः।

తా॥ ఓ సార్వభౌమా ! సర్వజ్ఞులైన మంత్రులు, కార్యకరణదక్షులైన ఉద్యోగులు, ధీరులైన సేనాధిపతులు, నిపుణమతులైన గూఢచారులు, సత్కార్యకరణ విదగ్ధులైన పురోహితాధ్యక్షులును (బిషప్పులు) నీ సామ్రాజ్యమును సత్కీర్తితో నింపుచుండిరి.

Hey Monarch! Wise ministers, task-oriented employees, valorous army commanders, skilled secret agents and religious heads who are engulfed by the desire to do good deeds all are paying a great tribute to you.

हरिणी

१२. भृशमभिजनोऽस्माकं यस्ते कृपाप्रतिपालितो बहुसुखधनं लब्ध्वा त्वां सोऽर्चति प्रियपुत्रवत्।
इह सवयसौ धन्यावावां त्वदञ्चितसम्मुखं द्रुतमुपगतावित्थं स्वामी प्रमाणमितःपरम् ॥

व्या :- भृशमिति :- ते कृपापालितः भवद्दयाभिरक्षितः, यः, अस्माकम् अभिजनः देशः, ''कुलेऽप्यभिजनो जन्मभूमावपी'' त्यमरः। सः तद्देशः, भृशं अत्यन्तं, बहुसुखधनम् अधिकसुखसम्पदं, लब्ध्वा प्राप्य, त्वां भवन्तं, प्रियपुत्रवत् प्रियकुमारमिव, अर्चति पूजयति इह अत्र। सवयसौ वयस्यौ, ''स्निग्धो वयस्य स्सवयाः'' इत्यमरः। आवां धन्यौ कृतार्थौ, इत्थम्, एवं, त्वदञ्चितसम्मुखं पूज्यभवत्समीपं, उपगतौ प्राप्तौ स्वः, इतःपरम् इत ऊर्ध्वं, स्वामी भवानेव प्रमाणम्।

In Public domain. Digitization Muthulakshmi Research Academy

हे स्वामिन् ! अस्मज्जन्मभूमिः भवत्कृपया सुष्ठु परिपालिता सती सुखसम्पदमधिकमनुभवति, सैषेदानीं त्वां प्रियपुत्त्रमिव पूजयति, इहागतावावां भवदादरेण कृतार्थौ स्वः, अस्मदागमनकारणं भवानेव जानाति, श्रुत्वा देवः प्रमाणमिति तावूचतुः।

हरिणीवृत्तलक्षणम्

''रसयुगहयैः न्सौम्रौस्लौ गोयदा हरिणी''

स-स-म-र-स-ल-गाः गणाः, षट्सु चतुर्षु सप्तसु च यतिः।

తా॥ ఓ రాజా ! నీవు దయతో మా దేశమును పాలించుచుండుటంజేసి, మా దేశము మిక్కిలి సుఖసంపదలతో నిండియున్నది. మిమ్ము మిక్కిలి అభిమానముతో ప్రియపుత్త్రునివలె గౌరవించుచున్నది. ఇచ్చట మీరు మమ్మాదరించుటచే మేము ధన్యులమైతిమి. తమకు మా చరిత మనవిచేసితిమి. తరువాత తమ దయ.

Hey King! Under your able ruling our country is flourishing and has high regards for you. It loves you like a beloved child. We are blessed with your reception. We narrated our story to you and now it is left to your discretion.

मन्दाक्रान्ता

१३. श्रुत्वा वाचो नृपतिरमुयोर्भावगूढा मनोज्ञा
यूनोर्बुद्धिं भुवनविदितां विस्मितस्सन्परीक्ष्य ।
देवत्रामू इति सगणयन्सैन्यपत्यं प्रदातुं
मेनेऽमूभ्यामनघचरिता माननीया भवन्ति ॥

व्या :- श्रुत्वेति :- स नृपतिः स सार्वभौमः अमुयोः एतयोः कुमारयोः, भावगूढाः अभिप्रायगर्भिताः, मनोज्ञाः मनोहराः, वाचः वचनानि, श्रुत्वा आकर्ण्य, विस्मितस्सन् आश्चर्यपरवशस्सन्, भुवनविदितां लोकप्रसिद्धां, यूनोस्तरुणयोः तयोः कुमारयोः, बुद्धिं मतिं, परीक्ष्य परिशील्य, अमू एतौ कुमारौ, देवत्रा देवपुत्रौ, इति

In Public domain. Digitization Muthulakshmi Research Academy

गणयन् भावयन्, अमूभ्यां ताभ्यां, सैन्यपत्यं सेनाधिपतित्वं, प्रदातुं, मेने अमन्यत, अनघचरिताः निर्मलचरित्राः, माननीयाः मानार्हाः भवन्ति अर्थान्तरन्यासः।

स सार्वभौमः तयोः कुमारयोः साभिप्रायाणि मनोहराणि वचनान्याकर्ण्य, विस्मयमवाप्य, लोकविख्यातं तन्मतिविशेषं परिशील्य, एतौ देवताकुमाराविति निश्चित्य, तयोस्सेनानायकत्वं दातुं निश्चिकाय, तथाहि। उत्तमचरिताः पुरुषाः यत्र कुत्रापि सर्वैरपि मान्यन्ते।

मन्दाक्रान्तावृत्तलक्षणम्

''मन्दाक्रान्ता जलधिषडगैर्मोभनौ तौ गुरू च''

म-भ-न-त-त-ग-गाः गणाः, चतुर्भिः षड्भिः सप्तभिश्च यतिः।

తా॥ ఈ తారక రాజకుమారులిరువురు భావగర్భితముగ పలుక, నా చక్కని మాటలను విని, యా సార్వభౌముడు ఆశ్చర్యపడి, జగత్ప్రసిద్ధమైన వారి బుద్ధి కౌశలమును పరీక్షించి, వీరిరువురును దేవకుమారులు గాని సామాన్యులుకారని నిశ్చయించుకొని, వారిని తమ సైన్యమున కధిపతులను గావింపదలచెను. అది ఉచితమేకదా! ఉత్తమ చరితులు సత్ప్రవర్తనులునగు మానవశ్రేష్ఠుల నందరును ఎచ్చటనయినను గౌరవింతురుగదా! అందుచే సార్వభౌముడు గూడ వారిని సేనాధిపతులను గావింప సంకల్పించెను.

The duo's intelligible and profound talk took the monarch by surprise and he realized that they are not common men and in fact they are superhuman. He rightly decided to appoint them as army chiefs. It's no surprise that men of decorum and great qualities are respected everywhere.

उपस्थिता

१४. आत्मन्यधिकाविति मन्यमानस्ताभ्यां प्रसितोऽनघचक्रवर्ती ।
शश्वन्निपुणस्सभवंस्तयोस्ते मित्रे सदसीत्थमुवाच साधुः ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- आत्मनीति :- साधुः सज्जनः, सः, अनघचक्रवर्ती पुण्यशीलः सार्वभौमः, आत्मनि स्वमनसि, अधिकौ इति एतौ कुमारौ सर्वश्रेष्ठाविति, मन्यमानः सङ्कल्पमानः, ताभ्यां कुमाराभ्यां, प्रसितः आसक्तः, ''तत्परे प्रसितासक्ता'' वित्यमरः। शश्वन्निपुणः सन्ततशुभेच्छुः भवन् सन्, ते मित्रे तौ सखायौ, सदसि सभायाम्, इत्थम् एवम्, उवाच अवोचत्।

सज्जनस्स सार्वभौमः, कुमारावेतौ सर्वश्रेष्ठाविति मन्यमानः, तयोः शाश्वत सुखं चिकीर्षुः, सभायां तावुद्दिश्यैवमवोचत्।

उपस्थितावृत्तलक्षणम्

''त्जौ जो गुरुणेयमुपस्थिता।''
त-ज-ज-गाः गणाः पादान्ते यतिः।
अत्र गुरुरधिको दृश्यते।

తా॥ సజ్జనుడు పుణ్యాత్ముడునగు నా సార్వభౌముడు ఆ ఇరువురను సర్వోత్తములుగా భావించి, వారికి శాశ్వతోపకార మాచరింపదలంచి, సభలో వారినుద్దేశించి ఇట్లనెను.

The monarch who is virtuous and solicitous having decided to benefit them in a long run, started addressing them in the court thus-

गीतिः

१५. सुलभौ देवाविव मे सम्प्राप्तौ सर्वथेह मयि साधू ।
महतां विदेशगमनं भवति नितान्तं परोपकाराय ।।

व्या :- सुलभाविति :- युवां भवन्तौ, इह अत्र, सर्वथा सर्वप्रकारैः, मयि मद्विषये, साधू योग्यौ, मे मम, देवाविव सुराविव, सुलभौ सुखलभ्यौ, सम्प्राप्तौ लब्धौ, महतां महात्मनां, विदेशगमनं परदेशप्रयाणं, नितान्तम् अत्यन्तं, परोपकाराय परेषामुपकारकरणायैव भवति।

In Public domain. Digitization Muthulakshmi Research Academy

यथा देवकुमारौ तथा युवां मम सुखलब्धावास्ताम्, सर्वात्मना युवयोरादरः मय्यभूत्, तद्युक्तमेव, महात्मानः परदेशान् गत्वा तत्रापि इतरेषामुपकुर्वन्त्येव, अर्थान्तरन्यासः।

- गीतिलक्षणम् -

''आर्यार्धसमा गीतिः'' पादे यतिः।

తా॥ నాయందన్ని విధముల ఆదరాభిమానములుగల మీరు దేవతా కుమారులవలె నాకు సులభముగ లభించితిరి. మహాత్ముల విదేశగమన మేనాడును వ్యర్థముకాదు. దానివలన పరులకుపకారమే కలుగును.

"It is a blessing to have you two here who are superhuman and who have regard and concern for me. A foreign tour by great men never will be futile. It's surely for the welfare of one and all.

- मत्ता -

१६. सञ्जातौ मे महति भवादृग्वीरौ धीरावखिलगुणाढ्यौ ।
मच्चित्तं गर्वति मम सेव्यौ प्राप्तावाप्ताविवितिढ्यौ जनवन्द्यौ ॥

व्या :- सञ्जाताविति :- मे मम, महति राज्ये, ''महद्राज्यं चे''त्यमरः धीरौ पण्डितौ, अथवा, धैर्यवन्तौ, अखिलगुणाढ्यौ, सकलगुणपरिपूर्णौ, भवादृग्वीरौ त्वादृशवीरकुमारौ, सञ्जातौ, उत्पन्नौ, जनवन्द्यौ लोकपूज्यौ, युवां, मे मम, सेव्यौ सेवार्हौ, आप्तौ वयस्यौ, प्राप्तौ लब्धौ, इति, मच्चित्तं मम मनः, गर्वति गर्वयुक्तं भवति। आनन्दतीति भावः। अहमेवोत्कृष्ट इति बुद्धिं जनयतीति यावत्।

भवादृशौ वीरवरौ सुधियौ सकलगुणसम्पूर्णौ मद्राज्ये जाताविति, भवन्तौ मत्सकाशमागत्य, मामादृत्य, मत्सखौ जाताविति च मे मनः परमानन्दमनुभवति।

- मत्तावृत्तलक्षणम् -

''मत्ता ज्ञेया मभसगयुक्ता''

म-भ-स-गाः गणाः। चतुर्भिष्षड्भिश्च यतिः।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ సజ్జనులు పండితులు లోకైకవీరులునగు మీబోంట్లు మా రాజ్యమున జన్మించిరనియు, మా దేశమునకు వచ్చి మాయందాదరముతో మాకు మిత్రులయిర నియును మా మనస్సు మిక్కిలి గర్వించుచున్నది. మేమెంతయో ఆనందించుచుంటిమి.

Your birth in this kingdom and your visiting us here is a matter of pride and happiness for us. You two are great men of virtues and scholarliness and unrivalled valour.

- भुजङ्गप्रयातम् -

१७. मुदाऽद्य प्रभृत्यस्म्यहं युष्मदीयो युवामर्हथश्चक्रवर्तित्वमाप्तुम् ।
भवन्तौ ममाऽतीव मित्रे भवेतामताप्सीदमू इत्यसौ सार्वभौमः ॥

व्या :- मुदेति :- अद्य प्रभृति इत आरभ्य, अहं, मुदा प्रीत्या, युष्मदीयः भवदीयः अस्मि भवामि, युवां भवन्तौ, चक्रवर्तित्वं सार्वभौमत्वम्, आप्तुं लब्धुम्, अर्हथः योग्यौ स्थः, भवन्तौ युवां मम मे, अतीव अत्यन्तं, मित्रे वयस्यौ, भवेतां स्याताम्, इति एवमुक्त्वा, असौ सार्वभौमः। स चक्रवर्ती, अमू द्विजराजकुमारौ, अताप्सीत् तर्पयामास।

अद्य प्रभृत्यहं भवदीयोऽभूवम्, युवां चक्रवर्तिपदमपि लब्धुमर्हाविति मे मनीषा, इतः प्रभृति युवां मत्सखावभूतामित्युक्त्वा स सार्वभौमः तौ द्विजराजकुमारौ सन्तुष्टावकार्षीत्।

- भुजङ्गप्रयातवृत्तलक्षणन्तूक्तमेव -

తా॥ "నేటి నుండి నేను మీ వాడను. మీరు చక్రవర్తులుగా సర్వమహీ మండలమును పాలింపనర్హులు. నేటినుండి మీరు నా మిత్రులు" అని పలికి ఆ సార్వభౌముడు వారి నానందపరచెను.

From this day I am one with you. You two are competent enough to be world rulers. You are my friends from now on, thus spoke the monarch, to their happiness.

In Public domain. Digitization Muthulakshmi Research Academy

- स्रग्धरा -

१८. ताभ्यां कारिष्यमाणं स्वविषयसुभगम्भावुकं कर्म सभ्य
स्तोमोऽगच्छद्दिदृक्षुर्निजसदनमिलापालकस्यापवादात् ।
प्रासादं तौ वयस्यौ पृथुमधिवसतः स्मार्चितौ जागरूकौ
स्वाधीनं स्यान्नराणामखिलमपि जगद्भाग्यसंयोजितानाम् ॥

व्या :- ताभ्यामिति :- ताभ्यां द्विजनृपपुत्राभ्यां कारिष्यमाणम् आचरिष्यमाणं, स्वविषयस्य स्वदेशस्य सुभगम्भावुकं भाग्यप्रदायकं भव्यं, कर्म कृतिं "विषयस्स्यादिन्द्रियार्थे देशे जनपदेऽपि च" इति विश्वप्रकाशः, भावुकं भवुकं भव्यमित्यमरः, दिदृक्षुः द्रष्टुमिच्छुस्सन्, सभ्यस्तोमः सामाजिकसमूहः, इलापालकस्य सार्वभौमस्य, अपवादात् आज्ञायाः, "अपवादस्तु निर्देशो निदेशश्शासनं च सः शिष्टिश्चाज्ञा च" इत्यमरः। निजसदनं स्वभवनम्, अगच्छत् जगाम, तौ वयस्यौ, सखायौ द्विजनरवरनुतौ, अर्चितौ पूजितौ, जागरूकौ अप्रमत्तौ सन्तौ, पृथुं विशालं, प्रासादं सौधम्, अधिवसतस्स्म अध्यतिष्ठताम्, भाग्यसंयोजितानां भाग्यवतां, नराणां मानवानाम्, अखिलमपि जगत् सर्वोऽपि लोकः, स्वाधीनं स्यात् वश्यं भवेत्।

- अर्थान्तरन्यासालङ्कारः, वृत्तलक्षणन्तूक्तमेव -

తా॥ ఆ సభయందున్న సామాజికులందరును, ఈ వీరవరులిరువురు కూడి, తమ దేశమున కెట్టి మేలు చేయగలరో చూచెదమను కోరికతో, రాజాజ్ఞను బడిసి తమతమ నివాసమందిరములకేగిరి. ఆ తారకరాజు పుత్రులిరువురును సార్వభౌమునిచే గౌరవింపబడి, అప్రమత్తులై, విశాలమైన రాజభవనమున నివసించిరి. భాగ్యవంతులైన వారెచ్చటికి వెళ్ళినను, ఆయా చోటనున్న వారందరును ఆ భాగ్యవంతులకు అనుకూలముగనే ప్రవర్తింతురుగదా! "క్వభోగమాప్నోతి న భోగ భాగ్జనః" అని శ్రీహర్షుని సూక్తి.

The commoners in the court took the monarch's leave, went back to their homes with a strong desire to see what kind of positive changes they could see with these two new entrants. Having felicitated, the Brahmin boy and the prince

In Public domain. Digitization Muthulakshmi Research Academy

were put up in a palace where they stayed with great alert. It is true that fortunate people are received well wherever they go.

१९. कुमारिकाः प्रियौ कुलाङ्गनास्सहोदरौ सुहृद्वरौ युवान इत्यतीव पुत्रकौ जरज्जनाः।
तदाह्वयन्तावुभावशेषलोकसम्मतौ द्विषन्तिके महीतले नितान्तसद्गुणान्वितान्॥

व्या :- कुमारिका इति :- अशेषलोकस्य सर्वजनस्य, सम्मतौ प्रियौ, तावुभौ तौ कुमारौ, कुमारिकाः बालिकाः प्रियौ, इति सखायाविति, कुलाङ्गनाः कुलकान्ताः, सहोदरौ इति सोदराविति, युवानः तरुणजनाः सुहृदाविति मित्रश्रेष्ठाविति, जरज्जनाः वृद्धाः, पुत्त्रकाविति कुमाराविति च, अतीव अत्यन्तं, तदा, आह्वायन्त आह्वानं चक्रुः, नितान्तम् अत्यन्तं, सद्गुणान्वितान् उत्तमगुणोपेतान् जनान्, के द्विषन्ति द्वेषबुद्ध्या के पश्यन्ति? न कोऽपीत्यर्थः, अलङ्कार अर्थान्तरन्यासः उल्लेखालङ्कारश्च 'तयोस्सङ्करः'।

तत्र नगरे तौ विप्रराजदारकौ दृष्ट्वा मित्रबुद्ध्या बालिकाः सखायावित्याह्वयन्ति कुलकान्ताः सोदरबुद्ध्या भ्रातरावित्याह्वयन्ति। युवजनाः सुहृदावित्याह्वयन्ति, वृद्धजनास्तु, कुमारबुद्ध्या पुत्त्रावित्याह्वयन्ति, तद्युक्तमेव, उत्तमगुणोपेता मानवाः सर्वत्रापि सर्वैरपि सम्भाव्यन्ते, न कोऽपि तानन्यबुद्ध्या पश्यति।

"गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः"
इति भवभूतिवचनमत्र स्मर्तव्यम्।

- पञ्चचामरवृत्तलक्षणम् -

जरौ जरौ जगौ पञ्चचामरम्।
ज-र-ज-र-ज-गाः गणाः चतुर्षु चतुर्षु यतिः।

తా॥ ఆ కుమారద్వయమునుగాంచి, కన్యకలు మిత్రులారాయనియు, కులకాన్తలు సోదరులారాయనియు, యువకులు సుహృదులారాయనియు, వృద్ధులు కుమారులారా యనియు పిలుచుచుండిరి. సద్గుణోపేతులనందరును ప్రేమింతురు, గౌరవింతురు. వారిని ద్వేషించువారెవ్వరునుండరు.

In Public domain. Digitization Muthulakshmi Research Academy

The two were addressed and treated as dear friends by unmarried girls, as brothers by married women, as benevolent ones by young men, as dear sons by old ones. It is natural that men of great virtue are respected by all. Nowhere virtuous people are hated.

२०. मासोऽयासीत्तयोरत्रेव क्षणो राजकीयो द्योगैस्सर्वप्रजानां वश्यक्रियाकल्पनाभिः।
श्रुत्वा राजानुजो दुर्हृद्भिर्निबद्धो हठात्ता वित्यापद्बान्धवावीदृक्सार्वभौमं स्म वक्तः॥

व्या :- मास इति :- अत्र अस्मिन्नगरे, राजकीयाः राजसम्बन्धिनः ये उद्योगाः प्रयत्नविशेषाः तैः, सर्वप्रजानां तत्रत्यानां सर्वेषां जनानां, वश्यक्रियाकल्पनाभिः वशीकरणतन्त्ररचनाभिः, तयोः वीरयोः मासः कालः एको मासः, क्षण इव क्षणकाल इव, अयासीत् अगात्, राजानुजः सार्वभौमसोदरः, हठात् प्रसभं, दुर्हृद्भिश्शतृभिः, निबद्धः आक्रान्तः, इति इत्थं वार्ता, श्रुत्वा आकर्ण्य, आपद्बान्धवौ आपदि सहायकौ तौ वीरवरौ, सार्वभौमं चक्रवर्तिनम् ईदृक् ईदृशं, वक्तस्म अवदताम्।

राजकार्यनिर्वहणेन, जनवशीकरणकार्यकल्पनया च तयोर्द्विजराजकुमारयोः तस्मिन्नगरे मास एकः एकक्षण इवागात्, अत्रान्तरे, सार्वभौमभ्राता शतृनिवहेन निर्बन्धितः इति वार्ता प्रचलिताऽसीत्, तां श्रुत्वा आपद्बन्धवावेतौ कुमारौ राजानमुपसृत्य, एवमवोचताम्।

- चन्द्रलेखावृत्तलक्षणम् -

''म्रौ म्यौ यान्तौ भवेतां सप्ताष्टभिश्चन्द्रलेखा''

म-र-म-य-याः गणाः, सप्तभिरष्टभिश्च यतिः।

తా॥ రాజకీయ ప్రయత్నములతోడను, జనవశీకరణ తంత్రములతోడను, వారిరువురకు నా నగరమున ఒక మాసము ఒక క్షణమువలె దాటిపోయెను. అంతలో చక్రవర్తి సోదరుడు శతృగృహీతుడయ్యెనను వార్త హఠాత్తుగ వ్యాపించెను. దానిని విని యాపద్బాంధవులైన ఆ కుమారవరులిరువురును సార్వభౌముని సమక్షమునకేగి, ఈ తీరున పలికిరి.

In Public domain. Digitization Muthulakshmi Research Academy

The two were actively engaged in politics, and were good at mesmerizing people around. And time ticked away fast. Suddenly there was news that the brother of the monarch was imprisoned by a rival. The two friends, who were ever ready to save someone in trouble, appeared before the monarch and said:

- हरिणप्लुतम् -

२१. आश्चर्यं जगतीपते तव दुर्हृदां किमुपेषणं
त्वत्केऽत्रप्रिययुग्म ईदृगरिन्दमे सति जीवति ।
मा शोचीरचिरेण तेऽञ्चितसोदरं जितशात्रवं
द्रष्टासि प्रमदेन नौ रिपुमर्दनेऽद्य नियोजय ।।

व्या :- आश्चर्यमिति :- जगतीपते हे सार्वभौम ! अत्र युष्मन्नगरे, ईदृगरिन्दमे ईदृशः ये शत्रवः तत्संहरणदक्षे, त्वत्के त्वदीये, प्रिययुग्मे मित्रद्वये, जीवति सति उच्छ्वसति तव भवतः, दुर्हृदां शत्रूणां, पेषणं मर्दनं, किमु आश्चर्यं भवति किम्। न भवत्येव मा शोचीः विषादं मा कुरु, अचिरेण शीघ्रमेव, जितशात्रवं निर्जितशत्रुं, ते भवतः, अञ्चितसोदरं पूज्यभ्रातरं, प्रमदेन आनन्देन द्रष्टासि द्रक्ष्यसि अद्य इदानीं, रिपुमर्दने शत्रुसंहरणकार्ये, नौ आवां, नियोजय नियुङ्क्ष्व, आज्ञापयेत्यर्थः।

हे सार्वभौम ! किमर्थं चिन्तयसि, मा शोचीः, शत्रुसंहरणदक्षावावां भवतः सखायौ स्वः, आवयोर्जीवतोस्सतोः भवच्छत्रुसंहरणमाश्चर्यं किमु? युद्धं कर्तुमावयोरनुज्ञां देहि, इदानीमेव त्वद्भ्रातरं शत्रुनिर्मुक्तं द्रक्ष्यसि, इति ताववोचताम्।

తా।। ఓ రాజా! శత్రుసంహరణ దక్షులమైన మేము నీ మిత్రులమై బ్రతికియుండగా నీకీ విచారమేల? దుఃఖింపకుము. శత్రువులను అంతమొందించుట ఎంత పని? మమ్మిరువురను యుద్ధమునకై నియమింపుము. శత్రువును అంతమొందించి నీ సోదరుని నీకు జూపెదము అని వారిరువురును పలికిరి.

"Oh King! Why do you lament on this? The two of us are here with you who can conquer the enemy effortlessly.

In Public domain. Digitization Muthulakshmi Research Academy

Send us to slay the enemy and get back your brother safely", said the two.

- चन्द्रलेखा -

२२. शिष्टिं भूपस्य लब्ध्वा भूदेवताक्षत्त्रवीरा वाचार्याणां स्मरन्तौ सञ्चित्य सैन्यं प्रशस्तम्।
पारापारं तरन्तौ द्राग्धूमनौकाधिवासा त्तावाराच्छत्रुदुर्गाद्यातस्स्म धीरौ निशीथे ।।

व्या :- शिष्टिमिति :- तौ भूदेवताक्षत्त्रवीरौ एतौ वीरवरौ भूसुरक्षत्त्रियकुमारौ, भूपस्य राज्ञः, शिष्टिं शासनं, "शिष्टिश्चाज्ञा" चेत्यमरः, आचार्याणां स्मरन्तौ गुरून् स्मरन्तौ, "षष्ठी शेषे" इति सूत्रेण षष्ठी प्रशस्तं श्रेष्ठं, सैन्यं सेनां, सञ्चित्य समावेश्य, धूमनौकाधिवासात् धूमनौकाश्रयस्थानात्, पारापारं समुद्रं, तरन्तौ, "पारं अपारम् अस्य पारापारः, इति व्युत्पत्तिः "सतमास्सतमा लतया पारापाराय यस्स दावो दाव" इति हरिप्रबोधे यमकस्थले प्रयोगः, निशीथे अर्धरात्रौ, धीरौ धैर्यवन्तौ सन्तौ, शत्रुदुर्गात् आरात् शत्रुदुर्गसमीपम्,. "आराद्दूरसमीपयो" रित्यमरः। "अन्यारा"दित्यादिना पञ्चमी, यातस्स्म अगच्छताम्।

सार्वभौमाज्ञां सम्पाद्य, स्वगुरून् संस्मृत्य, सर्वसमर्थं सैन्यं समानीय, शीघ्रमेव धूमनौकाश्रयस्थानात् समुद्रं निस्तीर्य, निशीथसमये, धीरौ तौ तारकराजकुमारौ शत्रुदुर्गसमीपमगच्छताम्।

- चन्द्रलेखावृत्तलक्षणन्तूक्तमेव -

తా॥ ఆ వీరాగ్రేసరులిద్దరును, సార్వభౌముని శాసనమునుగైకొని, తమ గురువులను స్మరించుకొని, తగిన సైన్యమును సమకూర్చుకొని, త్వరగా నౌకాశ్రయమునుండి సముద్రమును దాటి, మంచి అర్థరాత్రి సమయమున శత్రుదుర్గ సమీపమును చేరుకొనిరి.

On his approval, the two great warriors, called to their mind their gurus for their blessings and set off on the mission. They were accompanied by a part of the army and reached the destination by sea.

In Public domain. Digitization Muthulakshmi Research Academy

- शिखरिणी -

२३. पुरः पश्चाच्छत्रुर्नृपतिमुदधिश्लिष्टसरिति न्यरौत्सीत्तं पार्श्वे समचरदुदासीनजनता।
प्रतीच्यां प्राच्यां द्विट्पटलमथनं कर्तुमनसौ द्विधा कृत्वा सैन्यं त्वरितमयतेतां द्विजवरौ॥

व्या :- पुर इति :- शत्रुः रिपुः, नृपतिं सार्वभौमसोदरम्, उदधिना समुद्रेण श्लिष्टा सङ्गता या सरित् नदी तस्यां, पुरः अग्रभागे, पश्चात् पृष्टभागे च, न्यरौत्सीत् निर्बबन्ध, तं राजसोदरं, पार्श्वे, उदासीना तटस्थभावोपेता या जनता जनसमूहः, जनानां समूहः जनता, ''ग्रामता जनता धूम्यापाश्यागल्या पृथक्पृथक्'' इत्यमरः, समचरत् सञ्चचार, द्विजवरौ तौ द्विजराजकुमारौ, द्विषां रिपूणां पटलं समूहः तस्य मथनं नाशं, कर्तुमनसौ चिकीर्षू, प्रतीच्यां पश्चिमदिशि, प्राच्यां प्राग्दिशि, सैन्यं सेनां, द्विधा कृत्वा द्वेधा विभज्य, त्वरितं शीघ्रम् अयतेतां युद्धयत्नमकुरुताम्।

सार्वभौमानुजः समुद्रसन्निहितनदीमध्ये, शत्रुणा निर्बन्धितोऽभूत्, तस्य निकटे तटस्थः जनसमूह अतिष्ठत्, इति ज्ञात्वा तौ कुमारौ प्राक्प्रतीचीदिशयोः स्वसैन्यं द्विधा कृत्वा नियुज्य शत्रुसैन्यं नाशयितुमारभेताम्।

- शिखरिणीवृत्तलक्षणम् -

''रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी''
य-म-न-स-भ-ल-गाः गणाः, षट्सु एकादशसु च यतिः।

తా॥ "సముద్రముతో కలియు నదియందు, శతృవు రాజసోదరుని నిర్బంధించెను. వానికడనున్న వారందరును తటస్థులే"యని గ్రహించి, ఆ తారకరాజ కుమారులు తమ సైన్యమును రెండు భాగములు గావించి, తూర్పుపడమరలందు నిలిపి, శతృసైన్యమును నాశనముగావింప యత్నించిరి.

Having known that the king's brother had been imprisoned on the river that merged into the sea, and the enemy's army was stationed there, they divided their armed forces into two and besieged the camp from the east and the west directions.

In Public domain. Digitization Muthulakshmi Research Academy

- श्येनिका -

२४. अग्रतो रिपून् स्वमित्रसैनिका मर्दयन्त इत्यधीशसोदरः ।
द्वीपमध्यदुर्गरक्षितो विदन्नन्वगाज्जघान शत्रुमण्डलम् ॥

व्या :- अग्रत इति :- स्वमित्रसैनिकाः आत्मीयमित्रयोधाः, अग्रतः पुरोभागे, रिपून् शत्रून्, मर्दयन्ते संहरन्ति, इति इत्थं, द्वीपमध्ये यत् दुर्गं तत्र रक्षितः, अधीशसोदरः सार्वभौमभ्राता, विदन् जानन्, अन्वगात् अनुससार, शत्रुमण्डलं शात्रवसङ्घं, जघान अहनत् ।

द्वीपमध्यदुर्गस्थले रक्षितः सार्वभौमसोदरः स्वमित्रयोधाः शत्रून्नाशयन्तीति वार्तां श्रुत्वा, स्वयमपिताननुससार, स्वयं शत्रूनहनत्।

- श्येनिकावृत्तलक्षणम् -

''श्येनिकारजौ रलौ गुरुर्यदा''
र-ज-र-ल-गाः गणाः, पादे यतिः

తా॥ ద్వీపమధ్య దుర్గములో రక్షింపబడుచున్న ఆ రాజసోదరుడు, తన మిత్రసైనికులు శత్రువులను ఎదుర్కొనిరని విని, తానుగూడ వారి ననుసరించి శత్రుసంహారము గావించెను.

The monarch's brother was held captive on an island. Once he got to know that there was army that had arrived to save him, he too joined them to annihilate the enemy.

- सुभद्रकम् -

२५. चोर इव प्लवोऽम्बुपिहितस्तरीरकृतभस्मसाद्द्रुतगतिः
सीसकगोल इन्दुसदृशः स्फुटन् जनशतान्यनीनशदुरुः ।
अयसधूमनौ समुदयश्शतघ्न्युपगमैर्बभूव दलितः
कृत्रिमविद्युदद्भुतकराग्निनाऽदहदमोघयोधनिवहम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- चोर इति :- अम्बुपिहितः जलान्तर्गतः, प्लवः, कोलः, द्रुतगतिः त्वरितगमनस्सन्, चोर इव स्तेन इव, तरीः तरणीः, भस्मसात् अकृत भस्मीभूताः अकार्षीत्, इन्दुसदृशः चन्द्रसङ्काशः, उरुः महान्, सीसगोलकः सीसकेन निर्मितः गोलाकारः आयुधविशेषः, स्फुटन् भिन्नस्सन्, जनशतानि बहून् जनान्, शतशब्दोऽत्रानेक वाचकः, अनीनशत् नाशयामास, शतानि घ्नन्तीति शतघ्न्यः, तासां यन्त्रविशेषाणाम्, उपगमैः सञ्चारैः, आयसः लोहनिर्मितः, धूमनौकानां समुदयः समूहः, दलितः दीर्णः, अभूत् आसीत्, कृत्रिमा कल्पिता, या विद्युत् विद्युच्छक्तिः, अद्भुतकरेण आश्चर्यावहेन अग्निना वह्निना, अमोघाः दृढाः ये योधाः युद्धवीराः, तेषां निवहं समूहम्, अदहत् ददाह।

जलमध्येऽदृश्यतया स्थितः कश्चन जलान्तर्गामी प्लवः चोर इव त्वरितगमनस्सन् सर्वास्तरणीर्भस्मसाच्चकार, वलयाकारः धवलः सीसनिर्मितः गोलः भिन्नस्सन् अनेकान्सैनिकानदहत्, शतघ्न्यः तीरस्थितधूमनौकासमुदयम् अदारयन्, कृत्रिमविद्युच्छक्तिः स्वोद्भूताग्निज्वालाभिः योधनिवहानदहत् ।

- सुभद्रकवृत्तलक्षणम् -

''भरौ नरौ नरौ नगौ सुभद्रकम्''

తా॥ జలాంతర్గామియగు పడవ నీటిలో కనబడకయుండి దొంగవలె తొందరగా వచ్చిపడి, శత్రునావలను బూడిదగావించెను. చంద్రబింబమువలె తెల్లగ గుండ్రముగ నున్న సీసపుగుండు (బాంబు) బ్రద్దలై వందలకొలది జనులను చంపెను. శతఘ్నులు (ఫిరంగులు) ప్రేలి విజృంభించి సముద్రతీరమందలి ధూమనౌకలను బ్రద్దలు గావించెను. కృత్రిమనిర్మిత విద్యుచ్ఛక్తి తన వేడిమిచే యుద్ధభటులను కాల్చెను.

A submarine stealthily approached the island and quickly destroyed the entire army's ships. A bomb round and white, made of pewter, though resembled the peaceful moon in appearance, was powerful and disastrous that killed hundreds of opponent soldiers. Cannons blew up the steam boats on the shore.

In Public domain. Digitization Muthulakshmi Research Academy

- स्रग्विणी -

२६. मज्ञनोन्मज्ञनैर्लोहनौका पयोवायसीवाऽचलद्वारिमायाविनी ।
दह्यमानोडुपाग्निच्छटालीलया सा तमिस्रा विभाति स्म मध्याह्नभा ।।

व्या :- मज्ञनेति :- लोहेन अयसा निर्मिता नौका, प्लवः, मज्ञनैः जलान्तर्गमनैः, उन्मज्ञनैः बहिः निष्क्रमणैः, मायाविनी मायावती, पयोवायसी इव जलकाङ्गनेव, वारिजले, अचलत् सञ्चचाल, दह्यमानानाम् अग्निपरीतानाम्, उडुपानां प्लवानां, या अग्निच्छटाः वह्निकीलाः, तासां लीलया कान्त्या सा तमिस्रा तामसी रात्रिः, अह्नः मध्यः मध्याह्नः तस्य भा इव कान्तिरिव कान्तिः यस्सास्सा, मध्यन्दिन कान्तिसमाना विभाति स्म बभौ।

तज्ञले मुहुर्निमग्ना मुहुरुन्मग्ना लोहनौका मायाविनी पयोवायसीव रराज। दह्यमानप्लवसञ्जातवह्निज्वालाकान्त्या तमो भूयिष्ठा रात्रिरपि तेजसा मध्याह्न इव रराज, उपमालङ्कारः।

- स्रग्विणी वृत्तलक्षणम् -

''रैश्चतुर्भिर्युता स्रग्विणी सम्मता''
र - र - र - राः गणाः पादे यतिः।

తా॥ సముద్రమందలి లోహనౌక నీటిలో మాటిమాటికి మునుగుచు దేలుచు, మాయలుచేయు నీటికాకివలె కదలుచుండెను. గట్టుమీద కాలుచున్న పడవల మంటలు రాత్రి చీకటిని రూపుమాపుటచే ఆ రాత్రి పట్టపగలువలె వెలుగుచుండెను.

The vessel that ducked into the water and surfaced time and again resembled a crow, a messenger of magic. The flames of the burning boats at the shore drove away the darkness and it was bright like day.

In Public domain. Digitization Muthulakshmi Research Academy

- आर्यागीतिः -

२७. आसन्नविंशयोजनविस्तीर्णनदीस्थशत्रुनौद्विसहस्त्रम् ।
सद्विड्जनसर्वस्वं भारतवीरकुमारप्रतापविध्वस्तम् ॥

व्या :- आसन्नेति :- विंशतेरासन्नानि आसन्नविंशानि, ''सङ्ख्ययाऽव्ययासन्न दूराधिकसख्याः संख्येये'' इति बहुव्रीहिः, ''बहुव्रीहौ सङ्ख्येये डजबहुगणात्'' इति डच् समासान्तः, ''ति विंशते''रिति तिशब्दस्य लोपः, ततो योजनशब्देन विशेषण समासः, एकोनविंशतियोजनानि, एकाधिकविंशतियोजनानि वेत्यर्थः, तैः, विस्तीर्णा विस्तृता, या, नदी सरित्, तस्यां स्थिताः शत्रूणां नावः नौकाः, तासां द्विसहस्त्रं सहस्त्रद्वयं, द्विड्जनाः शत्रवः, तेषां सर्वस्वं सर्वसम्पत्, तेन सह, सद्विड्जनसर्वस्वं, शत्रूणां सर्वस्वमित्यर्थः। भारतवीरकुमारयोः तारकराजकुमारयोः, प्रतापेन पराक्रमेण, विध्वस्तं सम्पूर्णतया विनष्टमासीत् ।

आसन्नविंशतियोजनपरिमितप्रदेशे नद्यां स्थिताः, द्विसहस्त्रसङ्ख्याकाः शतृनौकाः सर्वपदार्थैस्साकं भारतवीरकुमारप्रतापाग्निना भस्मसादभूवन्, शत्रुनौकाबलं सर्वं विध्वस्तं बभूव।

-आर्यागीतिलक्षणम् -

प्रथमपादे द्वादशमात्राः, द्वितीयपादे विंशतिमात्राः एवमार्यागीतिर्भवति, पादान्ते यतिः।

తా॥ పందొమ్మిది లేక ఇరువదియొక్క యోజనములలోనున్న నది అందలి రెండువేల నౌకలు వస్తుసామగ్రితో పాటు తారకరాజకుమారుల ప్రతాపాగ్నిలో దగ్ధమైనవి.

The river that spread out to close to twenty *yojanas* on which there were twenty thousand ships with merchandise burned down to ashes by the furious two.

In Public domain. Digitization Muthulakshmi Research Academy

- अनुष्टुप् -

२८. अभ्यमित्र्यौ सांयुगीनौ धीरौ भरतवर्षजौ ।
समूलघातं प्रत्यर्थिसेनं द्वीपस्थमाहताम् ॥

व्या :- अभ्यमित्र्याविति :- अभ्यमित्र्यौ शत्रूणामभिमुखं गच्छन्तौ, सांयुगीनौ युद्धविशारदौ, धीरौ धैर्ययुक्तौ, भरतवर्षजौ भारतभूमिसमुत्पन्नौ, तौ विप्रराजपुत्रौ, द्वीपस्थं द्वीपे वर्तमानं, प्रत्यर्थिसेनं शत्रुसैन्यं "विभाषासेनेत्यादिना सेनान्तस्य नपुंसकत्वम्, समूलं हत्वा समूलघातं, साकल्यमित्यर्थः, आहतां नाशयामासतुः।

धीरौ युद्धनिपुणौ शत्रूणामभिमुखं गन्तुं समर्थौ तौ द्विजराजकुमारौ, द्वीपे वर्तमानं सर्वं शत्रुसैन्यं निश्शेषं नाशयाञ्चक्रतुः।

తా॥ ఆ తారక రాజకుమారు లిరువురును నిర్భయముగ శత్రువుల నెదుర్కొను శక్తిగలవారు, యుద్ధమందు మంచి నేర్పరులు, ధైర్యవంతులు. అట్టి వారిరువురును, ఆ ద్వీపమందున్న శత్రుసైన్యమునంతను నిశ్శేషముగ నిర్మూలము గావించిరి.

The daring duo could attack an enemy valiantly, were great at war, and hence it took no time for them to wipe out the opponent army completely.

- शार्दूलविक्रीडितम् -

२९. उल्कावद्बहुतप्तसीसगुलिकाश्रेणी मुहुः पातिता
दोषाभूतमहश्शतघ्न्यतिसरद्धूमान्धकारान्वितम् ।
भेरीभाङ्कृतभर्त्सनैः प्रतिभटप्राणार्थमूर्जस्वलः
कालोऽचूचुरदारुराव रुधिरं पीत्वा शिवासंहतिः ॥

व्या :- उल्केति :- बहुतप्ताः अधिकतापयुताः याः सीसगुलिकाः, तासां श्रेणी पङ्क्तिः, उल्कावत् निर्गतज्वालेव, "उल्का स्यान्निर्गतज्वाला" इत्यमरः, ज्वालाविरहिताग्निरिवेत्यर्थः, मुहुः पुनः पुनः, पातिता विसृष्टा, अहः दिनं, शतघ्नीभ्यः अतिसरन् निसृष्टः यः धूमः, स एव अन्धकारः तमः तेन अन्वितं युक्तं

In Public domain. Digitization Muthulakshmi Research Academy

सत्, शतघ्नीधूमाच्छादितं सदित्यर्थः दोषाभूतं रात्रिरिवासीत्। ''अव्ययस्य च्वावीत्वं नेति वाच्यम्,'' इति निषेधात् त्वं न, ऊर्जस्वलः बलवान्, कालस्समयः, भेरीणां दुन्दुभ्यादिवाद्यविशेषाणां, भाङ्कृतभर्त्सनैः भीषणभाङ्कारध्वनिभिः, प्रतिभटानां शत्रूणां प्राणार्थं प्राणधनम् अचूचुरत् अचोरयत् अपजहारेत्यर्थः, शिवासंहतिः क्रोष्ट्रीसमूहः, रुधिरं शोणितं पीत्वा निपीय, आरुराव समन्ताद्रौतिस्म।

तप्तायः पिण्डनिभा सीसगोलकाः बहवो विसृष्टाः अग्निगोला इवापतन्, शतघ्नीसञ्जातेन धूमान्धकारेण दिनमपि रात्रिरिव अन्धकारबन्धुरमासीत्। अतिभीषणैर्भेरीदुन्दुभिनिनादैरेव महाकालः शत्रूणां प्राणधनान्यपाहरत् शिवासमूहः रुधिरं पीत्वा अधिकं दीर्घारावानकरोत्।

- शार्दूलविक्रीडितावृत्तलक्षणमुक्तम् -

తా॥ కాల్చిన ఉక్కు గుండ్లవలెనున్న సీసపు గుళికలు నిప్పుకణములవలె మాటి మాటికి విసరబడెను. బండి ఫిరంగులనుండి వచ్చు పొగ చీకటివలె కప్పుటచే పగలు రాత్రియయ్యెను. భీషణ భేరీ భాంకార ధ్వనిచే కాలము శత్రువుల ప్రాణధనము నపహరించెను. (అడ) నక్కలు రక్తమును గడుపారద్రావి అరచుచుండెను.

The balls of fire were lashed out at the enemies; the black fumes from the cannons gave the day the darkness of the night. The kettle drums and long trumpets prompted the time to snatch away the lives of enemies. The female foxes screamed loudly having drunk the blood full to their bellies.

- अनुष्टुप् -

३०. अतुलाहम्पूर्विका विभीषणाहमहमिका ।
आहोपुरुषिका साऽसीदहोरात्राहवक्रिया ॥

व्या :- अतुलेति :- सा प्रसिद्धा, अहश्च रात्रिश्च अहोरात्रः, तस्मिन्, आहवक्रिया युद्धव्यापारः, अहम्पूर्वमहम्पूर्वमित्यादिका क्रिया यस्यां सा, ''अहम्पूर्वमहम्पूर्वमित्यहम्पूर्विका क्रिया'' इत्यमरः। विभीषणा अतिभयङ्करा, अहमहमिका,

In Public domain. Digitization Muthulakshmi Research Academy

अहं समर्थः अहं समर्थः इति वचनं यस्यां सा, ''अहमहमिका तु सा स्यात्परस्परं यो भवत्यहङ्कारः।'' इत्यमरः, आहोपुरुषिका, आहो ! पुरुषोऽहं इति दर्पयुक्तस्य पुरुषस्य भावः यस्यां सा, च, ''आहोपुरुषिका दर्पाद्या स्यात्सम्भावनाऽत्मनी'' त्यमरः। आसीत् बभूव।

तत्र अहोरात्रे युद्धमभवत्, तस्मिन्युद्धे केचन भटाः, अहं पूर्वं युद्धं करिष्यामि अहमेवपूर्वं करिष्यामीत्यवदन्। अन्ये केचन अहं समर्थो योद्धुमहमेव समर्थ इत्यहङ्कारादवोचन्, अपरे केचन आहो ! अहमेव पुरुषः नान्य इति दर्पादब्रुवन्, एवं विधा अतुला अतिभीषणा च युद्धप्रवृत्तिरासीत् ।

తా॥ అచ్చట రేయింబవళ్ళు యుద్ధము జరిగెను. అందు, నేను ముందేగెదను నేను ముందేగెదననువారు కొందరు. నేనే సమర్థుడను నేనే సమర్థుడను అని అహంకారముతో పలుకువారు మరికొందరు. నేనే పురుషుడను నేనే పురుషుడనని దర్పముతో పలుకువారు ఇంకొక కొందరునై వీరభటులుండిరి. ఆ యుద్ధమతి భయంకరమైన సాటిలేనిదై యుండెను.

The war went on for days and nights. The soldiers were eager to take turns first and foremost, a few claimed that they were more efficient, and a few bragged out of arrogance that they were the real men. The war was violent and incomparable.

- शम्भुनटनम् -

३१. महारणभुवि तृटितपादयुगलैर्लुलितबाहुभिरपास्तनयनै
ररोद्यरिजनैरसकृदस्त्रपतितं गजहयं समततार्तनिनदम् ।
रथायुधमणीखचितभूषणपटैर्व्यपणयत्समरभूमिरभिला
व्यबीभिषत जन्तुपटलं पलरतं बहु भयङ्करकबन्धनटनम् ॥

व्या :- महारणेति :- महती विशाला, रणभूः युद्धभूमिः, तस्यां, तृटितं छिन्नं पादयुगलं पादद्वयं येषां तैः, लुलितौ लुठितौ बाहू भुजौ येषां तैः, अरिजनैः

In Public domain. Digitization Muthulakshmi Research Academy

शत्रुभिः, असकृत् वारं वारम्, अरोदि आक्रन्दितम्। अस्त्रपतितम् आयुधाहतं, गजाश्च हयाश्च गजहयं, सेनाङ्गत्वादेकवद्भावः, मातङ्गाश्वसमूह इत्यर्थः, आर्तनिनदम्, आर्तनादम्, असकृत् पुनः पुनः, समतत विस्तारयामास, अखिला सर्वा, समरभूमिः, युद्धभूमिः, रथैः, स्यन्दनैः, आयुधैः शस्त्रैः, मणीखचितभूषणैः, रत्नखचिताभरणैः पटैश्च वस्त्रैश्च व्यपणयत् व्याप्ता बभूव। बहुभयङ्करं बहुभीतिदं, यत् कबन्धनटनं शिरोहीनशरीरनृत्यं, पलरतं मांसासक्तं, जन्तुपटलं जम्बुकादिमृगसमूहं अबीभिषत अभीषयत्।

तस्मिन्समराङ्गणे युद्धभटाः छिन्नपादाः अपगतनयनाः विच्छिन्नभुजास्सन्तः रुदन्ति स्म, खड्गाद्यायुधैः कृत्तावयवाः गजा हयाश्च मुहुर्मुहुरार्तनादान्मुञ्चन्तः भूमौ शेरते स्म, सर्वमपि युद्धतलं पतितैरायुधैः, भ्रष्टैः रत्नाभरणैः, भग्नैः रथैः, स्रस्तैः वसनैश्च, संवृता बभूव। अरीणां शिरोहीनदेहाः (कबन्धाः) मांसशोणितलोलुपान् जम्बुकादिमृगान् त्रासयन्ति स्म।

- शम्बुनटनवृत्तलक्षणम् -

''जननभा जजनभा लगौ शम्भुनटनम्''

ज-न-न-भ-ज-ज-न-भ-ल-गाः गणाः षट्सु अष्टसु, षट्सु, षट्सु च यतिः।

తా॥ ఆ యుద్ధరంగమున బాదములు తెగి, కన్నులూడి, చేతులుపోయిన వీరభటులు దుఃఖించుచుండిరి. ఆయుధ ఘాతములచే నేలపైగూలిన ఏనుగులు గుఱ్ఱములును మాటిమాటికి ఆర్తనాదములను విడుచుచున్నవి. ఆ రణరంగమంత యును, విరిగిన రథములతో, పడిన ఆయుధములతో, చెదిరిన రత్నా భరణములతో, జారిన బట్టలతో కప్పబడియుండెను. మొండెములు గంతులువేయుచు, మాంసమును తినుచున్న క్రూరజంతువులను భయపెట్టుచుండెను.

On the war field, soldiers with amputated limbs and lost vision were crying their hearts out. The wounded horses and elephants bawled in pain. The whole place was scattered with broken chariots and weapons and garments that slipped off from the soliders' bodies. The beheaded bodies with the last trace of life in them walked scaring even the wild carnivores.

- क्रौञ्चपदा -

In Public domain. Digitization Muthulakshmi Research Academy

३२. व्याकुलयुद्धे परस्परमेव भीकररिपव उषसि मुहुरतुदन्
द्रागहतशेषा महाभयकम्पिताश्शरणमयुरधिकरणजयिनाम् ।
बाहुगणाहिव्रजं चरणोत्करोरुकमठपरिकरमसितशिरो
रुट्चयशैवालसञ्चयमद्भुतं रुधिरजलमभवदमितसरः॥

व्या :- व्याकुलेति :- व्याकुलं विहस्तं च तत् युद्धम् आयोधनं तस्मिन्, किङ्कर्तव्यताशून्ये समरे इत्यर्थः, "विहस्तव्याकुलौ समा" वित्यमरः। भीकररिपवः भयङ्करशत्रवः, उषसि प्रभातसमये, मुहुः पुनः पुनः, परस्परमेव अन्योन्यमेव, अतुदन् अपीडयन्। हतशेषाः हतावशिष्टा भटाः, महता भयेन अधिकभीत्या, कम्पिताः चलिताः, द्राक् शीघ्रमेव, अधिकरणजयिनां रणे अधिकं जयमाप्नुवतां वीराणां, शरणम्, अयुः प्रापुः बाहुगणाः भुजपङ्क्तय एव अहिव्रजाः सर्पगणाः यस्मिन् तत्, चरणोत्कराः पादसमूहा एव उरुकमठाः बृहत्कच्छपाः तेषां परिकरः यस्मिन् तत्, असिताः नीलाः, शिरोरुहां केशपाशानां, चयाः समूहा एव शैवालसञ्चयाः जलनीलीचयाः, यस्मिन् तत्, रुधिरं शोणितमेव, जलं यस्मिन् तत्, सत्, अमितसरः अपारतटाकः, अद्भुतम् आश्चर्यकरं यथातथा, अभवत् आसीत्, रूपकालङ्कारः।

प्रभातसमये आगते सति, तस्मिन्नायोधने, अतिभयङ्करा रिपवः, मुहुर्मुहुरन्योन्यमेव निजघ्नः। हतशेषा भटाः भयकम्पिताः विजयिनां वीराणां शरणमवापुः। तस्मिन् रणरङ्गे, अमितैर्भुजाभुजङ्गमैः, अपारैः पादकच्छपैः, अतिनीलैः केशशैवालैः, अतिरक्तैः शोणितजलैश्च परिपूर्णमाश्चर्यकरमपारं सरोवरमाविर्बभूव।

- क्रौञ्चपदावृत्तलक्षणम् -

"क्रौञ्चपदा भ्मौस्भौ नननान्गौ इषुशरवसुमुनिविरतिरिह भवेत् ।

भ-म-स-भ-न-न-न-न-गाः गणाः विरतिर्न दृश्यते पञ्चसु पञ्चसु अष्टसु सप्तसु यतिः।

తా॥ ప్రభాతమగుసరికి ఆ యుద్ధమున ఏమిచేయుటకు దోచక, ఆ శత్రువులు వారిలోవారే ఒకరినొకరు పొడుచుకొనిరి. చావగా మిగిలినవారు భయకంపితులై జయించినవారి శరణుజొచ్చిరి. ఆ యుద్ధరంగమంతయు ఒక పెద్ద చెఱువుగామారెను.

In Public domain. Digitization Muthulakshmi Research Academy

అందు రక్తమే జలము, తెగిన చేతులే పాములు, తెగిన పాదములే తాబేళ్ళు, నల్లని జుట్టే నాచుతీగలుగ నుండెను. ఆ సరోవరము చూచుటకు మిక్కిలి ఆశ్చర్యజనకముగ నుండెను.

By the sunrise time the addled enemies, started killing one another among themselves. The few survivors surrendered themselves to the winners. The battle field was like a lake of blood. The amputated hands looked like snakes and the feet like tortoises. The black hair looked like moss creepers. It was a dreadful lake.

३३. कृत्तपदोऽपि प्रतिभटमवधीद्योधवरः सपदि जहिजहीति
क्रुद्धमनंसीद्विजयिनमसुहृत्कश्चिदनूनयुधि नमनमेति ।
शत्रुमहार्षीद्द्रुतगतिचतुरः प्राप्तजयो झटिति हरहरेति
क्षिप्रमनावीद्विजयुगमतुलं सैनिकपङ्क्तिरथ नुहि नुहीति ॥

व्या :- कृत्तपद इति :- कश्चित् योधवरः युद्धभटः, कृत्तपदोऽपि निकृत्तपादयुगलोऽपि, सपदि सद्यः, जहि जहि इति वदन्, प्रतिभटं शत्रुम्, अवधीत् जघान, "क्रियासमभिहारे द्वे वाच्ये" इत्यनेन द्विरुक्तिः कश्चित् असुहृत् रिपुः, अनूनयुधि अधिकयुद्धे, क्रुद्धं कुपितं, विजयिनं प्राप्तविजयं, नम नम इति वदन्, अनंसीत् ननाम, द्रुतगतौ शीघ्रगमने, चतुरः निपुणः, प्राप्तजयः विजयी, कश्चन, झटिति शीघ्रं, हर हर इति वदन्, शत्रुं द्विषम्, अहार्षीत् जहार, अथ अनन्तरं, सैनिकपङ्क्तिः सेनानिवहः, अतुलम् असदृशं, द्विजयुगं ब्रह्मक्षत्त्रकुमारद्वयं, नुहि नुहि इति वदन्, क्षिप्रं शीघ्रम्, अनावीत् नुनाव।

निकृत्तपादोऽपि कश्चिद्योद्धा शत्रुं जहिजहीति वदन् जघान। अपरः कश्चित् कुपितं विजयिनमासाद्य नमनमेति वदन्ननाम, अन्यः कश्चन विजयी द्रुतगमनस्सन् गत्वा हर हर इति वदन् जहार। सर्वोऽपि सैनिकवर्गः कुमारद्वयमुपेत्य नुहि नुहीति वदन् स्तुतिमकार्षीत्।

In Public domain. Digitization Muthulakshmi Research Academy

- तन्वीवृत्तलक्षणम् -

''भूतमुनीनैर्यतिरिह भतनाःस्भौ भनयाश्च यदि भवति तन्वी''

भ-त-न-स-भ-भ-न याः गणाः। पञ्चसु सप्तसु द्वादशसु च यतिः।

తా॥ యుద్ధవీరుడొకడు, తన పాదములు తెగిపడినను, శత్రువునుజేరి, చంపుము చంపుము అని పలుకుచు చంపెను. మరియొక శత్రువీరుడు కుపితుడై జయమును గాంచియున్న వీరునిజూచి మ్రొక్కుము మ్రొక్కుము అనుచు మ్రొక్కెను.

ఇంకొక వీరుడు జయమునుగాంచి, త్వరిత గమనమున శత్రువునుజేరి, లాగుము లాగుము అనుచు లాగెను. సైనిక సమూహమంతయును, ఈ విప్రరాజకుమార ద్వయమును జూచి, పొగడుము పొగడుమని పలుకుచు పొగడెను.

One of the warriors who lost his feet crawled up to his enemy, asked for mercy death and contrarily he himself killed the opponent. Yet another enraged warrior killing his conscience said, 'let me salute', 'let me salute' and saluted. A warrior looking at the winners flattered them saying "laud them, laud them".

- शिखरणी -

३४. क्वचित्केशाकेशि व्यथितचिकुरो भिक्षुक इव
क्वचिन्मुष्टीमुष्टीव हतदशनोऽवित्तदशमी ।
क्वचिद्बाहाबाहि प्रशमितबलो वातकिसमः
क्वचिद्दण्डादण्डि द्विडसृगमितो रोचन इव ॥

व्या :- क्वचिदिति :- क्वचित् कुत्रचित्प्रदेशे व्यथितः व्यथापीडितः चिकुरः केशभारः यस्य सः द्विट् शत्रुः, भिक्षुक इव, केशाकेशि केशयुद्धं, अकरोदित्यध्याहारः, केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि, क्वचित् कुत्रचित् स्थले, हतदशनः अपगतदन्तः, द्विट् रिपुः, अवित्तदशमी इव धनहीनः अतिवृद्ध इव, मुष्टीमुष्टि मुष्टियुद्धम् अकरोत्, मुष्टिभिश्च मुष्टिभिश्च प्रहृत्य इदं युद्धं प्रवृत्तं मुष्टीमुष्टि,

In Public domain. Digitization Muthulakshmi Research Academy

क्वचित् कुत्रचिद्भागे, प्रपशमितबलः क्षीणसत्त्वः, द्विट् रिपुः, वातकिसमः वातरोगीव, ''वातरोगी तु वातकि'' रित्यमरः। बाहाबाहि बाहुयुद्धम् अकरोत्। बाहुभिश्च बाहुभिश्च प्रहृत्य इदं युद्धं प्रवृत्तं बाहाबाहि, क्वचित् कुत्रचित् देशे, असृगमितः रुधिराक्तः, द्विट् शत्रुः, रोचन इव कूटशाल्मलीवृक्ष इव, ''रोचनः कूटशाल्मली'' त्यमरः, दण्डादण्डि दण्डयुद्धम्, अकरोत्, दण्डैश्च, दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तं दण्डादण्डि। उपमालङ्कारः।

केशभारपीडिताः केचन रिपवः कुत्रचित् भिक्षुका इव केशयुद्धमकुर्वन्, क्वचिदपगतदन्ताश्शत्रवः अतिवृद्धा इव मुष्टियुद्धं चक्रुः, क्वचिद्बलहीनाः रिपवः वातरोगिण इव बाहुयुद्धमकुर्वन्, क्वचित् रक्तसिक्तदेहा अरयः शाल्मलीवृक्षा इव दण्डयुद्धमकार्षुः, शिखरणी वृत्तलक्षणन्तूक्तमेव।

తా॥ ఒకచోట ముష్టివారు జుట్టుపట్టుకొని పోరాడుచున్నట్లు కొందరు శత్రువులు కేశయుద్ధమును గావించుచుండిరి. వేరొకచోట దంతములూడిన మరికొందరు కదలలేని ముసలివారువలె ముష్టియుద్ధమును జేయుచుండిరి. ఇంకొకచోట బలహీనులైన శత్రువులు వాతరోగులవలె బాహుయుద్ధమును జేయుచుండిరి. మరియొకచోట మరికొందరు రక్తసిక్త శరీరులై బూరుగు చెట్లవలె కఱ్ఱలతో కొట్టుకొనుచుండిరి.

A few were fighting like beggars pulling each other's hair. A few toothless and immobile were engaged in fisticuffs. And a few more that turned weak were doing wrestling. Drenched in blood soaked clothes a few debilitated and frail like a kapok tree were on a stick fight.

- मत्ताक्रीडा -

३५. वेगोद्यद्धूमाऽनोऽभेद्यं समचलयदसमशरपटलं
यन्त्रं भूम्यां निक्षिप्तं प्रास्फुटदमितभटवरहृदयभयदम् ।
अश्वीयं पादातं शत्रुं स्म तमयति तमतुलितमदगजता
मेघद्वारा द्योधश्रेण्यक्षिपदसकृदखिलगतिशुचिगुलिकाः॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- वेगोद्यदिति :- अभेद्यं भेत्तुमशक्यं, वेगेन उद्यन् धूमः यस्मात्तत् वेगोद्यद्धूमं, तत् अनः शकटं, धूमशकटमित्यर्थः। ''क्लीबेऽनश्शकटोऽस्त्रिया''मित्यमरः। असमाः अतुलाः शिताः, तीक्ष्णाः, ये शराः नाराचाः, तेषां निकरं समूहं समचलयत् विससर्ज, भूम्यां धरण्यां, निक्षिप्तं निहितं, यन्त्रं यन्त्रविशेषः, अमिताः अनन्ताः, ये भटवराः योद्धारः, तेषां हृदयभयदं मनोभयदायकं सत्, प्रास्फुटत् स्फुटितमभूत्, अतुलिता असदृशा, मदगजता मत्तमातङ्गसङ्घः, गजानां समूहो गजतेत्यर्थः अश्वीयम् अश्वसहितं, पादातं पदातियुक्तं, तं शत्रुं रिपुं, तमयति स्म ममर्द, योधश्रेणी, युद्धभटनिवहः, 'मेघद्वारात् आकाशात्', 'मेघद्वारं महाबिल' मित्यमरः। असकृत् अनेकवारम्, अखिलगतयः सर्वत्र सञ्चारिण्यः याः शुचिगुलिकाः श्वेताग्निगोलकाः, ताः अक्षिपत् चिक्षेप।

अभेद्यं धूमशकटमनन्तान्तीव्रबाणानसृजत्। भूमिष्ठं यन्त्रं स्फुटित्वा वीरभट हृदयानां भयमुत्पादयामास, मदगजसमूहः हयपदातिसहितं रिपुं ममर्द। योधवराः आकाशादनेकानग्निगोलान् असकृदक्षिपन्।

- मत्तक्रीडावृत्तलक्षणम् -

''मत्ताक्रीडा मौत्नानौ नल्गिगिति भवति वसुशरदशयतियुता''

म-म-त-न-न-न-न-ल गाः गणाः, अष्टसु पञ्चसु दशसु यतिः।

తా॥ అతి కఠినము నభేద్యమునగు ధూమశకటము పొగను జిమ్ముచు తీవ్రమైన బాణవర్షమును గురిపించుచుండెను. భూమిలో పాతియుంచిన యంత్రము బ్రద్దలై శత్రుభట హృదయములకు భయమును కలిగించెను. మత్తమాతంగ యూథము విజృంభించి గుఱ్ఱములతో గాల్బలముతో నిండిన శత్రువును గ్రుమ్మెను. యుద్ధవీరులు ఆకసమునుండి మాటిమాటికి తెల్లని అగ్ని గుళికలను విసరిరి.

The strong and indestructible steam carriage fumed as it rained arrows. The machine buried under the ground blasted with a thunderous sound that caused terror in the hearts of enemies. The intoxicated elephants pounced on the enemy's cavalry and infantry. The brave soldiers shot fire balls into the air incessantly.

In Public domain. Digitization Muthulakshmi Research Academy

- मत्तेभम् -

३६. पादातकौन्तिकभटक्षतृहास्तिपकसाहस्रचर्मिरथिका
श्वारोहकावचिकशाक्तीकहैतिकधनुष्मन्मयारिपृतना ।
वीरोत्तमद्विजवरेण्यप्रतापशिखिनष्टा पतङ्गततिव-
दुर्हृच्छमूपतिरजय्योऽपि भारतभुजाशौर्यपञ्जरनिबद्धः ॥

व्या :- पादातेति :- पदाभ्यामतति गच्छतीति पदातिः, तेषां समूहः पादातं, पत्तिसंहतिरित्यर्थः। ''पादातं पत्ति संहति'' रित्यमरः। कुन्तं प्रहरणम् आयुधम् अस्येति कौन्तिकः प्रासिक इत्यर्थः ''समौ प्रासिककौन्तिका'' वित्यमरः। ते कौन्तिकाः, भटाः योद्धारः, क्षत्तारः सारथयः, हस्तिनः पान्तीति हस्तिपकाः, हस्तिपका एव हास्तिपकाः, स्वार्थे अण्, णित्त्वाद्वृद्धिः, हस्त्यारोहा इत्यर्थः'' ''आधोरणा हस्तिपका हस्त्यारोहा निषादिनः'' इत्यमरः। साहस्राः सहस्रिणः, सहस्रभटसमबलयुता इत्यर्थः। ''बलिनो ये सहस्रेण साहस्रास्ते सहस्रिणः'' इत्यमरः। चर्मिणः फलकपाणयः, खेटकधारिण इत्यर्थः। ''चर्मीफलकपाणिः स्या''दित्यमरः। रथिकाः रथिनः, अश्वारोहाः सादिनः, कावचिकाः वर्मधारिणः, शाक्तीकाः शक्तिहेतिकाः, शक्त्यायुधा इत्यर्थः, ''शाक्तिकश्शक्तिहेतिक'' इत्यमरः हैतिकाः नैस्त्रिंशिकाः, खड्गपाणय इत्यर्थः। धनुष्मन्तः धानुष्काः, स्वरूपं यस्याः सा पादाति - धनुष्मन्मया, प्राचुर्यार्थे मयट्, अरिपृतना शत्रुसेना, पतङ्गततिवत् शलभसमूह इव, वीरोत्तमौ वीरश्रेष्ठौ यौ द्विजवरेण्यौ ब्राह्मणक्षत्रियश्रेष्ठौ, तयोः प्रताप एव शिखी अग्निः, तस्मिन् प्रतापाग्नौ, नष्टा दग्धा बभूव, अजय्योऽपि जेतुमशक्योऽपि, क्षय्यजय्यौ, शक्यार्थे इति पाणिनिः। दुर्हृदां रिपूणां, चमूपतिः सेनानायकः, भारतयोः भारतवीरयोः तारकराजकुमारयोः भुजाशौर्यं भुजबलं, तदेव पञ्जरं बन्धनं, तत् गतः प्राप्तः, बद्धोऽभूदित्यर्थः।

सकलविधसैनिकैस्समुपेता शत्रुसेना सर्वापि भारतवीरप्रतापाग्नौ पतिता शलभसमितिरिव दग्धा बभूव। बलवानपि शत्रुसेनापतिः द्विजराजकुमाराभ्यां निगृहीतः बद्धो बभूव।

In Public domain. Digitization Muthulakshmi Research Academy

- मत्तेभवृत्तलक्षणम् -

''तभो जजौ सरौ नगौ मत्तेभविक्रीडितम्''।

''त-भ-ज-ज-स-र-न-गाः गणाः, प्रसिद्धमत्तेभविक्रीडितलक्षणस्य विलक्षणमेतत्।

తా॥ కాల్బలము, ఈటెలవారు, వీరభటులు, సారథులు, సాదులు, బలవంతులు (వస్తాదులు), డాలుపట్టినవారు, రథికులు, అశ్వారోహకులు, కవచధారులు శక్తిధారులు ఖడ్గధారులు, ధనుర్ధరులు మున్నగు వీరవరులతో నిండిన ఆ శత్రుసైన్యమంతయును, మిడతల దండువలె, ద్విజకుమారుల ప్రతాపాగ్నిలోబడి దగ్ధమయ్యెను. బలవంతుడైనను, శత్రుసేనాధిపతియు వీనికి జిక్కి బంధితుడయ్యెను.

Warriors with spears, shields and various other weapons and soldiers of cavalry, infantry- the whole rival army turned prey like feeble grasshoppers to the fire of the prince's and Taraka's volor and wrath -

- सुमुखी -

३७. युवराजमथेक्षितुं क्षतव्यथितं विजयप्रमोदितम् ।
शिबिरेऽभ्रमतां सुहृद्वरौ कृतिनौ महिदेवभूभुजौ ।।

व्या :- युवराजमिति :- अथ युद्धसमाप्त्यनन्तरं, कृतिनौ निपुणौ, सुहृद्वरौ मित्रश्रेष्ठौ, तौ महिदेवभूभुजौ भूसुरभूपतिकुमारौ, क्षतव्यथितं क्षतपीडितं, विजयप्रमोदितं विजयसन्तुष्टं, युवराजं सार्वभौमसोदरम्, ईक्षितुं द्रष्टुं, शिबिरे पटकुटीरे, अभ्रमतां बभ्रमतुः।

विजयानन्तरं तौ तारकराजकुमारौ शस्त्रपीडितमपि विजयलाभेन सन्तुष्टचित्तं तं सार्वभौमसोदरं वीक्षितुं पटकुटीरे पर्यभ्रमताम्।

- सुमुखीवृत्तलक्षणम् -

''स सजा भभरा लगौ सुमुखी ।''

स-स-ज-भ-भ-र-ल-गाः गणाः दशसु दशसु यतिः, पूर्वार्धस्य लक्षणमेतत् उत्तरार्धमेवमेवोन्नेयम्।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ గాయములతో బాధపడుచున్నను, విజయము తమకులభించినదని ఆనందించుచున్న ఆ సార్వభౌమ సోదరుని చూచుటకై ఆ కుమారవరులిరువురును శిబిరములో నటునిటు దిరుగుచుండిరి.

The triumphant two, wandered back and forth restlessly as they waited to see the monarch's brother whose happiness for their victory compensated the pain of the wounds he was ailing from.

- मत्तमयूरम् -

३८. शय्याधीनं नीरपिपासुं क्षतबाहुं तावात्मानौ लोकितुमिच्छुं रणधीरम् ।
रक्तस्रावाद्वक्तुमशक्तं बहु दृष्ट्वा दुःखातीतावप्यणुमात्रं रुदितस्स्म ॥

व्या :- शय्याधीनमिति :- शय्यायामधीनं पर्यङ्काश्रितं, नीरपिपासुं जलं पातुमिच्छुं, क्षतौ बाहू भुजौ यस्य तं, आत्मानौ तौ आत्मरूपिणौ अथवा आत्मनीनौ तौ कुमारवरौ, स्वौ, लोकितुं वीक्षितुम्, इच्छुं काङ्क्षन्तं, रणधीरं युद्धे अपलायिनं, बहु अधिकं यथा तथा, रक्तस्रावात् रुधिरापगमात्, वक्तुं भाषितुम्, अशक्तम् असमर्थं, तं युवराजं दृष्ट्वा आलोक्य, दुःखम् अतीतावपि दुःखरहितावपि, तौ कुमारौ, अणुमात्रम् ईषन्मात्रं, रुदितः स्म अरुदताम्।

केवलं शय्यामेवाश्रित्य तिष्ठन्तं विक्षतभुजं निस्सृतरुधिरतया वक्तुमप्यशक्तं जलपानाभिलाषिणं स्वौ द्रष्टुमिच्छुंतं राजसोदरं वीक्ष्य दुःखातीतावपि तौ कुमारौ क्षणमात्रं किञ्चदरोदिष्टाम्।

- मत्तमयूरवृत्तलक्षणम् -

वेदैरन्ध्रे म्तौ यसगा मत्तमयूरम्,
म-त-य-स-गाः गणाः। चतुर्षु नवसु यतिः।

తా॥ ఆ సార్వభౌముని సోదరుడు శయ్యమీదనే పడియుండెను. చేతులు కదులకుండెను. శరీరమందున్న రక్తమెక్కువగా పోవుటచే మాటలాడుటకు గూడ శక్తి చాలకుండెను. నీరు త్రాగవలెనని అనుకొనుచుండెను. ఈ కుమారవరులను

In Public domain. Digitization Muthulakshmi Research Academy

జూడదలంచుచుండెను. అట్టి యువరాజును చూడగనే దుఃఖమెరుగని వారైనను వీరిరువును కొంచెము దుఃఖించిరి.

The monarch's brother was lying on a bed with hands still without a movement, debilitated due to loss of blood. He had no energy even to utter a syllable. He was thirsty and pined to see the two who came down for his help in the pressing need. The duo felt sad for the first time ever in their life, at his plight.

- उपस्थितम् -

३९. द्विजातिमणिमुर्वीभृद्वतंसो जगाद करुणार्द्रस्वान्त इत्थम् ।
दयामय महात्मन् भूमिदेव त्वमर्हसि चिकित्सां कर्तुमस्य ॥

व्या :- द्विजातिरिति :- उर्वीभृतां राज्ञां वतंसः शिरोभूषणं, राजकुमारः, करुणार्द्रस्वान्तः दयार्द्रीकृतचित्तस्सन्, द्विजातिमणिं विप्ररत्नं तारकं, दयामय करुणारूप! महात्मन् महानुभाव ! भूमिदेव भूसुर ! त्वं भवान्, अस्य युवराजस्य, चिकित्सां रोगप्रतिक्रियां, कर्तुं विधातुम्, अर्हसि समर्थोऽसि, इत्थम् इति, जगाद अवोचत्।

तदानीं राजपुत्रः युवराजं वीक्ष्य करुणार्द्रहृदयस्सन्, स्वमित्रं तारकमुद्दिश्य, भो महात्मन् भूसुरश्रेष्ठ ! अस्य चिकित्सां विधेहि इति अवदत् ।

- उपस्थितवृत्तलक्षणम् -

''उपस्थितमिदं ज्सौ त्सौ सगुरुकं चेत्।''
ज-स-त-स-गाः गणाः। पादे यतिः।

తా॥ ఆ యువరాజును గాంచినంతనే రాజకుమారుని మనస్సు కరిగెను. వెంటనే తారకునిజూచి, ఓ దేవదేవ! భూసురాగ్రణీ ! ఈతని బాధలను నివారింప నీవే సమర్థుడవు. త్వరగా వీనికి చికిత్స గావింపుమని కోరెను.

The prince was moved and his heart melted away. He turned to his friend *Taraka* and said, "Oh, the best among men! You are the only one who can relieve him of this suffering. Kindly start the treatment right away.

In Public domain. Digitization Muthulakshmi Research Academy

- मन्दाक्रान्ता -

४०. अस्मत्स्वामी सहजसदृशस्सार्वभौमानुजोऽयं
श्रान्तश्शस्त्रक्षतनिजभुजोऽप्यावयोस्सङ्गमिच्छुः ।
सर्वज्ञस्त्वं स्ववचनमव प्राणयैनं महात्मन्
नस्यादीदृग्विजयमहिमाऽस्माद्विना सार्थकोऽद्य ॥

व्या :- अस्मदिति :- अस्मत्स्वामी अस्माकं प्रभुः सार्वभौमः, सहजसदृशः सोदरसमानः, अयम् एषः, सार्वभौमानुजः चक्रवर्तिसोदरः, श्रान्तः क्षीणसत्त्वः, शस्त्रक्षतनिजभुजोऽपि आयुधच्छिन्नबाहुरपि, आवयोः नौ, सङ्गं सङ्गतिम्, इच्छुः काङ्क्षमाणः, त्वं भवान्, सर्वज्ञः सर्वं जानासि, स्ववचनं स्वीयप्रतिज्ञावाक्यं, अव रक्ष, महात्मन् महानुभाव ! एनं युवराजं, प्राणय जीवय, अद्य इदानीम्, ईदृग्विजयमहिमा ईदृशविजयलाभः अस्माद्विना अमुं विना, सार्थकः सफलः न स्यात् न भवेत् ।

हे महात्मन् तारक ! सार्वभौमः अस्माकं सोदरतुल्यः तस्यानुजः अयमप्यस्माकं सोदरसमान एव। आयुधच्छिन्नगात्रोऽप्ययं अस्मत्सङ्गतिमभिलषति, भवांस्तु सर्वज्ञः, भवत्सोदरं भवते दास्यामीति या प्रतिज्ञा सार्वभौमसन्निधौ त्वया कृता तां परिपालय, अमुं प्राणय, नोचेदिदानीमस्मत्सम्पादितोऽयं विजयः अमुं विना निरर्थक एव भवेत्।

- मन्दाक्रान्तावृत्तलक्षणन्तूक्तमेव -

తా॥ ఓయీ ! తారకమహాశయా ! సార్వభౌముడు మనకు సోదరునివంటివాడు. ఈతడు గూడ మనకట్టి వాడేగదా ! యుద్ధమున క్షతగాత్రుడై యుండియు నీ యువరాజు మన సహవాసమునర్థించెను. నీవన్నియు నెరింగినవాడవు. నీ సోదరుని నీ కప్పగించెదనని సార్వభౌమునికడ బ్రతిన గావించితివి. నీ మాటను నిలుపుకొనుము. వీనిని బ్రతికింపుము. వీడు లేకుండ మనమేగినచో నీ విజయలాభమంతయు నిష్ఫలమే యగును సుమా ! అని పలికెను.

In Public domain. Digitization Muthulakshmi Research Academy

Taraka, my friend! We have a brotherly bonding with the monarch and so is it with his sibling too. Now this wounded man seeks our help and we have promised the monarch that we would bring his brother back safely. Let's keep the promise. The victory over the enemies is of no value if this man doesn't survive."

- मौक्तिकमाला -

४१. शस्त्रचिकित्सां झटिति स कुर्वन् औषधमस्मै तदुपरि यच्छन् ।
वार्तमकार्षीदमुमतिवेलं तत्क्षणकालेऽद्भुतमहिमाढ्यः ॥

व्या :- शस्त्रेति :- अद्भुतेन महिम्ना सामर्थ्येन आढ्यः पूर्णः, सः तारकः, तत्क्षणकाले सद्य एव, झटिति शीघ्रं, शस्त्रचिकित्सां शस्त्रवैद्यं, कुर्वन् आचरन्, तदुपरि तदनन्तरम्, अस्मै युवराजाय, औषधं यच्छन् ददत्, अतिवेलम् अत्यन्तम्, अमुं राजसोदरं, वार्तम् अरोगम् अकार्षीत् चकार। "वार्तं फल्गुन्यरोगे च" इत्यमरः।

- मौक्तिकमालावृत्तलक्षणम् -

मक्तिकमाला यदि भतनाद्गौ ।
भ-त-न-ग-गाः गणाः, पञ्चसु सप्तसु यतिः

తా॥ రాజకుమారుని మాటలను వినిన వెంటనే అతి మహిమోపేతుడైన యా తారకుడు, వేగముగా శస్త్రచికిత్సను గావించి, మందుల్రాగించి, యా యువరాజుని రోగవినిర్ముక్తుని గావించెను.

Taraka, who has the power of miracles, through a medical procedure and wonderful medicines made him recover in a short span.

In Public domain. Digitization Muthulakshmi Research Academy

- लक्ष्मीः -

४२. तिलकयकृत्प्लीहकशेर्वान्त्ररुधिरपललहृदयमन्या
धमनिकपालं क्षितिदेवः प्रकृतिमगमयत परिशोध्य ।
स सपदि मूर्छालमभीक्ष्णं नरपतिसहजमुदमिमीलत्
प्रथितनृपालोऽन्नबुभुक्षुः सरभसमघसदमृतपथ्यम् ।

व्या :- तिलकेति :- तिलकं क्लोम, कुक्षौ स्थितः शोणः मांसविशेष इत्यर्थः। ''तिलकं क्लोम'' इत्यमरः। यकृत् कालखण्डं, कुक्षौ दक्षिणभागे स्थितः कृष्णवर्णो मांसविशेषः इत्यर्थः। 'कालखण्डयकृती तु समे उभे'' इत्यमरः। प्लीहा गुल्मः, हृदये वामभागे स्थितः पीतो मांसविशेष इत्यर्थः, ''गुल्मस्तु प्लीहा पुंसी''त्यमरः। कशेरुः पृष्ठास्थि, ''पृष्ठास्थितु कशेरुका'' इत्यमरः। आन्त्रं पुरीतत्, भुक्तस्य आहारस्य विभजनकर्ता नाडीविशेष इत्यर्थः, ''आन्त्रं पुरीत''दित्यमरः। रुधिरं शोणितं, पललम् आमिषं, हृदयं हृत्, पद्माकारो मांसविशेष इत्यर्थः ''हृदयं हृदि''त्यमरः। मन्या पश्चाद्ग्रीवासिरा, ग्रीवायाः पश्चाद्भागे स्थिता सिरा इत्यर्थः। ''पश्चाद्ग्रीवासिरा मन्या'' इत्यमरः, धमनिः नाडी बृहन्नाडीविशेष इत्यर्थः। ''नाडी तु धमनिस्सिरा'' इत्यमरः, कपालं कर्परं, ''स्यात्कर्परः कपालोऽस्त्री'' इत्यमरः एषां समाहारः तिलकयकृत् कपालं, तिलकादिकपालान्तान् शरीरावयवान्, प्राण्यङ्गत्वादेकवद्भावः। परिशोध्य परिशील्य, परिशुद्धान्कृत्वा, क्षितिदेवः भूसुरः तारकः, प्रकृतिमवयत्, सहजस्थितीनकार्षीत्, यथापूर्वमकरोदितिभावः। सः तारकः, सपदि सद्यः आभीक्ष्णम् अत्यन्तं, मूर्छालं मूर्छितम्, अपगतचैतन्यमित्यर्थः। ''मूर्छाले मूर्तमूर्छिता''वित्यमरः। नरपतिसहजं राजसोदरम्, उदमिमीलत् उन्मिषन्नयनमकार्षीत्। प्रथितनृपालः प्रसिद्धो युवराजः, अन्नबुभुक्षुः अन्नं भोक्तुमिच्छुः। सरभसम् अतिशीघ्रम्, अमृतपथ्यम् अमृततुल्यमारोग्यप्रदमाहारम्, अघसत् अभक्षयत्।

स तारकस्सत्वरं तिलकादिकपालपर्यन्तं शरीरावयवभागान्परिशील्य परिशोध्य यथापूर्वस्थितीनकार्षीत्। ततः मूर्छितं युवराजमुन्मीलितनयनमकरोत्। तदा राजसोदरः क्षुत्पीडितः अन्नबुभुक्षुस्सन्न अमृतसमानं पथ्यमाहारं बुभुजे।

In Public domain. Digitization Muthulakshmi Research Academy

- लक्ष्मीवृत्तलक्षणम् -

''सप्तविंशतिगुरवः त्रयो लघवः इत्येवं त्रिंशदक्षरा चेल्लक्ष्मीर्भवति, एतल्लक्षणं तद्विलक्षणमिव भाति।

తా।। ఆ తారకుడు రాజసోదరుని కుక్షియందున్న నీరుతిత్తిని, యకృత్ప్లీహములను, వెన్నెముకను, పేగులను, రక్తమాంసములను, హృదయమును, మెడవెనుకనున్న పెద్దనాడిని, ధమనిని, కపాలమును, పరిశీలించి, పరిశోధించి, వానినన్నింటిని పూర్వమందున్నట్లు గావించెను. మూర్ఛలో మునిగియున్న వానిని కన్నులు విప్పునట్లు గావించెను. పిమ్మట నా రాజసోదరుడు ఆకలిచే ఆహారమును తినుటకాశింప, వానికమృత సమానమైన పథ్యాహారమును తినిపించెను.

Bladder, spleen, spine, intestines, heart, blood, the deep cervical vein, tubular vessels, skull - the whole body's investigation was done carefully and health was restored. The patient opened his eyes and as he was starving and longed to eat, he was fed a healthy nutritious nectar like diet.

- उपजातिः -

४३. आप्तासुरत्यद्भुतवैद्यदत्तजीवातुहेतोर्युवराजचन्द्रः ।
भवन्स उल्लाघ उपोढदेह उवाच वाचं मधुरां महान्तौ ॥

व्या :- आप्तासुरिति :- सः युवराजचन्द्रः युवराजश्रेष्ठः, अत्यद्भुतः अत्याश्चर्यकरः यो वैद्यः भिषक् तेन दत्तः जीवातुः जीवनौषधं, तस्माद्धेतोः, तारकदत्तजीवनौषधमहिम्नेत्यर्थः, आप्ताः प्राप्ताः आसवः प्राणाः येन सः लब्धजीवितः, सः युवराजः, उल्लाघः भवन् रोगविनिर्मुक्तस्सन् ''उल्लाघो निर्गतो गदा''दित्यमरः। उपोढः दृढः देहः शरीरः यस्य सः, दृढकायस्सन्, महात्मानौ महानुभावौ तौ द्विजराजकुमारौ, मधुरां वाचं रुचिरां वाणीम् उवाच अवोचत्।

In Public domain. Digitization Muthulakshmi Research Academy

स युवराजस्तारकदत्तजीवनौषधमहिम्ना लब्धजीवितः रोगविनिर्मुक्तः दृढकायस्सन् तौ कुमारावुद्दिश्य एवं मधुरां वाचमवोचत्।

- उपजातिवृत्तलक्षणन्तूक्तमेव -

తా॥ ఆ యువరాజు తారకుని చికిత్సవలన నాతడిచ్చిన దివ్యౌషధము మహిమచేతను బ్రతికి రోగవినిర్ముక్తుడై, దృఢశరీరుడై ఆ తారక రాజకుమారులను జూచి ఇట్లు మధురముగ బలికెను.

The young prince, with health restored and with strength regained addressed the two friends thus sweetly-

- चञ्चरीकावलिः -

४४. नृसिंहौ मत्प्राणत्राणदीक्षागरिष्ठौ भवन्तौ वन्देऽहं भारतीयावतंसौ ।
भवच्चारित्रं सन्देशपारवतेभ्यो मयाऽज्ञायि प्रत्यक्षं युवामद्य वीक्षे ॥

व्या :- नृसिंहाविति :- अहं, नृसिंहौ मानवश्रेष्ठौ, मत्प्राणत्राणे मदीयप्राणरक्षणे दीक्षागरिष्ठौ बद्धदीक्षौ, भारतीयावतंसौ भारतीयशिरोभूषणे, भवन्तौ युवां, वन्दे नमस्करोमि, भवच्चारित्रं युष्मदुदन्तः, सन्देशपारवतेभ्यः वार्तावाहककपोतेभ्यः ''पारावतः कलरवः कपोतः'' इत्यमरः, मया, अज्ञायि विज्ञातमभूत्, अद्य इदानीं, युवां भवन्तौ, प्रत्यक्षं साक्षात्, वीक्षे पश्यामि।

भो ब्राह्मणराजन्यकुमारौ ! युवां मानवश्रेष्ठौ, मत्प्राणरक्षणार्थमिहागत्य तद्रक्षणे बद्धदीक्षौ, भारतीयरत्नाभ्यां भवद्भ्यां नमः। भवच्चरितमितःपूर्वमेव सन्देशकपोतेभ्यो मया आकर्णितम्, इदानीं वामहं प्रत्यक्षमपश्यम्।

- चञ्चरीकावलीवृत्तलक्षणम् -

''यमौ रौ विख्याता चञ्चरीकावली गः''

य-म-र-र-गाः गणाः, षट्सु सप्तसु यतिः।

తా॥ ఓ ద్విజకుమారులారా ! మీరిరువురును మానవశ్రేష్ఠులు, భారతీయ రత్నములు. నా ప్రాణములను కాపాడుటకు దీక్షబూనిన మహాత్ములు, మీకివే నా

In Public domain. Digitization Muthulakshmi Research Academy

నమోవాకములు. వార్తలనందించు పావురముల ద్వారా మీ చరిత్ర ఇంతకుముందే నాకు తెలిసినది. ఇప్పుడు కన్నులార జూచితిని.

"Oh great ones! You are the best among men. You have been on a mission to save me. Please accept my salutations. I have heard about you earlier through messages carried by doves and now have the opportunity to see you both.

- चन्द्रलेखा -

४५. साम्राज्यं कीर्तिरावीत्थं सार्वभौमस्य दुर्हृ
त्सेनायाश्शौर्यमद्यैवाऽध्वंसि सर्वं भवद्भ्याम् ।
अन्वाजेकृत्य खिन्नोऽहं प्राणिमि द्राङ्गहद्भ्यां
देवौ किम्मानवौ बह्वाश्चर्यतेजः प्रतीतौ ॥

व्या :- साम्राज्यमिति :- भवद्भ्यां युवाभ्यां, दुर्हृत्सेनायाः शतृसैन्यस्य, सर्वं शौर्यं सकलपराक्रमः, अध्वंसि ध्वस्तः अक्रियत। इत्थम् एवम् अद्यैव इदानीमेव, सार्वभौमस्य चक्रवर्तिनः, साम्राज्यं राज्यं, कीर्त्या रौति ध्वनतीति कीर्तिरावि यशः पूर्णमभूत्। खिन्नः अहं दुःखितः अहम्, अन्वाजेकृत्य बलमाधाय, प्राणिमि जीवामि, दुर्बलस्य बलाधानमन्वाजीकरणम् ''उपाजेऽन्वाजे'' इति सूत्रेण गतिसंज्ञायां ''कुगति प्रादय''इति गतिसमासे क्त्वो ल्यबादेशे रूपम्। बह्वाश्चर्यतेजः बह्वाश्चर्यकरमहिमा, तेन प्रतीतौ प्रसिद्धौ, भवन्तौ युवां, देवौ किम् उत मानवौ वा। देवौ वा मानवौ वा ब्रूतमित्यर्थः।

भवत्प्रतापाग्निना सर्वं शत्रुसैन्यं दग्धमिति अद्यैव सर्वमस्मदीयं राज्यं भवत्कीर्तिं प्रकटयति, दुर्बलोऽहं भवद्भ्यां प्रबलः कृतः, भवन्महिमा वर्णितुमशक्यः, भवन्तौ मानवौ वा उत देवौ वा अहं न जाने, ब्रूतम्।

- चन्द्रलेखावृत्तलक्षणन्तूक्तमेव -

తా॥ మీ ప్రతాపముచే శత్రుసేనా సముదాయమంతయు నశించినదని, ఇప్పుడే మీ కీర్తి మా సామ్రాజ్యమందంతట మారుమ్రోగుచున్నది. మీ మహిమవలన దెబ్బలుతిన్న

In Public domain. Digitization Muthulakshmi Research Academy

నేను బ్రతికితిని. బలిష్ఠుడనైతిని. మీ మహిమ అత్యాశ్చర్యకరము, మీరు మానవులో దేవతలో నాకు తెలియకున్నది చెప్పుడు.

With your valour, you wiped out the enemies. Your splendour and fame has reached our empire already. It's your magical power of healing that has saved my life and made me regain my strength. This is a miracle. Kindly tell me the truth if you are gods or humans as I am ignorant of the fact.

- तोटकम् -

४६. अनशिष्यमहं स्वबलेन समं न युवामभविष्यतमत्र यदि ।
सफलं स कृषीष्टतमां युवयोरचिराय मनोरथमस्मदिनः ॥

व्या :- अनशिष्यमिति :- अत्र अस्मिन्समये, युवां भवन्तौ, न अभविष्यतं यदि न भवेतां चेत्, अहं, स्वबलेन समं स्वसेनया सह, अनशिष्यं नाशनमगमिष्यम्। सः अस्मदिनः अस्मत्प्रभुस्सार्वभौमः, युवयोः भवतोः, मनोरथं कामम्, अचिराय द्राक्, सफलं फलवन्तं, कृषीष्टतमां नितरां करोतु।

अस्मिन्समये युवां नागच्छेतं यदि, अहं मत्सैन्येन साकं नाशनमगमिष्यम्, युष्मन्मनोरथं सार्वभौमः सर्वथा सफलीकरोतु।

- तोटकवृत्तलक्षणम् -

"इह तोटकमम्बुधिसैः प्रथितम्।"
स-स-स-साः गणाः। पादे यतिः।

తా॥ ఓ మహాత్ములారా ! సమయమున కిచ్చుటికి మీరు రాకుండినచో నేను నా సైన్యముతో ఈ పాటికి మరణించియే యుందును. సకాలమునకు వచ్చి నన్ను కాపాడితిరి. మీ మనోరథమును సార్వభౌముడు తప్పక త్వరితముగ నెరవేర్పగలడు.

Oh great men! But for your timely arrival and help, I along with my soldiers would have been killed. May god grant you all your wishes for your kind act"

In Public domain. Digitization Muthulakshmi Research Academy

- अलोला -

४७. पाणौकृत्य जयार्थं रक्षन्तौ पृतनां मां भूभर्तारमुपेतां मत्सोदर्यमतन्द्रम् ।
इत्थं भारतवीरौ विज्ञप्तौ युवराजे नानन्दाम्बुधिमग्नेनाऽत्यन्तं कुशलेन।।

व्या :- पाणौकृत्येति :- जयार्थं जयेन लब्धं धनं, पाणौकृत्य स्वीकृत्य, ''नित्यं हस्ते पाणावुपयमने'' इत्यनेन पाणावित्यस्य उपयमनार्थे गतिसंज्ञायां, ''कुगतिप्रादय'' इति समासे, क्त्वो ल्यबादेशे, पाणौकृत्येति रूपम्, उपयमनशब्दस्य विवाहार्थकत्वमिव स्वीकारमात्रत्वमपि वैयाकरणैरङ्गीकृतम्। पृतनां सेनां माञ्च रक्षन्तौ पालयन्तौ, भूभर्तारं सम्राजं, मत्सोदर्यं मद्भ्रातरम्, अतन्द्रं जागरूकता यथा तथा उपेतां प्राप्नुताम्, इत्थम् इति, अत्यन्तं कुशलेन अतिनिपुणेन, आनन्दाम्बुधिमग्नेन सन्तुष्टेन, युवराजेन सार्वभौमसोदरेण, भारतवीरौ द्विजराजकुमारौ, विज्ञप्तौ उक्तौ।

तदनन्तरं कुशली सन्तुष्टः युवराजः, तावालोक्य, भो भारतवीरौ ! युवामिदानीमेव जयधनं स्वीकृत्य मया सेनया च सह, मद्भ्रातृसकाशं गच्छतमिति, विज्ञापयामास।

- अलोलावृत्तलक्षणम् -

''द्विसप्तच्छिदलोलाम्सौ, म्भौ गौ चरणे चेत्''
म-स-म-भ-ग-गाः गणाः सप्तसु सप्तसु यतिः।

తా।। అతి నిపుణుడైన యా రాజసోదరుడు పరమానన్దభరితుడై వారిరువురను గాంచి, మహాత్ములారా ! మీరు జయసంపదతో నాతో సేనతోగూడ నిప్పుడే సార్వభౌముడైన నా సోదరుని చూచుటకు పయనముగండని మనవి చేసెను.

The ecstatic monarch's brother humbly requested the victorious two to get ready for their journey back along with the army.

- उपजातिः -

४८. अवश्यकार्याण्यचिरेण कृत्वा सत्कृत्य सैन्यं महितान्नपानैः ।
राजानुजाज्ञां प्रतिपालयन्तौ चन्द्रान्तरीपं सहसाऽपतुस्तौ ।।

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- अवश्येति :- तौ तारकराजपुत्त्रौ, अवश्यकार्याणि मुख्यतया कर्तव्यानि कर्माणि, अचिरेण शीघ्रं कृत्वा विधाय, महितानि योग्यानि अन्नपानानि, तैः, आहारैः पानीयैश्च, सैन्यं सेनां, सत्कृत्य सम्मान्य, राजानुजाज्ञां राजसोदरानुमतिं, प्रतिपालयन्तौ अनुसरन्तौ, सहसा शीघ्रं, चन्द्रान्तरीपं चन्द्रद्वीपम्, आपतुः जग्मतुः।

तौ तारकराजकुमारौ मुख्यकार्याणि निर्वर्त्य पानभोजनादिना सेनां तर्पयित्वा, युवराजादेशानुसारेण झटिति चन्द्रद्वीपं जग्मतुः।

उपजातिलक्षणमुक्तम्

తా॥ మిత్రులయిన యా కుమారులిరువురును చేయదగిన ముఖ్యకార్యములను చేసికొని, అన్నపానాదులచే సేనకు తృప్తిగావించి యువరాజు నాజ్ఞను బాలించుచు చంద్రదీపమును చేరుకొనిరి.

After hosting the soldiers a sumptuous meal and after taking care of all crucial matters the two friends obliged the monarch's brother and all of them set out for *Chandradveepa*.

- भुजङ्गविजृम्भितम् -

४९. दृग्यन्त्रेण प्रेक्ष्यानीकं स्वमखिलधरणिपरिवृढो जयध्वजभूषितम्
दृष्ट्वाऽत्मानन्दं भेरीभिस्सकलनरवरनिकरं नदन्पुटभेदनम् ।
सोऽलङ्कृत्याऽभ्युत्थानायागमदमितहितजनयुतस्तरङ्गचलत्प्लवाऽ
तिक्रान्ताब्धौ क्रोशद्वन्द्वं सुखकरपवनपुलकितो महाविभवान्वितः ॥

व्या :- दृग्यन्त्रेणेति :- अखिलधरणेः सकलभूमण्डलस्य परिवृढः प्रभुः सार्वभौमः, दृग्यन्त्रेण दूरदर्शिनीयन्त्रेण, जयध्वजैः जयपताकाभिः, भूषितम् अलङ्कृतं, स्वं स्वीयम्, अखिलं सर्वम्, अनीकं सैन्यं, प्रेक्ष्य दृष्ट्वा दृष्ट्वा सन्तुष्य, आत्मानन्दं स्वीयसन्तोषं, भेरीभिः भेरीदुन्दुभ्यादिवाद्यैः, सकलनगरनिकरं नगरस्थितसर्वमानव समूहं, वदन् कथयन्, पुटभेदनं पत्तनं, ''पत्तनं पुटभेदन'' मित्यमरः। अलङ्कृत्य तोरणादिभिर्भूषयित्वा, अमिताः असङ्ख्याकाः हितजनाः सुहृदः तैः युतः सहितः,

In Public domain. Digitization Muthulakshmi Research Academy

सन्, महाविभवान्वितः अमितैश्चर्यसंयुतः, तरङ्गेषु भङ्गेषु चलन् यः प्लवः, नौका, तेन अतिक्रान्तः तीर्णः यः अब्धिः समुद्रः तस्मिन्, क्रोशद्वन्द्वं गव्यूतिं, सुखकरपवनेन सुखदायकवायुना, पुलकितः हृष्यत्तनूरुहः, अभ्युत्थानाय, प्रत्युद्गमनाय, अगमत् जगाम।

स सार्वभौमः दूरदर्शिनीयन्त्रेण आगच्छन्तं जयपताकालङ्कृतं स्वीयं सर्वं सैन्यं विलोक्य, सन्तुष्टः, स्वानन्दं भेर्यादिवाद्यध्वनिद्वारा सर्वेभ्यः पौरेभ्यः श्रावयित्वा, नगरं भूषयित्वा, अनेकाप्तजनपरिवृतः धूमनौकामारुह्य, समुद्रे क्रोशद्वयमात्रं गत्वा, तद्वातेन रोमाञ्चितशरीरः तौ कुमारवरौ प्रत्युज्जगाम।

- भुजङ्गविजृम्भितवृत्तलक्षणम् -

''वस्वीशाश्वच्छेदोपेतं ममतसयुगनरसलगैर्भुजङ्गविजृम्भितम्''
म-म-त-न-न-न-र-स-ल-गाः गणाः अष्टसु - एकादशसु- सप्तसु - यतिः।

తా॥ ఆ సార్వభౌముడు దూరదర్శిని యంత్రముచే వచ్చుచున్న తన సైన్యమునంతను చూచెను. అది జయపతాకలతో అలంకరింపబడియున్నది. దానిని గాంచినంతనే యాతనికి అమితానందము కలిగెను. ఆయానందమును భేరిదుందుభి మున్నగు వాద్యధ్వనుల ద్వారా పట్టణములోని వారికందరికిని తెలియజేసెను. పిమ్మట ఆప్తమిత్రు లసంఖ్యాకముగ దన్నుగొల్వ మహావైభవోపేతుడై ధూమనౌక నధిరోహించి యా సార్వభౌముడు, సముద్రమందు రెండు క్రోసుల దూరమేగి, అందలి చల్లగాలికి పరవశుడగుచు, ఆ తారక రాజకుమారులను ఎదుర్కొనెను.

The monarch saw the triumphant army returning jubilantly, through a telescope. He felt extremely happy and had the trumpets blown to announce the victory. As he was being praised by all the close associates, he got into a steamboat to receive *Taraka,* the prince and his brother, along with the army even before they reached the shore.

In Public domain. Digitization Muthulakshmi Research Academy

- पञ्चचामरम् -

५०. सहस्रनावरूप्यसैन्यतल्लजं जयध्वजा
न्वितं जगन्नुतो विलोक्य सार्वभौमसत्तमः ।
प्रहृष्य सोऽधिरुह्य नौमचर्चिकां स्वसोदरे
ड्यमानभारतीयशेखरावपश्यदुत्सुकः ॥

व्या :- सहस्रेति :- जगन्नुतः, लोकसन्नुतः सः सार्वभौमसत्तमः उत्तमचक्रवर्ती, जयध्वजान्वितं विजयपताकाविभूषितं, सहस्रनावरूप्यं सहस्रैर्नौभिरागतः यः सैन्यतल्लजः श्रेष्ठः तं सेनाविशेषं, ''हेतुमनुष्य'' इत्यादिना रूप्यप्रत्ययः। ''मतल्लिकामचर्चिका प्रकाण्डमुद्धतल्लजौ, प्रशस्तवाचकान्यमूनि'' इत्यमरः। विलोक्य निरीक्ष्य, प्रहृष्य सन्तुष्य, नौमचर्चिकां प्रशस्तां नावम्, अधिरुह्य आरुह्य, उत्सुकौ इष्टार्थोद्युक्तौ, स्वसोदरेण स्वभ्रात्रा ईड्यमानौ अभिष्टूयमानौ भारतीयशेखरौ भरतवीरश्रेष्ठौ, अपश्यत् - ददर्श।

सोऽपि सार्वभौमः बहुनौकागतं जयलक्ष्मीविराजमानं स्वसैन्यं विलोक्य, मुदितस्सन्, स्वनौकां विहाय, तदीयनौकामारुह्य, तत्र स्वभ्रात्रा प्रशस्यमानं भारतवीरद्वयमपश्यत्।

- पञ्चचामरवृत्तलक्षणन्तूक्तमेव -

తా॥ ఉత్తమోత్తముడైన ఆ సార్వభౌముడు వేలకొలది నావలపై విజయ లక్షణములతో విరాజిల్లి, వచ్చుచున్న తన సైన్యమునంతనుగాంచి, సంతుష్టాంతరంగుడై, తన పడవనుండి దిగి, ప్రశస్తమైన వారి పడవపైకేగి, అచ్చట ఉత్సుకులై తన అనుజునిచే కొనియాడబడుచున్న ఆ భారత వీరకుమార యుగ్మమును గాంచెను.

The noble monarch accompanied by people in hundreds of ships and boats looked contently at his army that was returning safely, disembarked his ship and got into their splendid vessel and saw his younger brother who was all in praise of *Taraka* and the prince.

In Public domain. Digitization Muthulakshmi Research Academy

- शिखरिणी -

५१. महाब्रह्मं नत्वा विजयमुदितं क्षत्रियमणिं
परिश्लिष्य प्रेम्णा सुखिनमथ सञ्चुम्ब्य सहजम् ।
अतीवानन्दाश्रुप्लुतनयनयुग्मो नरपति
स्स योधानप्राक्षीदसकृदखिलान्नित्यकुशलम् ॥

व्या :- महाब्रह्ममिति :- महांश्चासौ ब्रह्मा च महाब्रह्मः ब्राह्मणोत्तमः, तं नत्वा नमस्कृत्य, "कुमहद्भ्यामन्यतरस्या" मित्यनेन ब्रह्मन् शब्दस्य टच्। विजयमुदितं जयसन्तुष्टं, क्षत्रियमणिं राजरत्नं, परिश्लिष्य आलिङ्ग्य, अथ ततः, प्रेम्णा प्रीत्या, सुखिनं सुखवन्तं, सहजम् अनुजं, सञ्चुम्ब्य चुम्बित्वा, अतीव अत्यन्तम्, आनन्दाश्रुभिः आनन्दभाष्पैः प्लुतं सिक्तं नयनयुगलं नेत्रद्वयं यस्य सः, नरपतिः सार्वभौमः, अखिलान् सर्वान्, योधान् सैनिकान्, असकृत् पुनः पुनः, नित्यकुशलं नित्यक्षेमम्, अप्राक्षीत् अपृच्छत्।

स सार्वभौमः द्विजरत्नं तारकं प्रणम्य राजरत्नं नृपकुमारमालिङ्ग्य, स्वसोदरं प्रेम्णा परिचुम्ब्य, आनन्दाश्रुपरीतनयनयुगलस्सन्, सर्वान् वीरभटान् कुशलमपृच्छत्।

- शिखरिणीलक्षणवृत्तन्तूक्तमेव -

తా॥ ఆ సార్వభౌముడు మున్ముందుగ దారకునకు నమస్కారము గావించి, రాజకుమారుని కౌగిలించుకొని, సుఖియైన సోదరుని ప్రేమతో ముద్దిడుకొని, పరమానందముతో వీరభటులందరి క్షేమము నడిగెను.

The overwhelmed monarch saluted *Taraka,* hugged the prince and kissed his brother fondly, and enquired the army of their welfare.

- वातोर्मी -

५२. पूर्वाह्णेऽसावगमद्राजधानीमानन्दाम्भोधिनिमग्नो महीशः ।
पौरैश्शश्वज्जयतूर्यैस्समन्तात् स ब्रह्मक्षत्रियसोदर्य ऐडि ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- पूर्वाह्ण इति :- असौ महीशः सार्वभौमः, आनन्दाम्भोधौ आनन्दसागरे निमग्नस्सन्, पूर्वाह्णे दिनपूर्वभागे, राजधानीं मुख्यनगरीम्, अगमत् जगाम, ब्रह्मणा तारकेन, क्षत्रियेण राजकुमारेण, सोदर्येण अनुजेन सह वर्तत इति स ब्रह्मक्षत्रियसोदर्यः, सः नृपतिः, पौरैः, पुरजनैः, समन्तात् सर्वत्र, जयतूर्यैः जयनादैः, शश्वत् मुहुर्मुहुः, ऐडि ऐड्यत।

स सार्वभौमः पूर्वाह्णसमये स्वराजधानीं परमानन्देन प्राविशत्, तदनन्तरं पौराः तं सार्वभौमं द्विजकुमारं तारकं क्षत्रियकुमारं राजानुजञ्च मुहुर्मुहुरुच्चैर्जयनादैरस्तुवन्।

- वातोर्मीवृत्तलक्षणम् -

''म-भ-त-ग-गाः गणाः, चतुर्षु सप्तसु यतिः।

తా॥ ఆ సార్వభౌముడు సంతోషముగ, పూర్వాహ్ణమందే తన రాజధానిని ప్రవేశించెను. అంత పురజనులందరును జయనాదములతో మాటిమాటికి, తారక రాజకుమారులను, సార్వభౌముని సోదరుని గూడ గొనియాడిరి.

Before noon they all reached the capital of the kingdom amongst the cheers of the people who hailed *Taraka* and the prince and the monarch's brother.

- शिखरिणी -

५३. बहुश्रेयान्कालोचितसकलकृत्यान्यवनिपः
समाप्याऽसौ सिंहासनमधिवसन् सभ्यनिवहम् ।
बभाणेत्थं यूयं श्रुणुत परिषद्या मम वचो
विलोक्येतामेताविह भरतवर्षोद्भवमणी ॥

व्या :- बहुश्रेयानिति :- बहूनि श्रेयांसि यस्य सः बहुश्रेयान्, बहु शुभान्वितः, असौ अवनीपः सार्वभौमः, कालोचितानि सकलानि कृत्यानि तत्कालार्हकर्मकलापं, समाप्य निर्वर्त्य, सिंहासनं सिंहपीठम् अधिवसन् अधितिष्ठन्, ''उपान्वध्याङ्वसः'' इति कर्मत्वे द्वितीया, सभ्यनिवहं सामाजिकसमूहम्, उद्दिश्य, एवम् इत्थं, बभाण

In Public domain. Digitization Muthulakshmi Research Academy

अवोचत्, परिषदि सभायां तिष्ठन्तीति परिषद्याः सभ्याः, भोस्सभासदः। यूयं भवन्तः, मम वचः मद्वचनं, शृणुत आकर्णयध्वम्, इह अत्र, भरतवर्षोद्भवमणी रत्नसमानौ भारतवर्षसञ्जातौ, एतौ द्विजराजकुमारौ, विलोक्येतां दृश्येताम्।

तत्कालोचितानि कार्याणि निर्वर्त्य, स सार्वभौमः सभायां सिंहासनमधिष्ठाय, सर्वान् सामाजिकान् वीक्ष्य, एवमवादीत्, भोस्सामाजिकाः । मद्वाक्यानि शृण्वन्तु भवन्तः, भारतरत्ने एतौ द्विजराजकुमारौ पश्यत ।

- शिखरिणीवृत्तलक्षणं पूर्वमेवोक्तम् -

తా॥ సకల శ్రేయస్సులతో గూడిన యా సార్వభౌముడు త్వరగా తత్కాలోచితములగు కార్యములను నెరవేర్చుకొని, సభనుజేరి, సింహాసనము నలంకరించి, సామాజికులనుగాంచి, ఓ సభాసదులారా ! నా మాటలను మీరు వినుడు. ఇప్పుడీ సభలోనున్న వీరిరువురును భారతవర్ష రత్నములు, ద్విజరాజకుమారులు, వీరిని జూడుడు.

The monarch, the man of moral merit, on timely finishing the scheduled actions, reached the court, sat on the throne and addressed the council thus- " Greetings to you all, now listen , these two young men , this Brahmin boy and this prince are the two precious stones of *Bharatavarsha*. Look at them.

- वैश्वदेवी -

५४. अष्टाविंशत्यक्षौहिणीद्वेषिसेनां हत्वाऽस्मद्राज्यं सोदरं रक्षतस्स्म ।
आभ्यां कः कार्योऽस्माभिरद्योपचारः किं किम्वुक्तं सत्पार्षदा धर्मशास्त्रैः॥

व्या :- अष्टाविंशतीति :- एताविति पूर्वश्लोकेनान्वयः, एतौ वीरवरौ, अष्टाविंशत्यक्षौहिणम् अष्टाविंशतिसङ्ख्याकाक्षौहिणीसहितां द्वेषिसेनां शत्रुसैन्यं, हत्वा नाशयित्वा, अस्मद्राज्यम् अस्मदीयं राष्ट्रं, सोदरं मद्भ्रातरं च, रक्षतस्स्म अरक्षताम्, अद्य इदानीम्, अस्माभिः, आभ्यां एताभ्यां वीरवराभ्यां, उपचारः प्रत्युपकारः

In Public domain. Digitization Muthulakshmi Research Academy

पूजादिकमित्यर्थः, कः, कार्यः कर्तव्यः, हे सत्पार्षदाः पूज्यसामाजिकाः। धर्मशास्त्रैः किं किमु उक्तं कथितं, भवन्तो ब्रुवन्तु।

भोः पार्षदाः ! एतौ वीरकुमारौ अष्टाविंशत्यक्षौहिणीसहितां शत्रुसेनां निहत्य, अस्मद्राज्यं मत्सोदरं च ररक्षतुः, एतादृशयोर्वीरयोरद्यास्माभिर्विधेया अपचितिः किं भवेत्, एतद्विषये धर्मशास्त्रेषु किं वर्णितम्। भवन्तो निश्चित्य वदन्तु।

- वैश्वदेवीवृत्तलक्षणम् -

''पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ।''

म-म-य-याः गणाः पञ्चसु सप्तसु यतिः।

తా॥ ఓ సామాజికులారా ! వీరిరువురును ఇరువది యక్షౌహిణులతో కూడిన శత్రుసైన్యమును రూపుమాపి మన రాజ్యమును కాపాడిరి. నా సోదరుని రక్షించిరి. వీరికిప్పుడు మనము కావింపదగిన సత్కారమేమి? ఎట్టిది? ఇట్టివారిని సత్కరింప ధర్మశాస్త్రములు ఏమనుచున్నవి. మీరు నిర్ణయించి చెప్పుడని పలికెను.

Hey dear members of the council! These two young men fought with our enemy who have 20 strong *akshauhinas*. (Each *akshauhina* comprises 21,870 chariots and elephants; 65,610 horses; 109,350 infantry) and have wiped them out and thus saved our kingdom and my younger brother. How can we reward them? According to our jurisprudence how do we pay our tribute to them?

- शुद्धविराट् -

५५. स्यात्तज्जन्म सदाप्यनर्थकं यस्मिन्नास्ति कृतज्ञता नरे ।
यः प्रीणीत महोपकारिणं स श्लाघ्येत समस्तसज्जनैः ।।

व्या :- स्यादिति :- यस्मिन् नरे मानवे, कृतं जानातीति कृतज्ञः, तस्य भावः कृतज्ञता, कृतज्ञताबुद्धिः नास्ति न भवति, तस्य जन्मापि जननमपि, सदा सर्वदा, अनर्थकं निष्प्रयोजनं, स्यात् भवेत्, यः जनः, परोपकारिणं परोपकार

In Public domain. Digitization Muthulakshmi Research Academy

परायणं पुरुषं, जनं, प्रीणीत तोषयेत्, सः पुरुषः, समस्तसज्जनैः सर्वैस्सत्पुरुषैः श्लाघ्येत श्लाघनीयो भवेत्।

यः मानवः कृतज्ञताशून्यहृदयो भवति तस्य जन्म निरर्थकमेव भवेत्, यः कृतज्ञस्सन् पूर्वोपकारिणः प्रत्युपकारमाचरेत् स सर्वैरपि सज्जनैः संस्तूयेत।

- शुद्धविराड्वृत्तलक्षणम् -

''म्सौज्गौ शुद्धविराडिदं मतम्''
म-स-ज-गाः गणाः पादान्ते यतिः।

తా॥ పరోపకారమును మరచిన వాని జీవితము నిష్ఫలము. ఎవ్వడు కృతమును గుర్తించి, యా యుపకారికి దిరిగి యుపకారమాచరించునో వానిని సత్పురుషులు సర్వదా శ్లాఘింతురు.

It's a worthless life if someone is not obliged to those who help them out in their hardships. Repaying them duly is appreciated by noble ones.

- अनुष्टुप् -

५६. भगवन्तं नित्यतृप्तं जीवन्मुक्तं द्विजोत्तमम्
कथमेतं तोषयेयं नश्वरैहिकवैभवैः ॥

व्या :- भगवन्तमिति :- भगः अस्य सन्तीति भगवान्, तं भगवन्तं षड्गुणैश्वर्यसम्पन्नम्। ''ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः, ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा'', अथवा ''उत्पत्तिं च विनाशं च भूतानामागतिं गतिम्, वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति''। नित्यतृप्तं नित्यसन्तुष्टम् पूर्णकाममित्यर्थः, जीवन् सन्मुक्तः जीवन्मुक्तः तं, मुक्तपुरुषम् एतं द्विजोत्तमम् अमुं ब्राह्मणश्रेष्ठं तारकं, नश्वराणि नाशशीलानि ऐहिकानि इहलोकसम्बन्धीनि यानि वैभवानि ऐश्वर्याणि तैः, कथं तोषयेयं सन्तुष्टं करिष्यामि, अहं न जाने।

In Public domain. Digitization Muthulakshmi Research Academy

असौ ब्राह्मणोत्तमस्तारकः षड्गुणैश्वर्यसम्पन्नः, पूर्णकामः, जीवन्मुक्तश्च, एतादृशम् अमुं नश्वरैः भौतिकैर्वस्तुभिः कथमानन्दयेयम् अहं न जाने।

తా॥ ఈ తారకుడు సకలైశ్వర్య సంపూర్ణుడైన భగవానుడు, పూర్ణకాముడు, నిత్యతృప్తుడు, జీవన్ముక్తుడు, మహానుభావుడయిన ఈ బ్రాహ్మణశ్రేష్ఠునకు ఏమిచ్చి ఆనందింపజేయుదును, నశ్వరములు భౌతికములునగు నీ సంపదలు ప్రత్యుపకారము నకు సమానములు కావుగదా !

This man *Taraka* is opulent; in fact he is god himself. He is ever content, he is a *jeevan mukta*. How can I ever repay and please him? All the material things I can offer him are ephemeral and don't match his help.

- उपजातिः -

५७. समस्तविद्यानिधिरिद्धकीर्तिरखण्डतेजा भुवनोपकारी ।
इतःपरं ब्राह्मणवर्य एष भवेन्मम प्राणसखो महात्मा ॥

व्या :- समस्तेति :- समस्तानां सर्वासां विद्यानां निधिः आकरः, इद्धा कीर्तिः यस्य सः प्रकाशमानयशाः, अखण्डम् अनन्तं तेजः प्रतापः महिमा यस्य सः परिपूर्णतेजोरूपः भुवनोपकारी लोकानामुपकर्ता, महात्मा महानुभावः, एष ब्राह्मणवर्यः ब्राह्मणोत्तमः अयं तारकः, इतःपरम् अद्य प्रभृति, मम मे, प्राणानां सखा प्राणसखः प्राणप्रियः प्रियमित्रं, भवेत् स्यात्।

सकलविद्याविशारदः परोपकारपरायणः यशस्वी तेजस्वी महात्मा अयं तारकः अद्य प्रभृति मम प्राणसखः प्रियमित्रं भवेत्।

- उपजातिवृत्तलक्षणं पूर्वमेवोक्तम् -

తా॥ బ్రాహ్మణశ్రేష్ఠుడయిన ఈ తారకుడు, సకలవిద్యావిశారదుడు, పరోపకార పరాయణుడు, కీర్తిమంతుడు, తేజోవంతుడు మహానుభావుడు. నేటినుండి ఇతడు నాకు బ్రాహ్మణమిత్రుడైయుండును.

In Public domain. Digitization Muthulakshmi Research Academy

The best among Brahmins, a scholar in all branches of study, a benefactor, famous, bright and brilliant, a great soul is *Taraka*. He now has become my bosom friend.

- वितानम् -

५८. इतःपरं ब्राह्मणस्स्यादहिंसनीयः प्रजासु ।
मदीयराज्ये विदध्यात् करं न तस्यैव वृत्त्याः ॥

व्या :- इत इति :- इतःपरम् अद्यप्रभृति, मदीयराज्ये अस्मद्राष्ट्रे प्रजासु जनेषु, ''प्रजा स्यात्सन्ततौ जने'' इत्यमरः। ब्राह्मणः विप्रः, अहिंसनीयः अवध्यः, स्यात् भवेत्, तस्य एव ब्राह्मणस्यैव, वृत्त्याः वृत्तेः ''वृत्तिर्वर्तन जीवन'' इत्यमरः, न विदध्यात् न विदधीत।

अद्यारभ्य मद्राज्ये ब्राह्मणः सापराधोऽपि न हन्तव्यः, इत आरभ्य ब्राह्मणात् स्ववृत्तेः करं न स्वीकुर्यात्।

- वितानवृत्तलक्षणम् -

''वितानमाभ्यां यदन्यत्'' समानिका प्रमाणिकाभ्यामन्यद्वितानमित्यर्थः।
र-ज-ग-लास्समानिका। ज-र-ल-गाः प्रमाणिका। वितानस्यतु पूर्वार्धे
ज-र-य-र-र-गाः गणाः। उत्तरार्थमेवमेवोन्नेयम्

తా॥ నేటినుండి ఆ రాజ్యమున బ్రాహ్మణుని హింసింపరాదు. ఆతడు గావించు వృత్తికి సుంకము విధింపరాదు.

From this day no Brahmin shall be harmed in anyway, and no tax shall be levied on his income.

- अनुष्टुप् -

५९. आचन्द्रतारकं विन्देद्वंश एतदुपक्रमम् ।
मद्भागधेये द्वात्रिंशत्सुवर्णान् प्रतिवासरम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- आचन्द्रेति :- वंशे कुले, एतदुपक्रमम् एतदारभ्य प्रतिवासरं प्रतिदिनं, मद्भागधेये मद्भाग्ये, द्वात्रिंशत्सुवर्णान् द्वात्रिंशत्सङ्ख्याकसुवर्णदीनारान्, आचन्द्रतारकं चन्द्रश्च तारकाश्च यावत्कालं तिष्ठन्ति तावत्कालं, विन्देत् लभेत।

తా॥ నేటినుండి నా కులమందు, ప్రతిదినము ముప్పదిరెండు బంగారు నాణెములు చొప్పున నా ధనమునుండి యీ చంద్రతారకమితడు పొందును.

As many as thirty-two gold coins each day shall be given to this man from our family as long as there is moon and stars.

- उपजातिः -

६०. सर्वस्वतन्त्रो बहुसाधुकर्मा धर्माधिकार्येष सखा मदीयः ।
निरङ्कुशो ब्रह्मकुलाग्रगण्यः राज्येऽखिले मे विहरेदजस्रम् ॥

व्या :- सर्वस्वतन्त्रेति :- सर्वेषु कर्मसु स्वतन्त्रः स्वतन्त्रबुद्धिः। बहूनि साधूनि कर्माणि यस्य सः अनेकोत्तमकार्यकर्ता, ब्रह्मकुलाग्रगण्यः ब्राह्मणवंशमुख्यः, एषः अयं, मदीयः सखा मम वयस्यः, धर्मेषु धर्मकार्येषु अधिकारः अस्यास्तीति धर्माधिकारी प्राड्विवाकस्सन्, निरङ्कुशः अप्रतिहतगतिः, अखिले सर्वस्मिन्, मे मम, राज्ये राष्ट्रे, अजस्रम् अनवरतं, विहरेत् सञ्चरतु।

सर्वतन्त्रस्वतन्त्रः साधुबुद्धिः सत्कार्यकर्ता विप्रमुख्यः मत्सखः अयं तारकः मद्राज्ये धर्माधिकारी भवतु। मद्राज्ये सर्वत्र सर्वदा अप्रतिहतगतिस्सञ्चरतु।

- उपजातिलक्षणन्तूक्तमेव -

తా॥ ఈ తారకుడు విప్రకులముఖ్యుడు, స్వచ్ఛన్దస్వభావుడు, సాధుబుద్ధి, సత్కర్మాచరణశీలుడు. నాకు ప్రియమిత్రుడు. ఈతడు నా రాజ్యమున ధర్మాధికారిగ నుండును. మరియు నా రాజ్యమందంతట ఎల్లప్పుడును ఏయడ్డు ఆకయు లేక సంచరించవచ్చును.

He is the most important person among Brahmins and is a man of free will. This dear friend of mine shall be the

In Public domain. Digitization Muthulakshmi Research Academy

judge in my kingdom from this day. He is free to visit all places without any restriction.

- वितानम् -

६१. दिवस्पृथिव्यावजस्रं प्रशासितुं शक्त एषः ।
गुणोज्ज्वलः क्षत्त्रियेन्द्रो भवेन्मदीयात्मबन्धुः ॥

व्या :- दिवस्पृथिव्याविति :- द्यौश्च पृथिवी च दिवस्पृथिव्यौ स्वर्लोकभूलोकौ, अजस्रम् अनवरतं, प्रशासितुं पालयितुं, शक्तः समर्थः, एषः असौ, गुणोज्ज्वलः शौर्यवीर्यादिगुणगणविराजमानः क्षत्रियेन्द्रः राजश्रेष्ठः, मदीयात्मबन्धुः मम सन्निहितः बन्धुः भवेत् भवतु।

भूलोकस्वर्गलोकावुभावपि पालयितुं समर्थः सकलसद्गुणसमुपेतः अयं राजकुमारः मम प्राणबन्धुर्भवतु।

- वितानवृत्तलक्षणन्तूक्तम् -

తా॥ ఈ రాజన్య కుమారుడు సద్గుణ శ్లాఘనీయుడు భూస్వర్గముల రెండింటిని పాలింపశక్తి గలవాడు. ఈతడు నాకు ఆత్మబంధువగును.

This prince is efficient to rule the earth and heaven as well. He will be my soul mate.

- मौक्तिकमाला -

६२. भारतवर्षं तदखिलमेषोऽद्यप्रभृति स्वैरमुपभुनक्तु
इत्थमुदित्वा स निजकुमार्या आगमनं संसदि विभुरैषीत् ।

व्या :- भारतवर्षमिति :- एषः राजकुमारः, अद्यप्रभृति इत आरभ्य, तत् प्रसिद्धम्, अखिलं सर्वं, भारतवर्षं भारतभूमिं, स्वैरं स्वेच्छया, उपभुनक्तु अनुभवतु, इत्थम् एवं, संसदि सभायाम्, उदित्वा उक्त्वा, सः विभुः सार्वभौमः, निजकुमार्याः स्वपुत्र्याः, आगमनम् ऐषीत् ऐच्छत्।

In Public domain. Digitization Muthulakshmi Research Academy

अद्य प्रभृत्यसौ राजकुमारः सकलमपि तद्भारतवर्षं स्वेच्छया परिपालयतु, इत्युक्त्वा स्वपुत्त्रीं सभामानेतुमभिललाष।

- मौक्तिकमालावृत्तलक्षणमुक्तम् -

తా॥ నేటినుండి ఈ రాజకుమారుడు సర్వభారతవర్షమునకు అధిపతియై స్వేచ్ఛగా సర్వసుఖములను అనుభవించుగాక ! అని సభలో పలికి తన కుమారుని సభలోనికి వచ్చునట్లు ఆజ్ఞయిడెను.

"This prince, as my successor shall be the monarch of Bharata and I bless him with all the happiness in the world", saying this king gestured to usher in his daughter.

- प्रहर्षिणी -

६३. जङ्घालो नृपतिभटो न्यवेदयत्तां राजाज्ञां प्रमदकरां पतिंवरायै ।
पद्माक्षी जलदकचा सुवर्णगात्री सोत्कण्ठा स्म भवति सा विराट्कुमारी ।।

इति ब्रह्मश्रीमदज्ञाडादिभट्टनारायणदासमहाकविविरचिते तारकाख्ये महाकाव्ये चतुर्थस्सर्गः ।।

व्या :- जङ्घाल इति :- जङ्घालः जाङ्घिकः, त्वरितगमनसमर्थ इत्यर्थः, नृपतिभटः राजसेवकः, प्रमदकराम् आनन्ददायिनीं तां राजाज्ञां राजादेशं, पतिंवरायै स्वयंवरायै, स्वयमेव पतिं या वृणोति सा पतिंवरेत्यर्थः, राजकुमार्यै नृपपुत्त्रिकायै न्यवेदयत् निवेदयामास, पद्मे इव अक्षिणी यस्यास्सा पद्माक्षी, सरसिजनयना, जलदेन अम्बुदेन तुल्यः कचः केशपाशः यस्यास्सा जलदकचा, नीलवेणी, सुवर्णं शोभनवर्णम् अथवा काञ्चनतुल्यं गात्रं देहः यस्यास्सा सुवर्णगात्री कनकाङ्गी, सा विराट्कुमारी सार्वभौमपुत्री, सोत्कण्ठा इष्टवस्तु सन्दर्शनाभिलाषिणी, भवति स्म बभूव, भूते लट्, लट्स्मे इति पाणिनिः।

In Public domain. Digitization Muthulakshmi Research Academy

शीघ्रगामी कश्चन राजभटः त्वरया तत्र गत्वा, पतिंवरां राजकुमारीमवलोक्य, सार्वभौमादेशं तस्यै निवेदयामास, नलिनाक्षी नीलवेणी कनकाङ्गी सा सुदती सभायां तं राजस्यकुमारं द्रष्टुमुत्सुका बभूव।

- प्रहर्षिणी लक्षणमुक्तम् -

తా॥ రాజభటుడొకడు అతివేగముగ రాజపుత్రికడకేగి, ఆనందదాయకమైన సార్వభౌముని ఆజ్ఞను ఆమెకు వినిపించెను. సుందరాంగియు సువిశాలనయనయు సునీలవేణియునగు ఆ సుదతి కాబోవు పతిని జూచు కోరికతో నా సభకేగ సమకట్టెను.

One of the monarch's servants quickly rushed to the princess and conveyed her, her father's message. The girl with broad-eyes, black hair and beautiful teeth who was eager to look at her would be husband was ready to set out to the court at once.

इति ब्रह्मीभूषणब्रह्मश्रीराम्भट्ललक्ष्मीनारायणशास्त्रिविरचितायां भावार्थदीपिकाख्यायां व्याख्यायां चतुर्थस्सर्गः

In Public domain. Digitization Muthulakshmi Research Academy

तारके पञ्चमस्सर्गः

प्रहर्षिणी

१. पश्यन्ती नृपतनया सभां गवाक्षाद्ध्यायन्ती पितृवचनप्रयोजनं सा ।
मात्राम्भोरुहवदना विभूष्यमाणा शोभाढ्या त्वरितमनोरथौहतेत्थम् ॥

व्या :- पश्यन्तीति :- सा नृपतनया राजकुमारी, गवाक्षात् वातायनात्, सभां परिषदं, पश्यन्ती वीक्षमाणा, पितृवचनस्य जनकादेशस्य, प्रयोजनं निमित्तं, ध्यायन्ती चिन्तयन्ती, मात्रा जनन्या, विभूष्यमाणा अलङ्क्रियमाणा, अम्भोरुहं पद्ममिव वदनं मुखमण्डलं यस्यास्सा, शोभाढ्या कान्तिमती, त्वरितमनाः त्वरितसङ्कल्पा सती, इत्थं वक्ष्यमाणरीत्या, औहत आलोचयामास।

पद्मानना प्रभावती पतिंवरा सा राजपुत्री गवाक्षरन्ध्रेभ्यः राजसभामालोकयन्ती, जनकाज्ञाप्रयोजनं किं भवेदिति मनसि विचिन्तयन्ती, स्वमात्रा अलङ्क्रियमाणा त्वरितमेवं चिन्तयामास।

- प्रहर्षिणीवृत्तलक्षणन्तूक्तमेव -

सर्गान्ते वृत्तभेदः, सर्गेऽस्मिन् सर्वाण्यपि प्रहर्षिणीवृत्तान्येव।

తా॥ భటుడు చెప్పిన మాటలను విని, ఆ రాజకుమారి కిటికీ కన్నములనుండి రాజసభను జూచుచూ, తన తండ్రి తన్ను సభకేల రమ్మనెనో దానికి కారణము ఏమైయుండునో అని తన మనస్సులో ఊహించుకొనుచు, తన తల్లి తన్నలంకరించు చుండ దివ్యకాంతులతో వెలుగుచు, నీ క్రిందివిధముగ తొందరగా నాలోచించు కొనుచుండెను.

On hearing the servant, the princess looked at the king's court through a window from her palace. The maiden with lustrous glamour was curious to know her father's intention of seeing her immediately as her mind wandered while mother was decking her up.

In Public domain. Digitization Muthulakshmi Research Academy

२. स्यात्तच्चेज्जगति तथाऽहमेव धन्या किं देवः श्रितजनलालसां न देयात् ।
माता मे सपदि समीड्य तद्यशांसीदृक्साऽहन्यहनि करोति कर्णपर्व ॥

व्या :- स्यादिति :- तत् तथा स्याच्चेत्, मत्पिता मां राजकुमाराय दास्यति यदि, जगति लोके, अहमेव, धन्या सार्थकजीविता, भवेयं स्याम्, देवः ईश्वरः, श्रितजनलालसां भक्तजनमनोरथं न देयात्किं न दद्यात्किम्, दद्यादेव, माता मज्जननी सपदि सद्यः, अहनि अहनि प्रतिदिनं, तद्यशांसि तद्राजपुत्रस्य कीर्तीः, ईदृक् इत्थं, समीड्य स्तुत्वा, मे मम, कर्णपर्व श्रोत्रानन्दं करोति विदधाति।

यदि मत्पिता मां तस्मै राजकुमाराय दद्यात्तदा मज्जीवितं सार्थकं भवेत्, भक्तजनवत्सलः भगवान् आश्रितमनोरथं न पूरयति किम्? सर्वथा पूरयिष्यत्येव, मज्जनन्यपि नित्यं तद्राजकुमारस्य यशोविशेषान् वर्णयित्वा मामानन्दयति, मन्मातुरेतदभिमतमेव।

తా॥ నా తండ్రి నన్నారాజకుమారునకిచ్చి వివాహముగావించినచో నా జీవితము సార్థకమగును. భక్తవత్సలుడయిన భగవానుడు ఆశ్రితుల మనోరథముల నెరవేర్పకుండునా? తప్పక నెరవేర్చును. నా తల్లియు నిత్యమా రాజకుమారుని గుణగణములను కీర్తి విశేషములను వర్ణించుచు గొనియాడుచు నా చెవులలో నమృతమును బోయుచున్నది. దీనినిబట్టి మా తల్లికీసంబంధము సమ్మతమైనట్లు కనబడుచున్నది.

If my father gives my hand in marriage to that prince my life will be fruitful. God is kind to his ardent devotees; will not he grant their wishes? I am sure he will. My mother has been eulogising the prince's glory, character and virtues that are sweet to my ears. I can infer that she is all for this proposal.

३. तस्मै मे स्पृहयति मानसं मदीयं लावण्यं भवति हितं न किं विराजे ।
भाग्यायैव मम स आगतः कृतार्थः मत्पित्रेऽरुचदधुना तदीयमैत्री ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- तस्मायिति :- मे मम, मानसं मनः, तस्मै राजकुमाराय, स्पृहयति काङ्क्षते, "स्पृहेरीप्सितः" इति सम्प्रदानत्वे चतुर्थी, मदीयं मामकीनं लावण्यं सौन्दर्यविशेषः विराजे राजपुत्त्राय, हितम् इष्टं, न भवति किं न भवेत्किम्? हितं भवत्येवेत्यर्थः "मुक्ताफलेषुच्छायायास्तरलत्वमिवान्तरा, प्रतिभाति यदङ्गेषु तल्लावण्य मिहोच्यते" इति लावण्यनिर्वचनम्। कृतार्थः कृतकृत्यः, सः राजपुत्त्रः, मद्भाग्यायैव मद्भागधेयायैव, आगतः आगतवान्, अधुना इदानीं, तदीयमैत्री राजपुत्त्रसख्यं मत्पित्रे मञ्जनकाय, अरुचत् अरोचत।

मन्मनः तद्राजपुत्त्रमेव काङ्क्षते, मल्लावण्यं तस्याभिमतं भवेदित मन्ये, मद्भाग्यबलेनैव स राजपुत्त्रः आगतः, तत्सख्यं च मञ्जनकाय प्रीतिपात्रमभवत्।

తా॥ నా మనస్సు ఆ రాజపుత్రునే గోరుచున్నది. నా లావణ్యమాతనికి రుచింపకుండునా? తప్పక రుచించునని నేననుకొందును. నా భాగ్యము ఫలించుట చేతనే ఆతడిటకు వచ్చెను. అతని మైత్రి నా తండ్రి కెంతయో రుచించెను. నా కోరిక తప్పక నెరవేరును.

My heart longs for this prince. Won't he be smitten by my beauty? I feel strongly that he will. It is my luck that brings him here. My father liked his friendship. All the things sound favourable.

४. तद्वीर्यं तदमलराजवर्चसं तत्सौन्दर्यं तदभिनवं वयः प्रशस्तम् ।
तद्धैर्यं तदतुलकीर्तिविभवं का लोकित्वा सपदि पतिंवरा न मुह्येत् ॥

व्या :- तद्वीर्यमिति :- तत् प्रसिद्धं वीर्यं बलं, तत् अमलं निर्मलम्, राजवर्चसं राजतेजः, तत् सौन्दर्यं रुचिरत्वं, प्रशस्तं श्रेष्ठं, तत् अभिनवं नूतनं, वयः, तत् ध्यैर्यं धीरताम्, अतुलम् अनुपमं, तत् कीर्तिविभवं यशस्सम्पदं, लोकित्वा आलोक्य, पतिंवरा का स्वयंवरा का कन्या, सपदि सद्यः, न मुह्येत् मोहमपि प्राप्नुयात्। सर्वा पतिंवराः कन्या मुह्येयुरेवेत्यर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

तद्राजकुमारस्य प्रख्यातं बलं निष्कल्मषं राजवर्चसं निरुपमानं सौन्दर्यं निस्तुलमभिनवं वयः अनल्पं ध्यैर्यम् अतुलं यशश्च दृष्ट्वा पतिंवरा का कन्या मोहं न प्राप्नुयात्।

తా॥ ఆ రాజకుమారుని అమోఘమైన ఆ బలమును, సాటిలేనియా రాచఠీవిని, చక్కని ఆ అందమును, నూతనమైన ఆ యౌవనమును, సాటిలేని ఆ ధైర్యమును, శ్రేష్ఠమైన ఆ కీర్తిని, జూచిన పిమ్మట స్వయంవరం అగు ఏ కన్యక వానిని వరింపదు? తప్పక వరించును. అందుచే నాకీ కోరిక కలుగుటలో తప్పులేదు.

He has all the qualities every bride would look for in a prospective suitor – amazing valour, unmatched royal splendour, the prime age, inimitable self-reliance and fame. Hence it is fair if I have a strong desire for him.

५. नूनं यत्प्रभृति मया विराडलोकि स्वान्तं मे परितपतीदृशं तदादि ।
जीवेयं यदि कृपया स उद्वहेन्मां किं जाने परहृदयं सदा परोक्षम् ॥

व्या :- नूनमिति :- यत्प्रभृति यदादि, मया विराट् राजकुमारः, आलोकि दृष्टः, तदादि तत्प्रभृति, मे मम, स्वान्तं मनः ईदृशम् एवं रीत्या, परितपति सन्तापमनुभवति, सः राजपुत्त्रः, कृपया दयया, माम्, उद्वहेद्यदि परिणयेच्चेत्. अहं, जीवेयं जीवानि, अन्यथा मरिष्यामीति भावः, नूनं ध्रुवं न जाने किं भवेदहं न जानामि, परहृदयं परेषां मनः, सदा सर्वदा, परोक्षम् अप्रत्यक्षं खलु अर्थान्तरन्यासालङ्कारः।

తా॥ ఆ రాజకుమారుని జూచిననాటి నుండియు నా మనస్సిట్లే పరిపరి విధముల చింతాక్రాంతమగుచున్నది. దయదలచి ఆతడు నన్ను పరిగ్రహించెనా నేను బ్రతుకగలను. లేనిచో నేను జీవింపజాలను. వాని సంకల్పమెట్లున్నదో నాకెట్లు తెలియును? పరుల హృదయములందలి భావములను గ్రహించుట శక్యమగునా? కాదు.

Ever since I saw him, my heart pounds. If he kindly consents I will be alive, else I will be dead. But, how would I know what is on his mind? It is impossible to have insight into other's minds.

In Public domain. Digitization Muthulakshmi Research Academy

६. इत्थं सा बहु भवितव्यमूहमाना वेषेणाचिरमबलाञ्जसा कृतेन ।
निस्त्रिंशीकृतसहजस्फुरत्कटाक्षैः व्यच्छैत्सीत्प्रतियुवगाढधैर्यबन्धम् ।।

व्या :- इत्थमिति :- सा अबला राजकन्या, इत्थम् एवं, बहुअधिकं यथातथा, भवितव्यं भाव्यं कार्यमुद्दिश्य, ऊहमाना तर्कयन्ती, अचिरं शीघ्रम्, अञ्जसा वेगेन, कृतेन निर्मितेन, वेषेण वस्त्रधारणद्याकल्पेन, निस्त्रिंशः खड्गः अनिस्त्रिंशाः निस्त्रिंशाः कृताः निस्त्रिंशीकृताः खड्गीकृताः सहजस्फुरन्तः प्रकृत्या चपलाः ये कटाक्षाः अपाङ्गप्रसाराः तैः, खड्गरूपैरपाङ्गैरित्यर्थः, युवानं युवानं प्रतियुवं वीप्सायां यथार्थेऽव्ययीभावः, सर्वेषां यूनामित्यर्थः। गाढः दृढः यः धैर्यबन्धः धैर्यबन्धनं, तं, व्यच्छैत्सीत् - चिच्छेद। रूपकालङ्कारः -

एवं भवितव्यं चिन्तयन्ती सा राजकन्या सर्वाभरणभूषिता राजसभां प्रविवेश, तामालोक्य तत्रस्थास्सर्वे युवानः, तदीयवीक्षणाभिहताः दृढमपि स्वधैर्यं तत्यजुः, खड्गेन रज्जुबन्धनमिव तस्याः कटाक्षेण तेषां धैर्यमच्छिद्यत।

తా॥ ఆ రాజకన్యక పైతీరున తన భావిజీవితమును ఊహించుకొనుచు, సర్వాభరణభూషితయై సభామందిరమున నడుగిడెను. ఆమె చక్కదనమునకును, ఆమె కటాక్షవీక్షణములకును, సభయందలి యువకవర్గమంతయు ధైర్యమును వీడెను.

Thus contemplating about her future, the dressed up princess stepped into the king's court. The young men were awestruck by her breathtaking beauty.

७. शृङ्गार स्तरुणसभासदां तरुण्याः प्राभूद् हृद्घनधनपश्यतोहरस्सः ।
चन्द्रेशस्सरसिजलोचनां तदैषोऽहर्षीत्स्वान्तिक उपवेश्य पुत्रिकां ताम् ।।

व्या :- शृङ्गार इति :- तरुण्याः युवत्याः राजकुमार्याः सः प्रसिद्धः, शृङ्गारः शृङ्गारवेषः तरुणसभासदां यूनां सभ्यानां, हृदेव हृदयमेव घनधनम् अधिकधनं तस्य पश्यतो हरतीति पश्यतोहरः, निपुणः चोरः, प्राभूत् आसीत्, एषः चन्द्रेशः चन्द्रद्वीपाधिपः अयं सार्वभौमः, सरसिजलोचनां पद्मनयनां, तां पुत्रिकां दुहितरं, स्वान्तिके स्वसमीपे, उपवेश्य निवेश्य, अहर्षीत् ननन्द।

In Public domain. Digitization Muthulakshmi Research Academy

सभां प्रविशन्त्याः तरुण्याः तस्याः राजपुत्र्याः शृङ्गारवेषः सकलयुवजन मनोधनपश्यतोहरः चोरः अभवत्, सासर्वेषां मनांस्याचकर्ष, सार्वभौमाऽप्यागतां तां कन्यां स्वसमीपे निवेश्य परमानन्दमवाप।

తా॥ యువతియైన ఆ రాజకుమారి తన శృంగారవేషముతో అటగల యువజనుల మనోధనమును చూచుచుండగనే తస్కరించెను. యువకులందరు నామెయందాసక్త హృదయులైరి. ఆ సార్వభౌముడు సభలో ప్రవేశించిన తన కుమారిని తన దగ్గరనే కూర్చుండబెట్టుకొని మిక్కిలి ఆనందించెను.

The mesmerising, sensuous princess stole the hearts of the young ones there, in the very first sight. Such was her beauty that every young man in the court was swept off their feet and developed interest in her. The monarch made her sit close to him mirthfully.

८. वामोरूर्निजजनकेन भाष्यमाणा ह्रीभारावनतमुखीक्षणप्रसूनैः ।
सानन्दं प्रियपदपीठमर्चयन्ती पित्रेऽदात्प्रतिवचनानि मन्दमन्दम् ॥

व्या :- वामोरूरिति :- वामौ सुन्दरौ ऊरू यस्यास्सा वामोरूः, ''वामस्तु वक्रे रम्ये स्यात्सव्ये वामगतेऽपि च'' इति नानार्थकोशः सुन्दरी राजकन्या निज जनकेन स्वपित्रा, भाष्यमाणा सम्भाषणं क्रियमाणा सती, ह्रीभारात् लज्जाभरेण, अवनतं नम्रं मुखम् आननं यस्यास्सा, ईक्षणान्येव दृष्टयः एव प्रसूनानि पुष्पाणि, तैः, सानन्दम् आनन्देन सह, प्रियपदपीठं प्रियस्य पादपीठिकाम्, अर्चयन्ती पूजयन्ती, प्रियपादपीठं पश्यन्तीत्यर्थः, मन्दमन्दं शनैश्शनैः, पित्रे जनकाय, प्रतिवचनानि समाधानवचनानि, अदात् ददौ।

सा सुन्दरी राजकन्या सभामागत्य लज्ञावशादधोमुखी, सदृष्टिपातेन स्वप्रियपादपीठमेव पश्यन्ती, पृच्छते जनकाय शनैश्शनैः प्रतिवचनानि ददौ।

తా॥ సుందరియగు ఆ రాజకన్య సిగ్గుతో తలవంచుకొని, తన చూపులనెడు పువ్వులతో తన ప్రియుని పాదపీఠమును పూజించుచు, అనగా దానినే చూచుచు, తన తండ్రి తన్ను ప్రశ్నించుచుండ మెల్లమెల్లగా తండ్రికి సమాధానమిచ్చుచుండెను.

In Public domain. Digitization Muthulakshmi Research Academy

The blushing celestial beauty started looking at the feet of the prince admiringly. Each of her glances was a flower offered at the feet of her beloved. She replied slowly to her father's enquiries in a mild tone.

९. वामाक्षीं नृपतिकुमारिकां सुगुल्फां रम्योष्ठीं स्मितवदनां स सावहित्थाम्।
राजन्यो भृशमखिलाङ्गशोभनां तामीक्षित्वा सपदि विमोहितो बभूव ॥

व्या :- वामाक्षीमिति :- सः राजन्यः स राजकुमारः, वामाक्षीं वामनयनां, सुन्दरनेत्रामित्यर्थः। शोभनौ गुल्फौ यस्यास्सा तां, गूढगुल्फामित्यर्थः, ''तद्ग्रन्थी घुटिके गुल्फौ'' इत्यमरः, रम्यौ रमणीयौ ओष्ठौ यस्याः तां, बिम्बोष्ठीमित्यर्थः, स्मितवदनां स्मयमानमुखां, सावहित्थाम् अवहित्था आकारगोपनं तया सहितां, ''अवहित्थाकारगुप्ति'' रित्यमरः। अखिलाङ्गेषु सर्वावयवेषु शोभनां शोभमानां, सर्वाङ्गसुन्दरीमित्यर्थः, तां नृपतिकुमारिकां राजपुत्रीम्, ईक्षित्वा विलोक्य, सपदि सद्यः, भृशम् अत्यन्तं, विमोहितो बभूव मुमोह।

रमणीयनयनां गूढगुल्फां बिम्बोष्ठीं दरहसितवदनां ह्रीमतीं सर्वाङ्गसुन्दरीं तां राजपुत्रीमालोक्य स राजकुमारः सद्य एव मोहपरवशो बभूव।

తా॥ ఆ రాజకన్య కన్నులు మిక్కిలి చక్కనివి. ఆమె చీలమండలు పాదములతో కలిసి గూఢముగనున్నవి. ఆమె పెదవులు దొండపండువలె నెఱ్ఱగానున్నవి. ఆమె ముఖము చిరునవ్వుతో కలకలలాడుచున్నది. సిగ్గు ఆమెకలంకారమైయున్నది. ఆమె సర్వాంగసుందరి. అట్టి ఆ రాజకన్యను చూడగానే ఆ రాజపుత్రుడు వెంటనే మోహసముద్రమున మునిగెను. ఆమెయందభిలాషగలవాడయ్యెను.

The princess had beautiful captivating eyes. Her ankles and feet were concealed. Her smiling face was bright and blooming with red lips. The blush was an additional ornament that decked her. Looking at the lady with the beautiful physique, the prince fell in the ocean of love and instantly developed a deep desire for her.

In Public domain. Digitization Muthulakshmi Research Academy

१०. मित्रस्य प्रियतमभावपद्धतिं तां सर्वज्ञो झटिति स तारको विदित्वा ।
ईक्षित्वा परमसखाय तिष्ठमानां प्राहर्षीत् क्षितिपसुतां सरोजनेत्राम् ॥

व्या :- मित्रस्येति :- सर्वं जानातीति सर्वज्ञः विदितवेदितव्यः सः तारकः, मित्रस्य वयस्यस्य, तां प्रियतमाम् अतिप्रियां, भावपद्धतिम् अभिप्रायसरणिं, झटिति शीघ्रं, विदित्वा विज्ञाय, परमसखाय प्रियमित्राय, तिष्ठमानाम् आशयप्रकाशनार्थे तिष्ठतेरात्मनेपदम्, परमसखस्य सम्प्रदानत्वम्, प्रियवयस्यमुद्वोढुमुद्युक्तामित्यर्थः। सरोजनेत्रां पद्माक्षीं, क्षितिपसुतां राजपुत्रीम्, ईक्षित्वा आलोक्य, प्राहर्षीत् परमानन्दमवाप।

सर्वज्ञस्स तारकः स्वमित्रस्याभिप्रायं विदित्वा, अनन्तरं तस्मै राजकुमारायैव स्वाशयं प्रकटयन्तीं तां राजदुहितरं विलोक्य च परमानन्दमवाप।

తా॥ ఆ తారకుడు సర్వజ్ఞుడు గావున తన మిత్రుని అభిప్రాయమున వెంటనే కనిపెట్టెను. ఆతనికొరకై అచ్చటికి రప్పింపబడి, తన యానుకూల్యమును సూచించుచున్న దివ్యసుందరియగు నా రాజపుత్రినిగూడ గాంచెను. వారి అనురాగమునకు మిక్కిలి ఆనందించెను.

Taraka, being the prince's close friend sensed his feelings. And it was evident that the summoned princess had great interest in the prospective groom. His friend's and the princess' love for each other was a matter of delight for *Taraka*.

११. उद्वोढुं प्रभवसि चक्रवर्तिकन्यां स्त्रीरत्नं शृणु तदवश्यमाप्यमेव ।
शङ्किष्ठाः प्रियसख मात्वमार्यवन्द्येत्यत्यन्तं प्रियमभणत्स विप्रमौलिः ॥

व्या :- उद्वोढुमिति :- विप्राणां मौलिः किरीटं ब्राह्मणशिरोभूषणं, सः तारकः ''मौलिः किरीटे धम्मिल्ले'' इत्यमरः, प्रियसख । हे प्रियमित्र । त्वं भवान्, चक्रवर्तिकन्यां सार्वभौमपुत्त्रीम्, उद्वोढुं परिणेतुं, प्रभवसि योग्यः असि, शृणु आकर्णय, सा कन्या स्त्रीरत्नं नारीषु श्रेष्ठा, ''जातौ जातौ यदुत्कृष्टं तद्रत्नमिति गीयते'' इति वचनेन रत्नपदस्य श्रेष्ठत्वम्, तत् कान्तारत्नम्, अवश्यं सर्वथा,

In Public domain. Digitization Muthulakshmi Research Academy

आप्यमेव ग्राह्यमेव, ''रत्नहारी तु पार्थिवः'' इति वचनेन राजपुत्त्रेण त्वया तत्कान्तारत्नं ग्राह्यमेवेति भावः, मा शङ्किष्ठाः सन्देहं मा कुरु इयं कन्या, आर्यवन्द्या सत्पुरुषवन्दनीया, इति एवम्, अत्यन्तं प्रियं हितं वचनम्, अभणत् बभाण।

भोः प्रियवयस्य ! त्वमेवेतत्कन्यारत्नं ग्रहीतुं समर्थः, त्वं राजरत्नं, इयं कन्यारत्नं, किञ्च, इयं सन्नुता सद्वन्द्या च, शङ्कां मा कुरु, एनां गृहीष्व, इति स तारकः प्रियवचनान्यवोचत्।

తా॥ ఓయి ప్రియమిత్రమా ! ఈ చక్రవర్తి పుత్రిని వివాహమాడుటకు నీవే సమర్థుడవు. ఈమె స్త్రీలలో రత్నమే, నీవో రాజన్యశ్రేష్ఠుడవు. రత్నము రాజులకడనే యుండదగినదికదా! కావున ఏల సందేహించెదవు? ఈమె సజ్జన సంస్తవనీయ. ఉత్తమురాలు, అని ఆ తారకుడు ప్రియవచనములను పలికెను.

"My dear friend! You, the best among princes, are the most suitable groom for the monarch's daughter. All the virtuous admire and laud her. A precious stone deserves to be deposited with the kings. Hence leave no place for dithering now"- thus spoke *Taraka* sweetly.

१२. राजन्यं स्म वदति सार्वभौम इत्थं मत्कन्याद्य भरतवर्षराज्यलक्ष्म्याः ।
सापत्न्यं भृशमभिलष्यते भवादृग्जामाता मम निखिलं कुलं पुनाति ॥

व्या :- राजन्यमिति :- सार्वभौमः चक्रवर्ती राजन्यं राजकुमारम्, इत्थं वक्ष्यमाणरीत्या, वदति स्म अवदत्, अद्य इदानीं, मत्कन्या मद्दुहिता, भरतवर्षस्य या राज्यलक्ष्मीः तस्याः सापत्न्यं सपत्नीत्वं, समानः पतिः यस्यास्सा सपत्नी, तस्याः भावः सापत्न्यं, समानपतित्वमित्यर्थः। अभिलष्यते काङ्क्षते, भवादृक् त्वादृशः, जामाता दुहितुः पतिः, मम मे, निखिलं सर्वं, कुलं वंशं, पुनाति पवित्रं करोति।

स सम्राड्राजपुत्त्रमुद्दिश्यैवमवादीत् भो राजकुमार इदानीं मद्दुहिता भारतराज्यलक्ष्म्याः सापत्न्यं काङ्क्षते। भवन्तं परिणीय भारतराज्यश्रियः सपत्नी भवितुमभिलषति त्वादृशः जामाता मत्कुलं सर्वं पुनाति।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఓ రాజకుమారా ! నా కూతురిప్పుడు నిన్ను వివాహమాడి, భారత సామ్రాజ్యలక్ష్మికి సవతిగానుండవలెనని కోరుచున్నది. నీవంటి అల్లునివలన మాకులమంతయును పవిత్రమగును గదా! అని ఆ సార్వభౌముడు రాజకుమారునితో పలికెను.

The monarch said to the prince, "My daughter longs to be your wife. Her only fellow wife is the kingdom you are going to rule. With a son-in-law like you the whole class of ours will be sanctified".

१३. प्रालेयाद्रिलसदुदङ्नितम्बदेशं पूर्वं नः पितृकुलमावसच्चिरस्य ।
यस्मादीदृगरचि पुस्तकेषु तस्मादस्माकं समुचित एव बन्धुभावः ॥

व्या :- प्रालेयाद्रीति :- पूर्वं पुरा, नः अस्माकं, पितृकुलं पितृवंशः, प्रालेयाद्रेः हिमालयस्य लसन् प्रकाशमानः उदक् उत्तरभागे यो नितम्बदेशः मध्यभागः, तं हिमवत्पर्वतोत्तरमध्यदेशमित्यर्थः। ''कटकोऽस्त्री नितम्बोऽद्रे'' रित्यमरः। चिरस्य चिरकालं, ''चिराय चिररात्राय चिरस्यार्थाश्चिरार्थकाः'' इत्यमरः। अवसत् उवास, ''उपान्वध्याङ्वसः'' इति कर्मत्वं यस्मात्कारणात्, ईदृक् एवं, पुस्तकेषु ग्रन्थेषु, अरचि वर्णितम्, तस्मात्कारणात्, अस्माकं नः, बन्धुभावः बन्धुत्वं, समुचित एव योग्य एव।

हिमालयस्योत्तरस्यां दिशि पर्वतमध्यभागे पुरा अस्मत्पितृकुलमवात्सीदिति ग्रन्थेषु परिदृश्यते। तस्य देशस्य भरतवर्षान्तर्गतत्वेन अस्माकं बन्धुत्वमुचितमेवेति मन्ये, अयमुदन्तः प्राचीनग्रन्थेषु पर्यदृश्यत।

తా॥ మా పూర్వులందరును మంచుకొండకు ఉత్తరముగ పర్వత మధ్యదేశమున నివసించిరని గ్రంథములందు గలదు. కావున మనము బంధువులమే అగుదుము. ఏక భారత వర్షీయులమగుటచే మన బంధుత్వము సముచితమే అగును.

According to the scriptures we know that my forefathers lived to the north of the Himalayas. Hence we all belong to Bharata and our relation is appropriate.

In Public domain. Digitization Muthulakshmi Research Academy

१४. मह्यं कोऽपि मम विराण्मणिस्सतीर्थ्यः स्वां पुत्रीमुपरतमातृकां रहस्ये ।
नन्दाय त्रिदिवमगात्पुरा मदर्थं युद्ध्वा मे प्रियतमदत्तपुत्रिकेयम् ॥

व्या :- मह्यमिति :- पुरा पूर्वं, मम मे, सतीर्थ्यः समानगुरुः, एकगुरुरित्यर्थः ''सतीर्थ्यास्त्वेकगुरव'' इत्यर्थः कोऽपि विराण्मणिः कश्चन राजन्यश्रेष्ठः, उपरता मृता माता जननी यस्यास्ताम्, उपरतमातृकां, मातृहीनामित्यर्थः। स्वां पुत्रीं स्वकुमारीं, रहस्ये रहसि, मह्यं मे सन्दाय दत्त्वा, मदर्थं मन्निमित्तं, मल्लाभायेत्यर्थः, युद्ध्वा शत्रुभिर्युद्धं कृत्वा, त्रिदिवं स्वर्गम् अगात् जगाम, मृतो बभूवेत्यर्थः। इयम् एषा कन्यका, मे मम, प्रियतमा अतिप्रिया दत्तपुत्रिका, दत्तपुत्री, आप्तमित्रेण दत्ता च।

पुरा मम सखा सतीर्थ्यः कश्चन राजन्यः मातृहीनामिमां स्वपुत्रीं रहसि मह्यं दत्त्वा, मदर्थं शत्रुभिर्युद्ध्वा, प्राणानमुञ्चत्। तदादीयं पुत्रीत्वेन संरक्षिता संवर्धिता च। तस्मादियं मे प्रियतमदत्तपुत्रिकाऽभूत्।

తా॥ ఒకే గురువుకడ విద్యాభ్యాసము గావించిన నా మిత్రుడయిన రాజన్యుడొకడు, తల్లిలేని తన కూతురును రహస్యముగా నాకప్పగించి, నాకొరకై శత్రువులతో పోరాడి, యుద్ధరంగములో హతుడై మరణించెను. ఆనాటినుండి ఈమెను నే బెంచుచుంటిని. ఈమె నా ప్రియతమ దత్తపుత్రిక సుమా !

My close friend, fellow student at my guru, who later became a king, had lost his life in a battle fought on my behalf. I have raised his daughter secretly from then. This girl is my beloved foster child.

१५. मात्राऽस्या मुहुरहमित्यभाषिषीयं नित्यं त्वद्गुणगणचिन्तनामृतेन ।
सञ्जीवन्त्यधिकुरुते सदान्नपाने मद्बाला सहृदय ते तपस्यतीत्थम् ॥

व्या :- मात्रेति :- इयं कन्या, तव यो गुणगणः गुणसमूहः तस्य चिन्तनं ध्यानं तदेव अमृतं पीयूषं तेन, सञ्जीवन्ती प्राणान् अधारयन्ती, सदा नित्यम्, अन्नञ्च पानं च अन्नपाने, पानभोजनादिकम्, अधिकुरुते तिरस्करोति। इति एवम्,

In Public domain. Digitization Muthulakshmi Research Academy

अस्याः मात्रा जनन्या, मद्भार्ययेत्यर्थः। अहं, मुहुर्मुहुः पुनः पुनः, अभाषिषि अभिहितः, हे सहृदय ! हृदयालो ! मद्बाला मत्कुमारी ते त्वदर्थम्, इत्थम् ईदृक्, तपस्यति तपः करोति।

इयं कन्या त्वद्गुणगणचिन्तनरूपममृतं नित्यं पीत्वा, अन्नपानादिकमपि विसृज्य जीवतीति मद्भार्या मामसकृद्बोधयति, एवमियं बाला त्वामेव ध्यायन्ती आहारादिकमपि विसृज्य त्वदर्थं तपस्यति।

తా॥ ఈ కన్యక నీ గుణగణ చింతనమనెడు నమృతమును నిత్యము దావుచు, ఆహారాదికమును విడిచినదని ఆమె తల్లి అనగా నా భార్య మాటిమాటికి నాకు చెప్పుచున్నది. ఓ మహాశయా! తపస్సాచరించువారు అన్నపానాదికమును విసర్జించి నిత్యము తమ ఇష్టదైవమునే ధ్యానింతురు. అట్లే యీమెయు నీగురించియే తపస్సు చేయుచున్నది సుమా!

This noble virgin has been possessed with your thoughts and hasn't been eating well, reports my wife. Those who do penance abstain from food and water and meditate on their favourite deity. This daughter of mine too has been doing penance for you.

१६. श्रुत्वा तद्धितकरचक्रवर्तिवाक्यं प्रत्यूचे चतुरमतिस्स भूमिदेवः ।
नाथेतैष नरपते भवत्कुमार्याः को मुञ्चेत्स्वकरगतामभीष्टलक्ष्मीम् ॥

व्या :- श्रुत्वेति :- तत् हितकरं क्षेमकरं, चक्रवर्तिवाक्यं सार्वभौमवचनं, श्रुत्वा आकर्ण्य, चतुरमतिः निपुणबुद्धिः सः भूमिदेवः तारकः, नरपते! भो राजन्! एषः राजकुमारः, भवत्कुमार्याः भवदीयपुत्र्याः नाथेत याचेत, कः जनः को वा मानवः, स्वकरगतां स्वहस्तपतिताम्, अभीष्टलक्ष्मीम् इष्टसम्पदं, मुञ्चेत् त्यजेत्, न कोऽपीति भावः। इति एवं, प्रत्यूचे प्रत्युवाच।

इत्थमुक्तं सार्वभौमवचनं निशम्य निपुणमतिस्स तारकः, राजन्! कुमारोऽयं त्वद्दुहितरं ग्रहीष्यत्येव, करतलगतामिष्टसम्पदं विहातुं कः प्रभवति? इति प्रत्युवाच।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఇట్లు హితకరముగ పలుకుచున్న సార్వభౌముని మాటలను విని, బుద్ధిమంతుడు నేర్పరియునగు నా తారకుడు, ఓ సార్వభౌమా! సిరిరామోకాలొడ్డు వారుందురా? కరతల గతమగు నభీష్ట సంపదను విడుచువారెవ్వరు? ఈ రాజపుత్రుడు నీ కన్యను తప్పక పరిగ్రహించునని సమాధానమిచ్చెను.

Having listened to the friendly talk by the monarch, the good natured *Taraka* with acumen replied to him. "Oh monarch! When fortune is at one's footstep no one would turn it down. If what you are fond of is at hand who would forsake it? This prince surely will accept your daughter's hand in marriage.

१७. अन्योन्योचितगुणरूपयौवनाढ्यौ संयुक्ताविव धनवृद्ध्युदारभावौ ।
दिष्ट्यैतौ मधुरवधूवरौ कुलीनौ भूपायं शुभदिवसो वयं कृतार्थाः ।।

व्या :- अन्योन्यमिति :- अन्योन्यं परस्परम्, उचितानि अर्हाणि, गुणाः रूपं यौवनं च गुणरूपयौवनानि, तैः आढ्यौ सम्पूर्णौ, परस्परानुरूपरूपगुणतारुण्यावित्यर्थः। कुलीनौ सत्कुलसमुत्पन्नौ, मधुरवधूवरौ प्रियवधूवरौ 'दिष्ट्या दैववशेन, धनवृद्धिः अधिकसम्पत् उदारभावः औदार्यं' ताविव, संयुक्तौ मिलितौ, अभूताम्। भूप राजन् अयम् अयमेव सुदिवसः सुदिनम् वयं कृतार्थाः कृतकृत्या अभूम उपमा।

भोस्सार्वभौम एतौ वधूवरौ महाकुलसञ्जातौ, सद्गुणैः सुन्दररूपेण, नूत्नयौवनेन च परस्परानुरूपौ, अन्योन्यप्रियौ च, यथा अनन्तसम्पत् उदारभावेन सहिता शोभते तथैव अनयोस्सङ्गतिरधिकरमणीया, अयमेव सुदिवसः, यद्यनयोः परिणयो भवेद्वयं कृतार्थास्स्याम, इति स तारकः अवोचत्।

తా॥ ఓ రాజా ! ఈ వధూవరులిరువురును మంచి గుణములతో, చక్కని రూపముతో, నూత్నయౌవనముతో ఒప్పుచు నొకరినొకరు మించియున్నారు. ఇరువురును మంచి వంశమున జన్మించినవారలే మంచి సంపదయు చక్కని యుదార భావము ఒకచోట కలియునట్లు వీరి కలయిక యున్నది. ఇక నాలస్యమేల? నేడే శుభదినము వీరికి వివాహము జరిగిన మేము కృతార్థులమయ్యెదము.

In Public domain. Digitization Muthulakshmi Research Academy

Hey king! This young pair excels each other in traits and beauty. Both are from a great lineage. Wealth and munificence go hand in hand in their togetherness. Why to while away time? Today is auspicious. If the two get married we will be gratified".

१८. आशंसे जननुतवीरसूर्भवेस्त्वं मङ्क्षु क्ष्मापतिरिति पुत्रिकां ब्रुवाणः ।
कह्लारस्रजमभितो गलं विराजः सम्प्रीत्या सदपि तयाऽसयाम्बभूव ॥

व्या :- आशंस इति :- त्वं, मङ्क्षु शीघ्रं, जननुतं वीरं कुमारं सूते इति जननुतवीरसूः, अथवा, जननुता लोकश्लाघ्यवीरसूः वीरमाता, भवेः स्याः इति, अहम् आशंसे आकाङ्क्षे, इति एवं, क्ष्मापतिः सार्वभौमः, पुत्रिकां दुहितरं, ब्रुवाणः कथयन्सन्, सदसि सभायां कन्यकया, विराजः राजपुत्त्रस्य, गलमभितः कण्ठसीम्नि, "अभिमतः परित" इत्यादिना द्वितीया, कह्लारस्रजं सौगन्धिकपुष्पमालां, "सौगन्धिकं तु कह्लार" मित्यमरः आसयाम्बभूव निक्षेपयामास।

स सार्वभौमस्सुतां वीक्ष्य, पुत्रि त्वमचिरेण कालेन वीरमाता भविष्यसि, एवमहमाकाङ्क्षे इत्यवोचत्। आशिषमदात्, ततस्तज्जनकानुमत्या सा राजकुमारी तस्य राजपुत्त्रस्य ग्रीवायां सौगन्धिकपुष्पमालामक्षिपत्।

తా॥ పుత్రీ ! త్వరగా నీవు వీరమాతవు కాగలవని నేనాశీర్వదించుచుంటిని అని పలికి ఆ సార్వభౌముడనుమతింప, నా రాజపుత్రి సౌగన్ధిక పుష్పమాలను రాజకుమారుని మెడలో వేసెను.

The monarch blessed his daughter saying, "Dear child, may you have illustrious progeny." The princess, as her father nodded, put a sweet scented garland around the prince's neck.

१९. कामो मे त्वमिव करेण नाङ्गनाऽन्या गृह्येतेति भरतवर्षराज्यलक्ष्म्याः ।
हस्ताग्रं निजमभिगृह्णतो विराजो हृष्ट्यायौद्दगवनिपालकस्य पुत्र्याः॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या :- काम इति :- त्वमिव भवतीव अन्या इतरा, अङ्गना कान्ता, करेण हस्तेन, न गृह्येत न स्वीक्रियेत, अयं, मे मम, कामः सङ्कल्पः, इति इत्थं, वदतः कथयतः, निजं स्वीयं, हस्ताग्रं पाणिम्, अभिगृह्णतः स्वीकुर्वतः, विराजः राजकुमारस्य, दृष्ट्या दृशा, भरतवर्षराज्यलक्ष्म्याः, अवनिपालकस्य पुत्र्याः सार्वभौमकुमार्याः, दृक् दृष्टिः अयौत् मिलिता बभूव।

यथा इदानीं त्वत्पाणिमहमगृह्णाम् तथा अन्यस्याः, कस्याश्चित्कान्तायाः पाणिं न ग्रहीष्यामि, एष मे सङ्कल्पः इति वदन् स राजपुत्त्रः राजकन्यायाः पाणिमग्रहीत्। तदा तयोर्वधूवरयोः दृष्टिः अन्योन्यं मिलिता बभूव।

తా॥ నీ కరమునందుకొనినట్లింకే కాంతకరమునుగూడ నేను పరిగ్రహింపను. ఇది నా సంకల్పము అని పలుకుచు నా రాజపుత్రుడు కాబోవు భారత రాజ్యలక్ష్మియైన ఆ రాజకన్యపాణిని గ్రహించెను. ఆ సమయమున ఆ వధూవరులచూపులొకదానితో నొకటి కలిసెను. ఒకరినొకరు చూచుకొనిరి. "ధర్మేచ అర్థేచ కామేచ త్వయైషా నాతిచరితవ్యా నాతిచరామి" అను భారతీయ వివాహనియమమిందు నిరూపింపబడెను.

"I shall not let any other woman into my life, this is my pledge", promised the prince and took her hand into his as they exchanged glances.

२०. पाणीक्षाहृदययुगानि मेलयन्तौ द्रागेतौ सकलविधैस्समासजेताम् ।
ज्योत्स्नेन्दू इव निरतानुबन्धयुक्तौ स्यातामित्यमनुत तत्सदस्यपूगः ॥

व्या :- पाणीति :- एतौ वधूवरौ, द्राक् शीघ्रं, पाण्योः हस्तयोः, ईक्षयोः दृशोः, हृदययोः मनसोः, युगानि युगलानि, मेलयन्तौ योजयन्तौ सकलविधैः सर्वविधैः, समासजेतां संसक्तावभूताम्। एतौ राजकुमारीकुमारौ, ज्योत्स्नाचन्द्रिका इन्दुः चन्द्रः, चन्द्रिकाचन्द्राविव, निरतं सन्ततम् अनुबन्धेन अनुवर्तनेन, युक्तौ सहितौ, स्यातां भवेताम्, इति एवं, तत्सदस्यपूगः तत्सामाजिकसङ्घः, ''पूगः क्रमुकबृन्दयो'' रित्यमरः। अमनुत मेने, उपमालङ्कारः।

In Public domain. Digitization Muthulakshmi Research Academy

तौ नूतनदम्पती शीघ्रमेव सर्वथा सर्वात्मना च सङ्गतावभूताम्। तद्दृष्ट्वा तत्रस्थस्सामाजिकवर्गः, चन्द्रिकाचन्द्राविव एतौ अन्योन्यानुबन्धेन निरतं भवेतामित्यमनुत।

తా॥ ఆ వధూవరులిరువురును, చేతులు, చూపులు మనస్సులు కలుపుకొని, అన్నివిధముల అతివేగముగ నేకమయిరి. దానిని గాంచి అచ్చటి సభ్యవర్గము వీరిరువురు వెన్నెలయు జాబిల్లియు గలిసినట్లన్యోన్యము అనుబంధముతో మెలగెదరని భావించిరి.

The council witnessed a harmonious union of hands, glances and souls of the bride and groom within no time. They felt it was like the union of the moon and the moon-light.

२१. सम्पूर्णोडुपकलिता यथा त्रियामा सा तन्वी विनययुतेन साधुविद्या ।
प्रातानीन्मुदमभितः स्वभर्तृयुक्ता लोकानां सुजनगतेव राज्यलक्ष्मीः ॥

व्या :- सम्पूर्णेति :- सा तन्वी राजपुत्री, सम्पूर्णः षोडशकलायुक्तः उडूनां नक्षत्त्राणां पतिः उडुपः चन्द्रः, राका निशाकर इत्यर्थः। तेन कलिता संयुक्ता त्रियामा यथा रात्रिरिव, विनयेन उत्तमसंस्कारेण, युता युक्ता, साधुविद्या इव सद्विद्येव, स्वभर्तृयुक्ता स्वपतिसहिता सती, सुजनगता सत्पुरुषमुपेता, राज्यलक्ष्मीरिव राज्यश्रीरिव, लोकानां जनानाम्, अभितः, मुदम् अधिकप्रीतिं प्रातानीत् विस्तारयामास, मालोपमालङ्कारः।

राकाचन्द्रयुता रात्रिरिव, संस्कारसमुपेता सद्विद्येव, स्वभर्तृसङ्गता सा राजपुत्री सत्पुरुषसमाश्रिता सम्राट्श्रीरिव, सर्वेषां प्रीतिमधिकामुत्पादयामास।

తా॥ పున్నమి చందురునితో రాత్రి కలియునట్లు, మంచి సంస్కారముతో సద్విద్యకూడునట్లు, తన పతితోగూడి ఆ రాజపుత్రి, సత్పురుషాశ్రితయగు రాజ్యలక్ష్మివలె అందరికి అధికానందము నొనగూర్చెను.

Like the night with a brocade of full moon, like culture that fuses with good education, like an empire that looks up

In Public domain. Digitization Muthulakshmi Research Academy

to its able emperor and pairs up with him, the princess made a perfect pair with her husband.

२२. कार्यज्ञाविति पितरौ वधूमणेस्तौ प्रावक्तां निजदुहितुः पतिं विनम्रौ ।
बालेयं प्रियतनयाऽवयोस्सुशीला दत्ता सम्प्रति सह बाष्पधारया ते ।।

व्या :- कार्यज्ञाविति :- कार्यज्ञौ कार्यविधानकुशलौ, तौ वधूमणेः वधूरत्नस्य, पितरौ मातापितरौ, माता च पिता च पितरावित्येकशेषः। विनम्रौ नम्रीकृतदेहौ, निजदुहितुः पतिं जामातरम्, इति वक्ष्यमाणरीत्या, प्रावक्ताम् अवोचताम्। इयम् एषा वधूः, बाला मुग्धा, आवयोः प्रियतनया प्रियपुत्रिका, सुशीला उत्तमस्वभावा, सम्प्रति इदानीं, बाष्पधारया सह अश्रुभिस्साकं, ते तुभ्यं दत्ता वितीर्णा।

वधूजननीजनका जामातरं राजकुमारमाहूय, विनम्रौ सन्तौ, एवमवोचताम्। भो राजकुमार ! अवयोस्सुता मुग्धा सुशीला च, इदानीं तुभ्यमश्रुधारया सह दत्ता।

తా॥ కార్యవిధానము నెఱింగిన ఆ సార్వభౌమ దంపతులు వినమ్రులై అల్లునితో, రాజకుమారా ! ఈమె కడుముద్దరాలు, మంచి స్వభావముగలది. దీనిని మేము మిక్కిలి బాధపడుచు విడువలేక విడువలేక నీ కర్పించితిమి.

The monarch and his wife addressing their son-in-law said," Hey prince! This is our most beloved daughter. She is good natured. It is very painful to see her off. Yet we have given her away to you.

२३. एषा त्वत्पदकमले सदोपकर्तुं सन्नद्धा मृदुगमनाऽस्मदेकपुत्री ।
आयत्ता त्वयि ललना मनोवचोऽङ्गैः स्यात्त्यक्त्वा निजपितराविहाश्रुपूर्णौ ।।

व्या :- एषेति :- अस्मदेकपुत्री आवयोरेकैककुमारी, मृदुगमना मन्दगमना, एषा ललना, त्वत्पादकमले त्वदीये पादपद्मे, सदा सन्ततम्, उपकर्तुं सेवितुं सन्नद्धा संसिद्धा अश्रुपूर्णौ दुःखितौ, निजपितरौ निजजननीजनकौ, अत्र इह, त्यक्त्वा विसृज्य, मनसा हृदयेन, वचसा वाचा, अङ्गेन देहेन च, मनोवाक्कायैरित्यर्थः। त्वयि भवति, आयत्ता अधीना, स्यात् भवेत्।

In Public domain. Digitization Muthulakshmi Research Academy

इयमस्मदेकपुत्री भवदाराधनसमुत्सुका, सर्वात्मना त्वां सेवितुमुद्युक्ता, दुःखितौ पितरौ आवाम् इह विसृज्य त्वामेवानुसरिष्यति।

తా॥ ఈమె ఒక్కతియే మా కూతురు. నీ పాదపద్మములను సేవింప సంకల్పించినది. త్రికరణశుద్ధిగ నిన్ను నమ్మినది. దుఃఖితులయిన మమ్మిట విడిచి నిన్నే అనుసరించును.

She is our only child. And she has decided to be a devoted wife who would always serve you ardently. She is pure in thought, word and deed. She will leave us here though we are sad, to follow you.

२४. त्वत्पत्नी भवति पतिंवरा सुशीला सम्पोष्टुं सह भवता कृताभिषेका ।
कर्मक्ष्मां प्रियतनयाऽवयोरियं त्वं सर्वज्ञः प्रकथनयोग्यमस्ति किं ते ।।

व्या :- त्वत्पत्नीति :- पतिंवरा स्वयंवरा, सुशीला शोभनस्वभावा, इयम्, आवयोः प्रियतनया अस्मत्प्रियपुत्री, त्वत्पत्नी भवद्भार्या, कर्मक्ष्मां कर्मभूमिं, भरतवर्षमित्यर्थः। सम्पोष्टुं संवर्धितुं, भवता सह त्वया साकं, कृताभिषेका पट्टमहिषी भवति। भविष्यतीति भावः वर्तमानसामीप्ये लट्। ''कृताभिषेका महिषी'' इत्यमरः त्वं सर्वज्ञः सर्वं जानासि। ते भवतः, प्रकथनयोग्यं कथनीयं वचनं किमस्ति किं विद्यते, न किञ्चिदपीत्यर्थः।

त्वत्पत्नी इयं मत्कुमारी भवता सह भरतवर्षपालनाय पट्टमहिषी भविष्यति, तद्रक्षणाय अमुया सह त्वामभिषेक्ष्यामि इयं तव महिषी। सर्वज्ञस्य तव इतोऽधिकं वक्तव्यं नास्तीति मे आशयः।

తా॥ ఈ రాజకుమారి నీతోగూడి పట్టాభిషిక్తురాలై భరతభూమిని పాలించు నీకు పట్టమహిషి కాగలదు. ఈమెనెట్లు చూచెదవో? నీవు సర్వజ్ఞుడవు నేను వేరుగ నీకు చెప్పనవసరముండదు.

On your coronation she will be the empress and your principal queen. I am concerned how well you would take

In Public domain. Digitization Muthulakshmi Research Academy

care of her. You have knowledge of everything and do not have to be preached".

२५. सोत्कण्ठौ रुचिरमलङ्कृतौ सखीभिर्नीयेते स्म तरुणजम्पती क्षणेन ।
अन्योन्याधिकरणीयतान्वितौ तौ ह्रीमन्तौ स्मितललितौ विहारसौधम् ।।

व्या :- सोत्कण्ठाविति :- सोत्कण्ठौ उत्कण्ठासहितौ, इष्टकार्यविलम्ब-मसहमानावित्यर्थः, रुचिरं मनोहरं यथातथा, अलङ्कृतौ भूषितौ, ह्रीमन्तौ लज्जायुतौ, स्मितेन दरहसितेन ललितौ सुन्दरौ, मन्दस्मितसुन्दरवदनारविन्दावित्यर्थः, अन्योन्यं परस्परम् अधिका या रमणीयता रामणीयकता तया अन्वितौ युक्तौ, परस्पराधिक सौन्दर्यविराजमानावित्यर्थः, तौ तरुणजम्पती नूतनयुवकदम्पती, ''दम्पती जम्पती जायापती' इत्यमरः क्षणेन क्षणकालेन, सखीभिः वयस्याभिः, विहारसौधं क्रीडा प्रासादं नीयेतेस्म आनीयेताम्।

विशिष्टाभरणभूषितौ विलम्बमसहमानौ परस्पराधिकरामणीयकताराजमानौ मन्दस्मितसुन्दरवदनारविन्दौ ह्रीमन्तौ तौ नवदम्पती सख्यः शीघ्रं क्रीडामन्दिरं निन्युः।

తా॥ ఆ నవదంపతులు సర్వాభరణభూషితులైరి. ఒకరికిమించి యొకరు చక్కదనముతో ఒప్పుచుండిరి. కాలవిలంబమును సహింపజాలక సిగ్గుపడుచు చిరునవ్వులు నవ్వుకొనుచుండిరి. అట్టివారిద్దరిని సఖులు త్వరగా విహారసౌధమునకు కొనిపోయిరి.

The newly weds were dressed up with gorgeous ornaments. They out did each other in looks. Friends accompanied the blushing bride and the groom who did not want to waste their time to *vihara* hall with facilities of entertainment.

२६. सन्ध्यायामुदवसितानि राज्ञ् निदेशादास्थानोपगतजना ययुः प्रहृष्य।
भूदेवं स तमवनम्य चक्रवर्ती स्वागारं मुदितमना ययौ कृतार्थः ।।

व्या :- सन्ध्यायामिति :- आस्थानं सभामन्दिरं उपगता प्राप्ताः ये जनाः

In Public domain. Digitization Muthulakshmi Research Academy

सामाजिकाः राण्निदेशात् राजादेशात् प्रहृष्य सन्तुष्य, सन्ध्यायां सन्ध्यासमये, उदवसितानि गृहाणि ययुः जग्मुः, गृहगेहोदवसितवेश्मसद्मनिकेतनं'' इत्यमरः सः चक्रवर्ती, तं भूदेवं भूसुरं तारकम्, आनम्य प्रणम्य, मुदितमनाः सन्तुष्टस्वान्तः कृतार्थः कृतकृत्यस्सन्, स्वागारं स्वभवनं, ययौ जगाम।

सर्वेऽपि सामाजिकास्सन्तुष्टस्वान्ताः सम्राडादेशेन सन्ध्यासमये स्वस्वगृहाणि ययुः, सार्वभौमोऽपि स्वसमीपस्थितं तारकमभिवन्द्य, तं विसृज्य, सन्तुष्टान्तरङ्गः कृतार्थस्सन् स्वभवनं जगाम।

తా॥ అంత సామాజికులందరును మిక్కిలి ఆనందించుచు రాజానుమతిని బొంది, సంధ్యాసమయమున వారివారి గృహములకేగిరి. సార్వభౌముడు గూడ తారకునకు నమస్కరించి, వానిని భవనమునకు బంపి మిక్కిలియానందముతో గృతార్థుడనయితినని భావించుకొనుచు తన మందిరమునకేగెను.

All the civilians on the monarch's permission left for their homes by dusk. The monarch saluted to *Taraka,* saw him off to his palace and then left for his palace in contentment.

२७. सुप्त्वा सम्मदपरिपूरितस्त्रियामां कृत्वा सोऽचिरमखिलप्रभातकृत्यम्।
अध्यास्ते स्म सदसि दिव्यभद्रपीठं ग्रावाग्रं हरिरिव साधु सार्वभौमः॥

व्या :- सुप्त्वेति :- सः सार्वभौमः चक्रवर्ती, सम्मदपरिपूरितः प्रमोदपूर्णस्सन्, ''प्रमोदामोद सम्मदाः'' इत्यमरः। त्रियामां रात्रिं सुप्त्वा प्रसुप्य, अखिलं सर्वं, प्रभातकृत्यं कल्यकरणीयं कार्यम्, अचिरं शीघ्रं, कृत्वा विधाय सदसि सभायां, दिव्यम् उत्तमं भद्रपीठं सिंहासनं ग्रावाग्रं पर्वतशिखरं, हरिरिव सिंह इव। ''अद्रि गोत्रगिरि ग्रावाचलशैलशिलोच्चयाः.'' ''हर्यक्षः केसरी हरिः'' इति चामरः, अथवा, ग्रावाग्रम् उदयपर्वतशिखरं, हरिरिव सूर्य इव, ''यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु, शुकाहिकपिभेकेषुहरिर्नाकपिले त्रिषु'', इति नानार्थरत्नमाला, साधुरम्यं, अध्यास्तेस्म अधितष्ठौ, उपमालङ्कारः।

In Public domain. Digitization Muthulakshmi Research Academy

रात्रौ सुखनिद्रामनुभूय, प्रभाते त्वरया सर्वाणि कालकृत्यानि निर्वर्त्य, स सार्वभौमः सभामागत्य, तत्र सिंहः गिरिशिखरमिव रविरुदयगिरिशिखरमिव वा, दिव्यसिंहासनमारुरोह।

తా॥ ఆ రాత్రి సుఖముగ సంతోషముగ నిద్రించి, ఆ సార్వభౌముడు వేకువనే మేల్కొని గబగబ కాలకృత్యముల నెరవేర్చుకొని, సభామందిరమునకేతెంచి, అచ్చట సింహము పర్వతాగ్రమునువలె, లేక, సూర్యుడుదయపర్వత శిఖరమునువలె నున్నతమగు సింహాసనమును అధిష్ఠించెను.

After a good night's sleep, the monarch woke up early in the morning, finished his ablutions quickly and reached his court and sat on his throne as a lion would sit on the crest of a mountain, as the sun would mount on the eastern mountain.

२८. गव्यूतिद्वयपरिमेयनिष्कुटान्ते सैकान्नत्रिदशसहस्रपीठरम्या ।
आस्थान्यास्त उपविवेश तत्र नानादेशीयाधिप विसरः प्रमोदयुक्तः ॥

व्या :- गव्यूतीति :- गव्यूतिः क्रोशयुगं, ''गव्यूतिः स्त्री क्रोशयुगमित्यमरः। तस्याः द्वयं युगं, तेन परिमेयः परिमातुं योग्यः यः निष्कुटः गृहारामः, ''गृहारामन्तु निष्कुट'' इत्यमरः। तस्य अन्ते मध्यदेशे, सैकान्नत्रिदशसहस्रपीठरम्या एकोन, त्रिंशत्सहस्रासनोपशोभिता, एकान्नत्रिदशसहस्रपीठरम्येति समस्तं पदम्। तत्र नञः त्रिदशसहस्रशब्देन समासे कृते एकशब्देन सह ''तृतीया तत्कृतार्थेन गुणवचनेन'' इत्यत्र तृतीयेति योगविभागात् समासः एवं च एकेन न त्रिदशसहस्रपीठानीति तृतीया समासः ''एकादिश्चैकस्य चादुक्'' इति नञः प्रकृतिभावः, आदुगागमश्च। ''दुर्योऽनुनासिके'' इति वा अनुनासिकः एकान्नत्रिदशेतिरूपम्, सा प्रसिद्धा आस्थानी आस्थानं, सभामन्दिरम्, आस्ते विद्यते, तत्र तस्यामास्थान्यां, नानादेशीयाः नानादेश सम्बन्धिनः ये अधिपाः राजानः, तेषां विसरः, समूहः प्रमोदयुक्तः आनन्दपूर्णः उपविवेश उपाविशत् अतिशयोक्तिरलङ्कारः।

In Public domain. Digitization Muthulakshmi Research Academy

चतुष्क्रोशपरिमितस्योद्यानस्य मध्यदेशे विशालमास्थानीमण्डपमस्ति। तस्मिन् एकोनत्रिंशत्सहस्रसङ्ख्याकान्यासनान्यवर्तन्त। तेषु बहुदेशेभ्य आगता राजानः सन्तुष्टाः न्यवसन्।

తా॥ నాలుగు క్రోసులు మేరగల పూదోటలో నొక సభామంటపముగలదు. అందు ఒకటి తక్కువ ముప్పదివేల ఆసనములున్నవి. వానిపై నానాదేశములనుండి వచ్చిన రాజులానందముగ నుండిరి.

A flower garden that stretched up to eight kilometers had a court that could seat as many as one short of thirty thousand people. Kings of different countries were seated there.

२९. पार्षद्या द्विजयुगलं विलोकमानाश्श्रीयुक्तां भूपतितनयां निरीक्षकास्ते ।
कार्यज्ञाः स्फुरदुचितासनोपविष्टा अन्योन्यं सदसि तदाऽब्रुवन् प्रतीपम् ।।

व्या :- पार्षद्याः :- कार्यज्ञाः कार्यविधानवेत्तारः, पार्षद्याः परिषदि स्थिता सभ्याः, स्फुरन्ति प्रकाशमानानि उचितानि अर्हाणि यानि आसनानि तेषु उपविष्टाः निषण्णाः, द्विजयुगलं विप्रराजपुत्रयुग्मं, विलोकमानाः ईक्षमाणास्सन्तः, तदा तस्मिन्समये, अन्योन्यं परस्परं, प्रतीपं विरुद्धभावोपेतं यथा तथा, अब्रुवन् अवोचन्।

तदा तत्सभायामुचितासनोपविष्टास्सभासदः विप्रकुमारं राजपुत्रं श्रीमतीं सार्वभौमदुहितरं च पश्यन्तः परस्परं विरुद्धालापानकुर्वन्।

తా॥ ఆ సమయమున సభలో ఉచితాసనాసీనులైన సభ్యులు, రాజపుత్ర బ్రాహ్మణ కుమారులను, శ్రీమతియగు రాజకుమారిని, జూచుచు వారిలో వారు పరస్పర విరుద్ధముగ మాటలాడ దొడంగిరి.

All the people sitting in their appropriate seats looked at the prince and his bride and *Taraka*. They started talking and contradicting one another.

In Public domain. Digitization Muthulakshmi Research Academy

३०. पाषाणः प्लवत इतः पयस्सु चित्रं तूलस्सम्प्रति सहसा निमज्जतीह ।
चन्द्रेशस्तरुणसुतेन वृद्धवप्तेव त्रातश्चतुरजनेन पुण्यभूमेः ॥

व्या :- पाषाण इति :- इतः अत्र पाषाणः शिलाखण्डः पयस्सु जलेषु, प्लवते उन्मज्जति, सम्प्रति इदानीम्, इह अत्र तूलः कार्पासपिण्डं, सहसा वेगेन, निमज्जति मग्नो भवति चित्रम् आश्चर्यं पुण्यभूमेः भारतक्षोण्याः, चतुरजनेन निपुणजनेन, भारतीयेनेत्यर्थः चन्द्रेशः चन्द्रद्वीपाधिपतिः सार्वभौमः, तरुणेन यूना कुमारेण, वृद्धवप्ता इव वृद्धपितेव, त्रातः संरक्षितः, उपमागर्भो दृष्टान्तः, कार्यलिङ्गञ्च।

अस्मिन् राज्ये सम्प्रति पाषाणः पयस्सु प्लवते, तूलस्तु जले निमज्जति, अहो। इदं बह्वाश्चर्यकरम्, युवा पुत्रः वृद्धं पितरमिव भरतवर्षजातः कश्चन भारतीयः चन्द्रद्वीपाधिपमरक्षत्।

తా॥ ఇప్పుడిచ్చట భారతీయుడొకడు చంద్రద్వీపాధిపతియగు సార్వభౌముని, వయసులోనున్న కొడుకు తండ్రిని కాపాడినట్లు రక్షించెను. ఇది మిక్కిలి వింతగానున్నది. ఇప్పుడిచ్చట రాయి నీటిలో తేలుచున్నది. దూదిపిండం నీటిలో వేగముగా మునుగుచున్నది కదా !

A man native of Bharata country is here today, who has saved the monarch of *Chandradveepa* like a responsible grown up son, would. It looks weird as though a stone float in the water and a ball of cotton drowns to the bottom.

३१. नूनं तावतुलितदिव्यशक्तिमन्तौ पाश्चात्यप्रकटितशत्रुधूमकेतू ।
क्ष्माचक्रं चिरमपि शासितुं समर्थौ मित्रं यो भवति तयोस्स एव धन्यः ॥

व्या :- नूनमिति :- तौ वीरौ, अतुलिता असदृशा दिव्या देवसम्बन्धिनी या शक्तिः सा अनयोः अस्तीति अतुलितदिव्यशक्तिमन्तौ, " न कर्मधारयान्मत्वर्थीयः" इति शास्त्रस्य अनित्यत्वात्, "सुकेशी ताम्रकेशी" इति भाष्यकारवचनाच्च रूपमेतत्साधु। पाश्चात्यानां पश्चिमदिग्वासिनां प्रकटिताः प्रसिद्धाः ये शत्रवः रिपवः तेषां धूमकेतू धूमप्रधानोत्पातौ, धूमकेत्वागमने लोकोपद्रवः भविष्यतीति शास्त्रम्। "उपप्लवाय

In Public domain. Digitization Muthulakshmi Research Academy

लोकानां धूमकेतुरिवोत्थितः'' इति कालिदासः। भूचक्रं भूमण्डलं, चिरमपि चिरकालमपि, शासितुं पालयितुं, समर्थौ शक्तिमन्तौ, दक्षावित्यर्थः, तयोः वीरवरयोः, यः जनः, मित्रं सखा, भवति, स एव स पुरुष एव, धन्यः योग्यः, नूनं ध्रुवम्।

एतौ वीरकुमारौ अतुलितदिव्यशक्तिसमुपेतौ, पाश्चात्यानां ये शत्रवः तेषां नाशने समुत्पन्नौ धूमकेतू, सर्वं महीमण्डलं चिरमपि पालयितुं समर्थौ, एतयोर्मैत्रीं यस्सम्पादयति स एव मानवः धन्यः भवति।

తా॥ ఈ ద్విజరాజపుత్రులిరువురును సాటిలేని దివ్యశక్తులుగలవారు. పాశ్చాత్యులకుగల ప్రసిద్ధ శత్రువులను సంపూర్ణముగ నాశనము చేయగల ధూమకేతువులే. వీరీ భూమినంత ఎంతకాలమయినను పాలింప సమర్థులు. వీరి మైత్రిని సంపాదించినవారే ధన్యులు, కృతార్థులగుదురు.

The Brahmin boy and the prince both are blessed with unearthly powers. They have the capacity of a comet that can destroy powerful enemies abroad. They are efficient enough to rule the whole planet for any number of years. Those who can befriend them are blessed and accomplished.

३२. इत्थं प्राज्वलदनिवार्यकोपवह्निर्मौनीनां बहु महनीयकर्मभूमेः ।
सर्वत्राऽहितबलकाननं दिधक्षत्येवाद्यात उचित एतयोस्सुषन्धिः ॥

व्या :- इत्थमिति :- महनीया महत्त्वोपेता या कर्मभूमिः भारतभूमिः तस्याः, मौनीनां ऋषीणां, भरतभूमिनिवासिमुनिपुङ्गवानामित्यर्थः अनिवार्यः वारयितुमशक्यः, कोपवह्निः कोपाग्निः, एवं वीरवररूपेण, बहु अधिकं, प्राज्वलत् जज्वाल अद्य इदानीं, सर्वत्र सर्वेषु देशेषु, अहितबलं शत्रुसैन्यं तदेव काननं वनं, तत्, दिधक्षति दग्धुमिच्छति, अतः अस्माद्धेतोः, एतयोः वीरवरयोः, सुषन्धिः सम्यक्सन्धानं, उचितः अर्हः।

भारतभूमिवासिनां मुनीनां कोपाग्निरेव एतद्वीरवररूपेण ज्वलति स्म, अयं कोपाग्निरिदानीं सकलानपि शत्रुदेशान् भस्मसात् करिष्यति। एतौ वीरौ सर्वान्शत्रून्नाशयिष्यतः, तेन हेतुना एताभ्यां सम्यक्सन्धिः कार्य एव।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ భారత వర్షమందున్న మునీశ్వరుల కోపాగ్నియే ఈ వీరకుమార రూపమున మండుచున్నది. ఇది శత్రుసైన్యములనెడు అడవులను గాల్చును. కావున ఈ వీరులతో మంచిగ సంధిచేసికొనుట మంచిది.

These two are the personification of the wrath of the sages in Bharata. This justified indignation can burn down the enemies completely. Hence it is good to be friends with these brave ones.

३३. पीत्वा खल्वनवसरद्विजाप्तिहालां दत्त्वाऽलम्प्रियतनयामणिं विराजे ।
पाश्चात्यप्रकटितमन्युहेतुभूतः किं धीमान् स्वकुलकलङ्क एष भूपः।।

व्या :- पीत्वेति :- एष भूपः अयं सार्वभौमः, अवसरः प्रस्तावः सः न भवतीत्यनवसरः, तस्मिन् द्विजस्याप्तिः ब्राह्मणप्राप्तिः सैव हाला मदिरा तां पीत्वा खलु, खलु - तस्याः पानं नोचितम्, तेन न किञ्चित्साध्यमिति भावः, प्रियतनयां प्रियदुहितरं, विराजे राजकुमाराय, दत्त्वा अलं, अलं - दानं नोचितम् तेन साधनीयं किमपि नास्तीति भावः उभयत्रापि "अलंखल्वोः" इत्यादिना क्त्वा प्रत्ययः पाश्चात्यानां, प्रकटितः बहिर्गतः, यः मन्युः क्रोधः, तस्य हेतुभूतः, निमित्तभूतः, स्वकुलकलङ्कः स्वकुलाङ्गारभूतः, एषः भूपः सार्वभौमः, धीमान् किम् बुद्धिमान् किम्, न भवत्येव।

अयं सार्वभौमः अनवसरे ब्राह्मणमैत्रीं मदिरापानमिवाकरोत्, तेन किञ्चिदपि साध्यं नास्ति, स्वपुत्रिकामतिप्रीत्या राजकुमारायादात्, एतेनापि साधनीयं किमपि नास्ति, किन्तु तदेव हेतुना सर्वेषां पाश्चात्यानां मन्युकारणमभूत्, स्वकुल कलङ्कभूतः अयं बुद्धिमान्न भवति किन्तु मूर्ख इव प्रतिभाति।

తా॥ ఈ సార్వభౌముడే నిమిత్తము లేకుండ మద్యమును ద్రావినట్లు ఈ బ్రాహ్మణ బాలకునితో మైత్రిని గావించెను. తన ప్రియపుత్రికను ఈ రాజకుమారునకిచ్చి వివాహముగావించెను. వీనివలన సాధింపదగిన కార్యములేమున్నవి. మీదుమిక్కిలి ఈ రెండుపనులచే పాశ్చాత్యులనందరికి కోపకారణమయ్యెను. కులమునకు మచ్చ తెచ్చిపెట్టిన ఈతడు బుద్ధిమంతుడేనా?

In Public domain. Digitization Muthulakshmi Research Academy

(Yet contrarily a few felt thus-) This monarch effortlessly made friends with this Brahmin boy. It was as easy as drinking wine. Got her loving daughter married to this prince. What is left for him to achieve? The couple of mistakes by him have invited the anger of all the foreign kings.

३४. पित्र्यं सच्छ्रुतमपि हन्ति पादघातं
स्वीकृत्य द्विजकुलबन्धुतामयं स एषः ।
पाश्चात्यावनिवलये समन्ततोऽद्य
प्राचीनश्रुतिशिरसां मतं व्यशिक्षत् ॥

व्या :- पित्र्यमिति :- सः एषः प्रसिद्धः अयं सार्वभौमः, द्विजकुलबन्धुतां क्षत्त्रबन्धुत्वं, स्वीकृत्य गृहीत्वा, पित्र्यं पितुस्सम्बन्धि, यत् सत् श्रुतमपि सच्छास्त्रमपि पादघातं हन्ति, पादाभ्यां हन्ति, नाशयतीत्यर्थः, अद्य इदानीं, समन्ततः सर्वत्र, पाश्चात्यावनिवलये पाश्चात्यदेशे, प्राचीनानां पुरातनानां, श्रुतिशिरसाम् उपनिषदां, मतं सिद्धान्तं, व्यशिक्षत् अबोधत्।

एष सार्वभौमः क्षत्त्रबन्धुर्भूत्वा कुलक्रमागतं सच्छास्त्रमपि नाशयामास किञ्च ब्राह्मणमैत्रीं सम्पाद्य अतिपुरातनमुपनिषन्मतमुपदिदेश।

తా॥ ఈ సార్వభౌముడు రాజకుమారునితో బంధుత్వమును గావించుకొని, తాతతండ్రులనుండి వచ్చుచున్న మన సత్సంప్రదాయమును కాళ్లతో దన్ని నాశనముగావించెను. ఈ బ్రాహ్మణ బాలకునితో స్నేహముజేసి, మన దేశమందంతట పాతబడిన ఆ యుపనిషన్మతము నుపదేశించెను.

This monarch with his relationship with this prince gave a hoot to our culture and pulled it down, the culture that we have inherited from our forefathers. In unison with these two young men he is teaching us outdated Upanishads.

In Public domain. Digitization Muthulakshmi Research Academy

३५. स्वाचारं जनपतिनाऽवलम्बयेते तं पुण्यावनिगुरुतामदीदृशेताम् ।
पश्यैनौ द्विजकुलशेखरावुदेति प्राग्देशे व्यसनमुपैति पश्चिमेऽर्कः ॥

व्या :- स्वाचारमिति :- एतौ द्विजकुलशेखरौ विप्रक्षत्त्रकुमारवरौ, जनपतिना सार्वभौमेन, स्वाचारं भारतीयाचारम् अवलम्बयेते स्वीकारयेते, तं सार्वभौमं पुण्यावनेः पुण्यभूमेः भारतदेशस्य, गुरुतां गौरवम् अदीदृशेतां दर्शयेते। एनौ द्विजवरौ, पश्य लोकय, अर्कः, रविः प्राग्देशे भारतभूमौ, उदेति उदयमाप्नोति पश्चिमे पश्चिमदेशे व्यसनमुपैति अस्तमेति।

एतौ कुमारौ सार्वभौमाय स्वाचारं बोधतः, राज्ञे स्वदेशगौरवं दर्शयतः, एनौ पश्यत, प्राग्देशे रविरुदेति पश्चिमदेशे अस्तमेति।

తా॥ ఈ ద్విజరాజకుమారులిరువురును తమ యాచారములను సార్వభౌమునకు బోధించి ఆచరించునట్లు గావించుచున్నారు. తమదేశ గౌరవమును వానికి జూపించుచున్నారు. వీరిని జూడుడు. సూర్యుడు తూర్పుదేశమున ఉదయించుచున్నాడు. పశ్చిమదేశమున అస్తమించుచున్నాడు. భారతభూమి వెలుగుతో నిండి పాశ్చాత్యదేశము అంధకారబంధురమగుచున్నది.

These two are teaching the monarch their culture and customs. They are demonstrating their patriotism to him. The sun rises in the east and sets in the west. Bharata land is shining brightly. Foreign lands are enveloped with darkness.

३६. भूदेवोत्तमरचितोरुयन्त्रपक्षी शक्तो द्वादशशतयोजनानि गन्तुम् ।
तत्राप्याचितभरधारणे समर्थः नाकेऽहर्दिवमथ सज्जितो बभूव ॥

व्या :- भूदेवेति :- अथ सभानन्तरं, भूदेवोत्तमेन ब्राह्मणोत्तमेन, तारकेणेत्यर्थः, रचितः निर्मितः उरुः विशालः यन्त्रपक्षी विहगाकारयन्त्रं, विमानमित्यर्थः द्वादश शतयोजनानि योजनानां द्वादशशतं, तावद्दूरमित्यर्थः, गन्तुं यातुं, शक्तः समर्थः, तत्र तस्मिन् आचितः परिमाणविशेषः भरः भारः तस्य धारणेऽपि वहनेऽपि समर्थः, सन्, नाके आकाशे ''आकाशे त्रिदिवे नाकः'' इत्यमरः, अहनि दिवा च अहर्दिवं रात्रिं दिवं, सज्जितः संसिद्धः, बभूव अभूत्।

In Public domain. Digitization Muthulakshmi Research Academy

भूसुरस्तारकः स्वशक्त्या बृहद्विमानं निर्ममे, तद्वादश शतयोजनदूरं गन्तुं शक्तम्, किञ्च, तत्राचितमधिकं भारं वोढुञ्च समर्थं, तादृशं विमानं सन्नद्धं सदाकाशे दिवारात्रमतिष्ठत्।

తా॥ బ్రాహ్మణ కుమారుడైన తారకుడు తన శక్తిచే పక్ష్యాకారముగ ఒక పెద్ద విమానమును నిర్మించెను. అది పంద్రెండువేల యోజనముల దూరము ప్రయాణము చేయును. దానియందుంచిన బరువును గూడ మోయును. అది యాకాశమున రేయింబవళ్ళు సిద్ధముగానున్నది.

Taraka with the powers of his penance built a helicopter round in shape. It could travel twelve thousand *yojanas* carrying people in it. It was ready to take off anytime into the sky.

३७. अस्थान्यामिति स उवाच भूमिदेवः सर्वे मां श्रुणुत सभासदो महान्तः।
वात्सल्यादिह गुरुणेव साधुशिष्यः स्निग्धो मेऽक्रियत महीभृताऽऽत्मतुल्यः।।

व्या :- अस्थान्यामिति :- सः भूमिदेवः भूसुरः तारकः, आस्थान्यां सभायाम्, इत्थम्, उवाच अवोचत्, सर्वे समस्ताः महान्तः पूज्याः, सभासदः सभास्ताराः!, मां, शृणुत आकर्णयत, इह अत्र, वात्सल्यात् प्रीत्याः, गुरुणा आचार्येण, साधुशिष्य इव योग्यच्छात्र इव, महीभृता सार्वभौमेन, मे मम, स्निग्धः वयस्यः, राजपुत्र इत्यर्थः। "स्निग्धो वयस्यस्सवयाः" इत्यमरः, आत्मतुल्यः स्वसमानः, अक्रियत अकारि, उपमा।

प्रयाणारम्भसमये स तारकः सामाजिकानुद्दिश्य, भोस्सभास्ताराः! मद्वचनान्याकर्णयत, यथा गुरुरात्मशिष्यं वात्सल्यादात्मसमानं करोति तथा अयं सार्वभौमः मन्मित्रमात्मतुल्यमकरोत्।

తా॥ ప్రయాణారంభ సమయమున ఆ తారకుడు సభలో సభాసదుల నుద్దేశించి, ఓ సామాజికులారా! నా మాటలను వినుడు. గురువు వాత్సల్యముతో ఉత్తమశిష్యుని తనతో సమానునిగ గావించునట్లు ఈ సార్వభౌముడు నాప్రియ మిత్రుని

In Public domain. Digitization Muthulakshmi Research Academy

అభిమానముతో తనతో సమానుని గావించెను. అనగా భారతదేశమునకు సార్వభౌమునిగా జేసెను.

Before they were to set off for their journey back, *Taraka* addressed the people in the court, "Hey civilians! Kindly listen to me. As a guru affectionately elevates his disciple's status to that of his, this monarch regards this prince and gave him an equal status. "This implies he nominated the prince as the monarch of Bharata kingdom.

३८. तां जीवान्तकशकबाणपातितां द्विट्रुसं रुद्धाम्बहु रुदतीं स निर्गताशाम् ।
रक्षित्वेदृशमनुकम्पया मुमोच स्वेच्छायै श्रुतिमतपुण्यभूमिहंसीम् ॥

व्या :- तामिति :- सः सार्वभौमः, जीवान्तकाः प्राणापहारिणः ये शकाः शकदेशीयाः तेषां बाणैः शरैः पातितां पतितां, द्विट्रुसं रुद्धां शत्रुसमाक्रान्तां, बहुभृशं, रुदन्तीं दुःखितां, निर्गताशां निराशां, श्रुतिमता वेदसम्मता या पुण्यभूमिः भारतावनिः, तामेव हसीं हंसाङ्गनाम्, ईदृशम् इत्थं, रक्षित्वा संरक्ष्य, अनुकम्पया दयया, स्वेच्छायै स्वच्छन्दसञ्चाराय, मुमोच अमुञ्चत्, रूपकालङ्कारः।

क्रूरबाणविद्धां शत्रुसमाक्रान्तां जीविते निराशां रुदन्तीं हंसाङ्गनामिव शकराजन्यशरविद्धां शत्रुराजन्यसंरुद्धां मुहुर्मुहुर्दुःखितां निराशां भारतावनिं रक्षित्वा अयं सार्वभौमः कृपया स्वच्छन्द सञ्चाराय मोचयामास।

తా॥ ప్రాణాంతకుల బాణము దెబ్బలనుదిని, నిరాశతో దుఃఖించుచున్న హంసాంగనను గరుణించి స్వేచ్ఛగా ఎగురుటకు విడిపించినట్లు ఈ చక్రవర్తి శకరాజన్య బాణవిద్ధయై శత్రుసంరుద్ధయై దుఃఖాక్రాంతయై ఆశావిరహతయైయున్న భారతావనికి ముక్తినిచ్చి, స్వాతంత్ర్యము నొసంగి ఉద్ధరించెను.

Like a despondent swan hurt by hunter's arrows is set free to fly free again, the crest fallen Bharata is liberated from the *Saka* kings who populated the land tormenting and targeting it.

In Public domain. Digitization Muthulakshmi Research Academy

३९. अन्योन्यान्तरकलहैर्निजात्मजानां तां वेदप्रियभयकृच्छकेशशिष्ट्या ।
सन्त्रस्तां सुखयति भाग्यदेववत्स क्ष्मानाथो बुधनुतकर्मभूमिसाध्वीम् ॥

व्या :- अन्योन्येति :- निजात्मजानां स्वीयपुत्त्राणाम्, अन्योन्यं परस्परं, आन्तरकलहैः अन्तःकलहैः, वेदप्रियाणाम् अभिमतवेदानां, द्विजानामित्यर्थः, भयकृत् भयङ्करा या शकेशशिष्टिः शकराजन्यशासनं, तया च, सन्त्रस्ताम् अतिभीतां, तां, बुधनुतां विबुधश्लाघ्यां कर्मभूमिरेव साध्वी पतिव्रता तां, सः क्ष्मानाथः सोऽयं सार्वभौमः, भाग्यदेववत् भाग्यदेवतेव, सुखयति सुखितां करोति, उपमागर्भितो रूपकालङ्कारः।

स्वपुत्त्राणामन्तःकलहेन दुष्टस्वपतिशासनेन च यथा पतिव्रता दुःखमनुभवति तथा प्रजानामन्तःकलहेन, दुष्टशकाधीश्वरशासनेन च भारतावनिः पीडिता दुःखमनुभवति स्म, तामिदानीमयं सार्वभौमः दुःखनिर्मुक्तां कृत्वा सुखितामकार्षीत्।

తా॥ తన కుమారులు లోలోన కలహించుకొనుచుండ, పతిదుష్టుడై తన్ను శాసించుచుండ, పతివ్రతయగు కాంత ఎట్లు దుఃఖించునో అట్లే భారతభూమియు స్వప్రజల అంతఃకలహములచేతను, క్రూరుడైన శకాధీశ్వరుని శాసనముచేతను, మిక్కిలిగా బాధపడుచున్నది. దానిని ఈ సార్వభౌముడు కనికరించి, దుఃఖవినిర్ముక్తను గావించి సుఖవంతురాలను గావించెను.

With civic fights, and the *Saka* king who is a dictator, the Bharata land has had a pathetic plight like a woman with children fighting among themselves and a dictating husband. This monarch is kind to liberate the land for it to rejoice.

४०. बान्धव्यं रिपुकुलपीडनाय चन्द्रद्वीपस्याऽद्य भवति दिव्यपुण्यभूमेः ।
प्राचीनश्रुतिमतसाधुकर्म सिद्ध्यै सर्वत्र द्विजकुलसम्मदोपलब्ध्यै ॥

व्या :- बान्धव्यमिति :- प्राचीना पुरातना या श्रुतिः वेदः तस्याः मतानि सम्मतानि, वेदविहितानीत्यर्थः, यानि साधूनि कर्माणि सत्कर्माणि तेषां सिद्ध्यै

In Public domain. Digitization Muthulakshmi Research Academy

साधनाय, सर्वत्र सर्वदेशेषु, द्विजकुलस्य द्विजवंशस्य, सम्मदः प्रमोदः, तस्य उपलब्ध्यै प्राप्तये च अद्य इदानीं, चन्द्रद्वीपस्य दिव्यपुण्यभूमेः भरतभूमेश्च, बान्धव्यं बन्धुत्वं, भवति।

अनेन चन्द्रद्वीपभरतवर्षयोः बन्धुत्वसम्पादनेन सकलशत्रुसंहारः सम्भविष्यति। वेदचोदितसत्कर्माणि नित्यं निर्विघ्नं प्रचलिष्यन्ति, सर्वत्र द्विजकुलस्य सम्मोदः सम्भविष्यति।

తా॥ వేదచోదితములైన సత్కర్మముల నాచరించుటకును, అన్నిచోట్ల ద్విజకులము సంతోషముగనుండుటకును, సకల శతృవులను నిర్మూలించుటకును, నేడు చంద్రద్వీప భరతవర్షములకు బంధుత్వమేర్పడినది.

To do good deeds as prompted by the Vedas, to keep the Brahmins happy all over, to knock down rivals, today *Chandradveepa* and Bharata have cordial relations".

४१. जामातुः प्रियतमकर्मभूमिलक्ष्मीं प्रापय्य त्वमनुज शीघ्रमेहि धीमन् ।
शासित्वेत्युरुहरणं निजात्मजायै दत्त्वैट्ट द्विजयुगलं स सार्वभौमः ॥

व्या :- जामातुरिति :- सः सार्वभौमः चक्रवर्ती, हे धीमन् अनुज ! बुद्धिमन् सोदर ! जामातुः दुहितुः पत्युः, प्रियतमाम् अतिप्रियां कर्मभूमिलक्ष्मीं भारतवर्षश्रियं, प्रापय्य प्राप्य, शीघ्रं द्रुतम्, एहि आगच्छ, इति एवं, शासित्वा आज्ञाप्य, निजात्मजायै स्वदुहित्रे, हरणं यौतकम्, उरु अधिकं, दत्त्वा वितीर्य, ''यौतकादि तु यद्देयं सुदायो हरणञ्च तत्'' इत्यमरः, द्विजयुगलं कुमारद्वयम्, ऐट्ट नुनाव। ईड स्तुतौ, लङ् प्रथमपुरुषैकवचनम्।

हे सोदर ! एवं जामातरं कर्मभूमिराज्ये अभिषिच्य त्वं शीघ्रमेवागच्छ, इत्युक्त्वा, स्वपुत्रिकायै अधिकं हरणं दत्त्वा स सार्वभौमः द्विजराजकुमारद्वयमस्तावीत्।

తా॥ భరతభూమికి సార్వభౌమునిగా మన అల్లునకు పట్టాభిషేకముగావించి, నీవు వేగముగా తిరిగిరమ్ము అని తన సోదరునితోజెప్పి, తన కూతునధికముగ నరణమునిచ్చి, ఆ సార్వభౌముడా ద్విజరాజకుమారుల ఇరువురను కొనియాడి విడిచెను.

In Public domain. Digitization Muthulakshmi Research Academy

The monarch told his brother to be with the newlyweds till the coronation ceremony and then to return. Gave away his daughter a lot of money and gifts and bid adieu.

४२. आकाशाध्वनि युवराजमुद्धरन् स क्ष्मादेवं तरुणवधूवरौ पतित्री ।
सण्डीय द्रुतमपि योजनार्धमूर्ध्वं सायं प्राग्दिशमसृपन्मनोजवेन ॥

व्या :- आकाशाध्वनीति :- सः पतत्री पक्षिरूपं तद्विमानं युवराजं सार्वभौमसोदरं, क्ष्मादेवं भूसुरं तारकं, तरुणवधूवरौ नूतनदम्पती च, उद्धरन् उद्वहन्, आकाशाध्वनि गगनमार्गे, ऊर्ध्वम् उपरि, योजनार्धम् अर्धयोजनं, क्रोशद्वयमात्रमित्यर्थः, द्रुतमपि शीघ्रमेव, सण्डीय उड्डीय, सायं सायङ्काले, मनोजवेन मनोवेगेन, प्राग्दिशं प्राचीमाशाम्, असृपत् ससर्प।

युवराजेन तारकेन नूतनदम्पतीभ्यां च सहितं तद्विमानम् ऊर्ध्वं क्रोशद्वयं गगनमार्गे उड्डीय मनोवेगेन सायङ्काले प्राचीं दिशं ययौ।

తా॥ ఆ విమానము యువరాజును తారకుని నూతన దంపతుల నెక్కించుకొని, ఆకాశమున అర్ధయోజనము మీదికెగిరి, మహావేగముతో సాయంకాలమగుసరికి తూర్పుదిక్కును చేరెను.

The helicopter took off after *Taraka*, the monarch's brother, the bride and groom boarded it. The flight was fast and reached the east by evening.

४३. आकीटं कृशमपि भौमवस्तुजालं दृग्यन्त्रैस्सपदि विलोक्य तैर्दविष्ठम् ।
संस्पृष्टैर्निरुपमसौख्यदानिलेनेव स्वप्नेऽद्भुतगतिरन्तराऽन्वभावि ॥

व्या :- आकीटमिति :- आकीटं कीटकादिकमारभ्य, कृशमपि सुसूक्ष्ममपि, दविष्ठम् अतिदूरस्थितं, भौमवस्तुजालं भूतलस्थितवस्तुसमूहः, दृग्यन्त्रैः दूरदर्शनीयन्त्रविशेषैः, सपदि सद्यः, विलोक्य दृष्ट्वा, निरुपमसौख्यदः अतुलसुखदायकः यः अनिलः वायुः तेन संस्पृष्टैः सेवितैः, तैः तारकयुवराजादिभिः, स्वप्ने इव

In Public domain. Digitization Muthulakshmi Research Academy

स्वप्नावस्थायामिव, अन्तरा हृदये, अथवा मध्यदेशे अन्तराले, अद्भुतगतिः अद्भुतगमनम् अन्वभावि, अन्वभूयत, उपमा।

गगनमार्गे सुखदेन मरुता सेव्यमानास्ते राजपुत्रादयः दूरदर्शिनी यन्त्रेण भूमिष्ठं दविष्ठं सुसूक्ष्ममपि वस्तुजालं पश्यन्तः स्वप्नदशायामिव अद्भुतगतिमन्वभूवन्।

తా॥ ఆకాశమార్గమున పోవుచున్న ఆ రాజకుమారాదులు, భూమిపై మిక్కిలి దూరముగానున్న చిన్న చిన్న క్రిమికీటకాదులను గూడ దూరదర్శిని యంత్రముచే, చూచుచు, చల్లనిగాలి సుఖముగ దగులుచుండ, స్వప్నముననుభవించునట్లు ఆ ప్రయాణము ననుభవించిరి.

Travelling by air, looking at the minute creatures too with a telescope, those on board enjoyed the cool breeze and it was like a dream for them.

४४. सम्भूयान्नृपतनयस्य तारकस्येत्यायुष्यं महितसुखं स तोरणेषु ।
लेखित्वा विबुधपुरीजनो महेनाभ्युत्थानप्रमुदितमानसो बभूव ॥

व्या :- सम्भूयादिति :- सः विबुधपुरीजनः विबुधनगरपौरजनसमूहः, नृपतनयस्य राजकुमारस्य, तारकस्य भूसुरकुमारस्य तारकस्य च, आयुष्यं चिरायुः, महितसुखं दिव्यसुखं च, सम्भूयात् सम्यक् भवतात् इति एवं, तोरणेषु बहिर्द्वारेषु, लेखित्वा विलिख्य, महेन उत्सवेन, ''मह उद्धव उत्सवः'' इत्यमरः। अभ्युत्थानं प्रत्युद्गमनं तेन प्रमुदितं सन्तुष्टं मानसं स्वान्तं यस्य सः, अभ्युत्थानोत्सुक इत्यर्थः, बभूव आसीत्।

तारकराजपुत्राद्यागमनवार्तां श्रुत्वा पौरजनसमूहः विबुधनगरे बहिर्द्वारेषु द्विजराजपुत्रयोरायुस्सुखे सम्पूर्णे भूयास्तामिति विलिख्य उत्सवेन तान् प्रत्युद्गन्तुमुद्युक्तो बभूव।

తా॥ తారక రాజకుమారులు తిరిగి వచ్చుచున్నారని తెలియగనే విబుధనగరపుర ప్రజలందరును బహిర్ద్వారములందు రాజకుమారునకు తారకునకును చిరాయు స్సుఖములు కలుగుగాతమని వ్రాసి, వారినుత్సవముతో ఎదుర్కొని తోతేర నుద్యుక్తులై యుండిరి.

In Public domain. Digitization Muthulakshmi Research Academy

With the message that *Taraka* and the prince were returning, the people of *Vibudha* with placards hailing the two were waiting to receive them.

४५. स्वाधीनेऽत्र सकलचक्रवर्तिसैन्ये सङ्कीर्णेऽखिलभुवने निजप्रतापे ।
आयातीति नृपसुतस्सबन्धुमित्रस्तेऽनन्दन् विबुधपुरीजना वदन्तः ॥

व्या :- स्वाधीन इति :- ते विबुधपुरीजनाः विबुधपुरवासिनो मानवाः, अत्र भरतवर्षे, सकलचक्रवर्तिसैन्ये सर्वस्मिन् सार्वभौमसैन्ये, स्वाधीने स्ववशे सति अखिलभुवने लोके सर्वत्र, निजप्रतापे स्वीयतेजसि, सङ्कीर्णे व्याप्ते सति, नृपसुतः राजपुत्रः, सबन्धुमित्रः बन्धुमित्रसहितः आयाति आगच्छति, इति एवं, वदन्तः आलपन्तः अनन्दन् अतुष्यन् ।

अस्मद्राजपुत्रस्य भारतदेशस्थितं सर्वं सार्वभौमसैन्यं स्वाधीनमभूत्, स्वीयप्रतापः निखिलभुवने व्याप्तो बभूव, बन्धुमित्रादिसहितः राजपुत्रः आगच्छति, इति कथयन्तः सर्वे विबुधपुरवासिनः परमानन्दमविन्दन्।

తా॥ భారతదేశమందున్న సార్వభౌముని సైన్యమంతయును స్వాధీనము గావించుకొని, నిజప్రతాపమును లోకమునందంతట వ్యాపింపజేసికొని, మన రాజకుమారుడు బంధుమిత్రాదులతో కలిసి వచ్చుచున్నాడని చెప్పికొనుచు, విబుధపురవాసులందరును పరమానందభరితులైరి.

The people of *Vibudha* were extremely happy to know that their prince having taken control of all the army that belongs to Bharata, is now world famous for his valour and that he is returning with his close associates.

४६. स्वच्छन्दं श्रुतिगदितं यथेष्टकर्माप्रोम्यात्माभिलषितजीवनं पुनस्स्यात् ।
षट्कर्मेति विबुधपत्तनेऽवगल्भाश्चक्रे पावनमुपचित्य गार्हपत्यम् ॥

व्या :- स्वच्छन्दमिति :- श्रुतिगदितं वेदविहितं, यथेष्टकर्म स्वाभिलषितं कर्मविशेषं, स्वच्छन्दं निरुपद्रवं, स्वैरमित्यर्थः। आप्नोमि लभे, पुनः भूयः आत्माभिलषितं

In Public domain. Digitization Muthulakshmi Research Academy

आत्मन इष्टं जीवनं वर्तनं, स्यात्, भवेत्, इति एवं, षट्कर्मा यागाचरणशीलो ब्राह्मणः, "असौ षट्कर्मा यागादिभिर्युतः" इत्यमरः, विबुधपत्तने विबुधनगरे पावनं पवित्रं, गार्हपत्यं गृहस्थाश्रमम् अथवा गार्हपत्याग्निं, गृहस्थेनाराधितोऽग्निर्गार्हपत्य इत्युच्यते उपचित्य संवर्ध्य अपगल्भाञ्चक्रे रक्षयामास।

तस्मिन्नगरे यज्वा विप्रः, वेदोक्तं कर्म अहमितःपरं स्वेच्छया करिष्ये, स्वाभिलषितं वर्तनं पुनः प्राप्स्यामि, इति निश्चित्य, गार्हपत्याग्निं गृहस्थाश्रमं वा उद्धृत्य संवर्धयामास।

తా॥ ఆ విబుధనగరమున యజ్ఞశీలుడైన బ్రాహ్మణుడు, నాకు వేదోక్తకర్మములను స్వేచ్ఛగా నాచరించుకొను నవకాశము లభించినదనియు, స్వాభిలషిత జీవనమును మరల అనుభవింపవచ్చుననియును, తలపోయుచు గృహస్థాశ్రమమును గార్హపత్యాగ్నిని ఉద్ధరించి వృద్ధినందించుచుండెను.

The religious Brahmins who do *yagnas* are happy that now they have the freedom to perform their duties without any opposition and that they can live according to their wish.

४७. पुण्येनाखिलभारतावनीजनानां राजन्य प्रियतनयस्सदारमित्रः ।
सौधेऽवातरदचिरेण नाकयानात्प्रत्यूषे निजपितृचुम्बितो यशस्वी ॥

व्या :- पुण्येनेति :- अखिलभारतावनीजनानां सर्वेषां भारतीयानां मनुष्याणां, पुण्येन पुण्यफलेन, राजन्यप्रियतनयः राज्ञः प्रियपुत्रः सदारमित्रः दारैः भार्यया मित्रेण तारकेण सहितस्सन्, अचिरेण शीघ्रं नाकयानात् विमानात्, प्रत्यूषे अहर्मुखे सौधे प्रासादे, अवातरत् अवततार यशस्वी कीर्तिमान्, सः, निजपित्रा स्वजनकेन चुम्बितो बभूव, पिता तं पुत्रं चुचुम्बे।

भारतीयानां भाग्यवशेन स राजपुत्रः सदारमित्रः प्रातःकाले सौधेऽवातरत्, स्वपित्रा चुम्बितोऽप्यभवत्।

In Public domain. Digitization Muthulakshmi Research Academy

తా॥ ఆ రాజకుమారుడును భారతీయ భాగధేయ ఫలప్రభావమున గుశలియై భార్యతో తమ మిత్రుడైన తారకునితోడను గూడి సుఖముగ తెల్లవారునాక మేడపై దిగెను. తండ్రియు ఆతని దగ్గరగా తీసికొని ముద్దిడెను.

The prince had his share of luck of Bharata Empire and so, he with his wife and *Taraka* landed on the terrace of the palace by morning. The father kissed his son in pride.

४८. तिष्ठद्गु क्षितिपसुतं स चक्रवर्तिभ्राता प्राज्यभरतवर्षपालनाय ।
भूदेवैर्जननुतमभ्यषीषिचत्तं द्राक्सिंहासनमधिरोपयन् कृतज्ञः ॥

व्या :- तिष्ठद्गिवति :- कृतमुपकारं जानातीति कृतज्ञः सः चक्रवर्तिभ्राता सार्वभौमसोदरः, युवराजः जननुतं जनैश्श्लाघ्यमानं तं क्षितिपसुतं राजकुमारं, तिष्ठद्गु गोदोहनकाले ''तिष्ठद्गु प्रभृतीनि च'' इत्ययेन तिष्ठद्गुशब्दो निपातितः तिष्ठन्त्यः गावः यस्मिन् सः तिष्ठद्गु, गोदोहनकालः प्रथमा सामानाधिकरण्यात् अप्राप्तः शता अव्ययीभावश्च निपात्यते। पूर्वपदस्य पुंवद्भावः ''गोस्त्रियो-रुपसर्जनस्ये''ति ह्रस्वः। विशिष्टात्सुपो लुक्, प्राज्यं प्रभूतं यत् भरतवर्षं तस्य पालनाय, संरक्षणाय सिंहासनं सिंहपीठम्, अधिरोपयन् भद्रपीठे निवेशयन्, भूदेवैः, भूसुरैः, अभ्यषीषिचत्, अभिषेचयति स्म।

चन्द्रद्वीपाधिपतिसोदरः कृतज्ञस्सन् भरतवर्षराजकुमारं सिंहासने निवेश्य, भारतभूपरिपालनाय शीघ्रं ब्राह्मणैः मन्त्रपूर्वकम् अभिषिक्तं कारयामास।

తా॥ కృతజ్ఞుడైన ఆ చంద్రద్వీపాధిప సోదరుడు భరతవర్ష రాజకుమారుని సింహాసనముపైనుంచి భరతవర్షమునంతను పాలింపుమని పలుకుచు, మంత్ర పూర్వకముగ బ్రాహ్మణులచే పట్టాభిషిక్తుని గావించెను.

The brother of the monarch coroneted the prince religiously as the emperor of the whole Bharata kingdom, as the Brahmins were reciting mantras.

In Public domain. Digitization Muthulakshmi Research Academy

४९. गोविप्रानव निगमोक्तधर्मरीत्या साम्राज्यं चिरमिह पालयेत्युदित्वा ।
भूषित्वाऽश्चितमकुटेन मित्रशीर्षं कर्तेत्थं स्म भवति तारको नृपाणाम् ।।

व्या :- गोविप्रानिति :- गावः धेनूः विप्रान् ब्राह्मणान् अव रक्ष, निगमोक्तधर्मरीत्या वेदविहितधर्ममार्गेण, साम्राज्यं सार्वभौमत्वं, चिरं चिरकालम्, इह अत्र, पालय परिपालय, इति उदित्वा एवमुक्त्वा, अश्चितमकुटेन पूज्यकिरीटेन, मित्रशीर्षं वयस्यमूर्धानं, भूषित्वा अलङ्कृत्य, तारकः भूसुरकुमारः. इत्थम् एवं, नृपाणां कर्त्ता राज्ञां निर्माता, बभूव अभूत्।

गोब्राह्मणान् संरक्षय, वेदचोदितधर्ममार्गेण भूमण्डलं परिपालय, इत्युक्त्वा परार्थ्यकिरीटेन तस्य राजकुमारस्य मूर्धानमलञ्चकार स तारकः, एवमसौ तारको राजनिर्माताऽसीत्।

తా॥ గోవులను బ్రాహ్మణులను రక్షింపుచుండుము. చక్రవర్తివై భారతభూమిని చిరకాలము వేదోక్త ధర్మపద్ధతి ననుసరించి పాలింపుము అని పలుకుచు ఆ తారకుడు తన మిత్రుడైన రాజకుమారుని తలపై కిరీటమునుంచెను. ఈ తీరున తారకుడు రాజనిర్మాతయయ్యెను.

"Save the cows. You being the emperor ensure that your ruling is as per the dharma endorsed by the Vedas, and rule for long", saying thus he crowned the prince.

५०. राजन्यो जननुतसार्वभौमपुत्रीजानिः प्राज्यभरतवर्षचक्रवर्ती ।
आस्थानोपगतसमस्तभारतीयक्षोणीशान्प्रियवचनान्यवोचदित्थम् ।।

व्या :- राजन्य इति :- जननुतः जनश्लाघ्यः सार्वभौमपुत्री जाया यस्य सः, सार्वभौमपुत्रीजानिः, सार्वभौमजामातेत्यर्थः। "जायाया निङिति" पाणिनिः, प्राज्यं प्रभूतं यत् भरतवर्षं तस्य चक्रवर्ती, नूतनभरतवर्षसम्राडित्यर्थः, राजन्यः अयं राजकुमारः, आस्थानं सभामन्दिरम् उपगताः प्राप्ताः समस्ताः सर्वे ये भारतीयक्षोणीशाः भरतवर्षपालका राजानः तान्, प्रियवचनानि प्रियवाक्यानि, इत्थम् एवं वक्ष्यमाणरीत्या, अवोचत् उवाच।

In Public domain. Digitization Muthulakshmi Research Academy

चन्द्रद्वीपसार्वभौमजामाता भरतवर्षनूतनसार्वभौमः सः राजकुमारः सभामन्दिर-समुपविष्टान् सर्वान् भरतवर्षराजन्यानुद्दिश्य, एवं प्रियहितवचनान्यवोचत्।

తా॥ చంద్రద్వీపసార్వభౌముని అల్లుడును నూతన భరతవర్ష సార్వభౌముడునగు ఆ రాజకుమారుడు, తన సభలోనున్న భరతవర్ష రాజులందరినుద్దేశించి ఈ క్రింది విధమున ప్రియవచనములను పలికెను.

The son-in-law of the monarch of *Chandradveepa,* the new emperor of Bharata kingdom gave his inaugural speech thus-

५१. भोभोस्सुप्रजस इलेश्वरा महान्तः श्रुण्वन्तु प्रथितसभासदो भवन्तः ।
मामित्थं विरचितवान् स चक्रवर्ती स्वच्छन्दाधिपमिह सर्वकर्मभूमेः ॥

व्या :- भोभो इति :- सुप्रजसः योग्यप्रजासमुपेताः ''नित्यमसिच् प्रजामेधयो'' रित्यसिच्, महान्तः महानुभावाः इलायाः भूमेः ईश्वराः प्रभवः भूपतयः प्रथितसभासदः प्रख्यातसामाजिकाः भवन्तः यूयं श्रुण्वन्तु आकर्णयन्तु, सः चक्रवर्ती चन्द्रद्वीपाधिपतिस्सार्वभौमः, इह अत्र, सर्वकर्मभूमेः समग्रभारतवर्षस्य, मां स्वच्छन्दाधिपं स्वतन्त्रं सार्वभौमम्, इत्थम् एवं, विरचितवान् अकरोत्।

भोभो राजन्यश्रेष्ठास्सभासदः ! सर्वे भवन्तः मदीयं वचनं शृण्वन्तु, स चन्द्रद्वीपाधिपस्सार्वभौमः मामित्थमिदानीं भरतवर्षसार्वभौममकार्षीत्।

తా॥ ఓ సభాసదులైన రాజన్య శ్రేష్ఠులారా ! మీరు ప్రసిద్ధులరు, మహానుభావులు, చక్కని ప్రజలుగలవారలు. భూమిని పాలించు ప్రభువులు. మీరందరును నా మాటలను వినుడు. ఆ చంద్ర ద్వీపాధిపతియగు చక్రవర్తి నన్ను ఇప్పుడీవిధముగ భరతవర్షమునకు సార్వభౌమునిగ పట్టాభిషిక్తుని గావించెను.

"Greetings to the feudatory chiefs and neighbouring kings! You are all famous kings and your subjects are good and decent. Listen to me. As you all know by now the monarch of *Chandradveepa* has made me the emperor of Bharata.

In Public domain. Digitization Muthulakshmi Research Academy

**५२. कारुण्यादिह सुदिवा वयं स्वतन्त्राः श्रीमन्तो बुधनुतचक्रवर्तिनस्स्मः ।
कुर्वाणास्सततपरस्परानुकूलं सुख्यामागमनियतात्मराजकृत्यम् ॥**

व्या :- कारुण्यादिति :- बुधनुतचक्रवर्तिनः प्रशस्तसार्वभौमस्य, कारुण्यात् कृपया, इह इदानीं, वयं सुदिवाः सुदिनाः, शोभनं दिवा येषां ते सुदिवाः। भाग्यशालिन इति भावः। ''दिवाह्नी''त्यमरः, वयं स्वतन्त्राः स्वच्छन्दजीविनः, श्रीमन्तः सम्पदुपेताः, बुधनुताः विबुधश्लाघनीयाः चक्रवर्तिनस्सार्वभौमाश्च, स्मः अभूम, वयं, सततं सन्ततं, परस्परानुकूलम् अन्योन्यानुकूलं यथा तथा, आगमनियतं, शास्त्रसम्मतम् आत्मराजकृत्यं स्वराज्यपरिपालनं, कुर्वाणाः कुर्वन्तः सुख्याम सुखमनुभवाम।

सार्वभौमानुग्रहेण वयं श्रीमन्तः स्वतन्त्राः चक्रवर्तिनः अभूम। इतःपरं वयमन्योन्यानुकूलं स्वराज्यपालनं यथाशास्त्रं कृत्वा सुखं जीवाम।

తా॥ సార్వభౌముని అనుగ్రహమున మనము శ్రీమంతులము స్వతంత్రులమునైతిమి. సర్వజన శ్లాఘనీయులమునైతిమి. మనమందరము ఒకరితో ఒకరము సహకరించుకొనుచు, సమకూలురమై శాస్త్రవిహిత పద్ధతిని మన రాజ్యమును పాలించుకొనుచు సుఖముగా జీవించెదము.

With the blessings of the monarch we obtained freedom, we have become opulent and praiseworthy. Let us all help one another and let our governance go by the rules endorsed by the scriptures and let us thus live harmoniously and happily.

**५३. शुभ्रांशुं रविरिव मामधीदिपद्यो नामाद्याऽप्रथयत सार्वलौकिकं मे ।
सर्वज्ञो द्विजमणिरुष्णरश्मितेजाः श्रीमान्सैष भरतवर्षभाग्यदेवः ॥**

व्या :- शुभ्रांशुमिति :- यः रविः सूर्यः शुभ्रांशुमिव चन्द्रमिव, ''विधुस्सुधांशुश्शुभ्रांशु'' रित्यमरः। माम् अधीदिपत् प्राकाशयत, यः, मे मम, नाम नामधेयं, सार्वलौकिकं सर्वलोकव्याप्तं यथा तथा अप्रथयत प्रथयामास, स एषः सोऽयं

In Public domain. Digitization Muthulakshmi Research Academy

तारकः, सर्वज्ञः सर्वविज्ञानवेत्ता, द्विजमणिः भूसुररत्नम्, उष्णरश्मेः सूर्यस्य तेजः इव तेजः प्रतापः यस्य सः, सूर्यसमानतेजस्कः, श्रीमान् शोभायुक्तः, भरतवर्षस्य भरतभूमेः, भाग्यदेवः अदृष्टदेवतैव। उपमालङ्कारः, रूपकञ्च।

आदित्यः यथा स्वकिरणैश्चन्द्रमुद्दीपयति तथा अयं तारकः मां तेजस्विनमकार्षीत्, किञ्च मन्नामधेयं सकललोकविदितमतनोत्, एष सर्वज्ञः रविरिव तीव्रप्रतापः। अयं ब्राह्मणरत्नं भरतवर्षभाग्यदेवतैव।

తా॥ సూర్యుడు తన తేజస్సునిచ్చి చంద్రుని కాంతిమంతునిగా ఒనరించినట్లు, ఈ తారకుడు తన మహిమవలన నన్నింతవానిని గావించెను. నాపేరు నలుదిక్కుల ప్రసిద్ధమగునట్లు చేసెను. ఈతనికి తెలియని విద్యలేదు. ఈతడు బ్రాహ్మణజాతిలో రత్నమే. ఈతడు రెండవ సూర్యుడే. భరతవర్షమునకు భాగ్యదేవతయే.

It is the reflection of the sun's light with which the moon shines. *Taraka* with his powers raised me to this status. He made me famous. He is master of every branch of study and is the precious stone among Brahmins. He is the second Sun and a lucky lord for Bharata.

५४. मन्मित्रं मम शरणं मदिष्टदैवं भूदेवं सकलजगद्गुरुं स्वतन्त्रम् ।
नित्यं संश्रितजनतारकं प्रणम्य स्वच्छन्दं पृथुभरतावनिं भुनज्मि ॥

व्या :- मन्मित्रमिति :- मन्मित्रं मम वयस्यं, मम शरणं मद्रक्षकं, मदिष्टदैवं मम अभीष्टदेवं, भूदेवं भूसुरं सकलजगद्गुरुं सर्वलोकाचार्यं, संश्रितजनतारकं, भक्तजनोद्धारकं, स्वतन्त्रं स्वच्छन्दं, तारकं, नित्यं सर्वदा, प्रणम्य नमस्कृत्य, पृथुभरतावनिं विशालभरतवर्षं, स्वच्छन्दं स्वेच्छया, भुनज्मि अनुभवामि।

अयं तारकः मत्सखः। मद्रक्षकः, मदभीष्टदेवः, अयं जगद्गुरुः सर्वतन्त्रस्वतन्त्रः, एवं नित्यमहं प्रणम्य, स्वेच्छया भरतभूमिं पालयामि, तत्सुखमनुभवामि।

తా॥ ఈ తారకుడు నా మిత్రుడు. నా రక్షకుడు, నా దేవుడు, ఈతడు స్వతంత్రుడు. జగద్గురువు, భక్తులనుద్ధరించువాడు, ఈ భూసుర శ్రేష్ఠునకు నిత్యము

In Public domain. Digitization Muthulakshmi Research Academy

నమస్కారములను గావించి, స్వేచ్ఛగా నీ భరతభూమిని పాలించి యా సుఖమును అనుభవింతును.

This man *Taraka* is my friend; my god and guardian; a *Jagadguru*, saviour of his devotees. Let us salute this man who is the best among earthly and celestial beings, every day.

५५. सन्मालामभिनवसार्वभौम इत्थं संस्तुत्वाऽत्मसखमतीव सृज्यमानः ।
कण्ठं न्यक्षिपदभितोऽग्रजातिमौलेः स्थाने भूपतिषु कृतज्ञतामहत्त्वम् ॥

व्या :- सन्मालेति :- अभिनवसार्वभौमः भरतवर्षनूतनचक्रवर्ती स राजकुमारः, आत्मसखं स्वसुहृदम्, इत्थम् एवम्, अतीव अत्यधिकं, संस्तुत्य स्तुत्वा, सृज्यमानः श्रद्धया सम्पादयन्, ''सृजेः श्रद्धोपपन्ने कर्तव्ये वेति वाच्यम्'' इति वचनात्साधुः, अग्रजातिमौलेः विप्रशिरोमणेः, तारकस्य, कण्ठमभितः गलसीम्नि, सन्मालाम् उत्तमां पुष्पस्रजं, न्यक्षिपत् निचिक्षेप, भूपतिषु राजसु, कृतज्ञतामहत्त्वं कृतज्ञतायाः महिमा, स्थाने उचितमेव, स्थाने इत्यव्ययः।

नूतनभरतवर्षसार्वभौमस्स राजपुत्त्रः तारकमेवमभिष्टुत्य, तद्गले अनुत्तमां पुष्पस्रजं न्यक्षिपत्, तद्युक्तमेव राजानस्सर्वदा कृतज्ञा एव भवन्ति। तन्महत्त्वं वर्णितुमशक्यम्।

తా॥ భరతవర్ష నూతన సార్వభౌముడైన యా రాజకుమారుడు తన మిత్రుడైన తారకునిట్లు మిక్కిలిగ గొనియాడి ఆతని మెడలోనొక మంచి పుష్పమాలనిడి ఆతని గౌరవించెను. అది యుక్తమేకదా! రాజులెప్పుడును కృతజ్ఞులైయుందురు. తన్మహిమ వర్ణనాతీతము.

The newly coronated monarch after eulogising *Taraka* garlanded and felicitated him. That is an appropriate thanksgiving to *Taraka* from a grateful friend. This is indescribable.

In Public domain. Digitization Muthulakshmi Research Academy

**५६. द्वेष्टा त्वामिह यदि कोऽपि मन्दभाग्यस्साहाय्यं मम सपदि त्वमर्थयस्व।
भाषित्वेति स दुहितुः पतिं जगाम भ्राताऽत्मालयमथ चक्रवर्तिमौलेः॥**

व्या :- द्वेष्टेति :- इह अत्र, कोऽपि कश्चन, मन्दभाग्यः भाग्यहीनः, त्वां भवन्तं, द्वेष्टा यदि तव शत्रुः भवेच्चेत्, सपदि सद्य एव, मम मे साहाय्यं सहायकत्वम्, अर्थयस्व याचस्व, इति एवं दुहितुः पतिं जामातरं, भाषित्वा उक्त्वा, अथ अनन्तरं, चक्रवर्तिमौलेः भ्राता चन्द्रद्वीपाधिपसोदरः, आत्मालयं स्वभवनं, जगाम अगच्छत्।

तवात्र यदि कश्चनापराधी भवेत् तदा सद्य एव मह्यं निवेदय, तमहं नाशयिष्यामीत्युक्त्वा चक्रवर्तिसोदरः स्वभवनमयासीत्।

తా॥ ఈ భారతవర్షమున భాగ్యహీనుడెవ్వడయిన నీకు విరుద్ధముగ నుండిన యెడల వెంటనే నాకు తెలియజేయుము. నేను నీకు సాయమునుగావించి శత్రునిర్మూలనము చేయుదునని పలికి ఆ సార్వభౌమ సోదరుడు స్వగృహమునకు బోయెను.

"If there is any ill-fated one in this kingdom who rebels against any of you, keep me informed so that I will annihilate the opposing forces", promising thus, the brother of the monarch left for his kingdom.

**५७. उद्यानं तत इव चैत्रिकस्स्वगेहं प्राप्य द्रागभिजनबन्धुवार्धिचन्द्रः ।
स्वीकृत्योचितललनां गृहस्थरायं सन्तानं बहु तनुते स्म तारकोऽसौ ॥**

व्या :- उद्यानमिति :- ततः अनन्तरं, अभिजने कुले ये बन्धवः सम्बन्धिनः त एव वार्धिः समुद्रः तस्य चन्द्रः इन्दुः, चन्द्र इव स्वकुलानन्ददायकः, ''कुलेऽप्यभिजनो जन्मभूमावपी'' त्यमरः, चैत्रिकः मधुमासः, उद्यानमिव उपवनमिव, द्राक् शीघ्रं, स्वगेहं स्वभवनं, प्राप्य आगत्य, गृहस्थानां गेहिनां रायं सम्पदं, गृहलक्ष्मीमित्यर्थः। उचितललनाम् अनुकूलां कान्तां स्वीकृत्य परिणीय, बहु अधिकं, सन्तानं सन्ततिं, तनुतेस्म विस्तारयामास, अधिकसन्तानवान्बभूव।

In Public domain. Digitization Muthulakshmi Research Academy

ततः स्वकुलानन्ददायी स तारकोऽपि उद्यानं मधुमास इव स्वगृहं प्राप्य अनुकूलां कान्तां स्वीकृत्य बहुकुटुम्बी बभूव। उपमालङ्कारः।

తా॥ ఆ తారకుడు కూడ బంధుజనులకు ఆనందదాయియై చైత్రమాసము ఉద్యానవనమును జొచ్చినట్లు తన భవనమును ప్రవేశించి, అనుకూలవతియగు గృహలక్ష్మిని పరిణయమాడి పెద్దకుటుంబియయ్యెను.

The spring enters the pleasure garden. Similarly *Taraka* who brought joy to his family entered his palace, was wedded to a suitable girl and had a big family.

५८. प्राव्राजीद्रुदति न कोऽपि पुण्यभूमौ सर्वत्राखिलमनुजोऽभवत्स्वतन्त्रः।
पद्धत्याऽस्य नहि बभूव दुष्टबाधेत्याशास्ते जनमिदमित्थमेव काव्यम्॥

व्या :- प्राव्राजीदिति :- पुण्यभूमौ भारतावनौ, कश्चिदपि मानवः, रुदति न प्राव्राजीत् रुदन्तं पुत्रादिकमनादृत्य चतुर्थाश्रमं न स्वीचकार, ''यस्य च भावेन भावलक्षणम्'', इति सप्तमी, अखिलमनुजः सर्वोऽपि जनः, स्वतन्त्रः स्वच्छन्दः अभवत् आसीत्, अस्य राज्ञः पद्धत्या परिपालनमार्गेण, दुष्टबाधादिचोराद्युपद्रवः, न हि बभूव नासीत्, इदं काव्यम् अयं ग्रन्थः जनं जनसमूहम्, इत्थमेव वक्ष्यमाणरीत्या, आशास्ते आशिषं ददाति।

तन्नूतनसार्वभौमस्य पालनसमये भरतभूमौ कोऽपि मानवः दारपुत्रादिक मनादृत्य सन्यासं न स्वीचकार, तेषामनुमतिमुपलभ्यैव परिव्राड्बभूव। कुत्रापि जारचोरादिदुष्टबाधाः न बभूवुः, एतत्काव्यमपि वक्ष्यमाणरीत्या एवमेव आशास्ते।

తా॥ ఆ నూతన సార్వభౌముని పాలనమున భరతభూమియందు భార్యాపుత్రాదులు దుఃఖించుచుండగా సన్న్యసించువారు లేరు. జారచోరాది దుష్టబాధ లెచ్చటను గానరావు. ఈ కావ్యముగూడ నిట్లే జనుల నాశీర్వదించుచున్నది.

The governance of the new emperor saw no man embracing *sannyasa,* deserting his wife and children leaving them desolated. There were no robberies no illegitimate

In Public domain. Digitization Muthulakshmi Research Academy

children and no wicked people. This work too blesses the people to be free from all afflictions and be happy.

शार्दूलविक्रीडितम्

५९. भव्यं नागरविक्रमं गजहयं ज्ञानब्रुवाणश्रुतिं भक्तिं राजितजन्यरङ्गजयनं भोगक्रियोदारताम् ।
जग्धिं यज्ञिययत्नकृद्द्विजवराचारं प्रभासः क्षमां माम्बन्धो भवनं भवान्व्रजतु सूतिम्बोधतां भद्र माम् ॥

इति ब्रह्मश्री मदज्ञाडादिभट्टनारायणदासमहाकविविरचिते तारकाख्ये महाकाव्ये सम्पूर्णं काव्यम् ।

व्या :- भव्यमिति :- बन्धो हे बान्धव ! भवान् त्वं भव्यं कुशलं, "भव्यं कुशलं क्षेममस्त्रियाम्" इत्यमरः। नागरविक्रमं नगरजनाक्रमणं, गजहयं गजाश्वादिसम्पदं, सेनाङ्गत्वादेकवद्भावः ज्ञानम् आत्मज्ञानं, "मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयो" रित्यमरः, तत् ज्ञानं ब्रुवाणा कथयन्ती या श्रुतिः वेदः ताम् आत्मावबोधक-वेदज्ञानमित्यर्थः, भक्तिं पूज्येष्वनुरागं, राजितः प्रकाशितः यः जनरङ्गः युद्धरङ्गः, तत्र जयनं जयं, "जयनेजयः" इत्यमरः, भोगक्रियायां सुखसम्पादनादिव्यापारे, उदारताम् औदार्यबुद्धिं, जग्धिं भोजनं, "जग्धिस्तुभोजन" मित्यमरः। यज्ञाय अर्हं यत् कर्म तत् यज्ञियं तस्य कृतः कर्तारः ये द्विजवराः विप्रश्रेष्ठाः तेषामाचारं, यज्वब्राह्मणाचारमित्यर्थः, प्रभासः प्रकृष्टाः भासः कान्तीः कीर्तिविस्तरानित्यर्थः। क्षमां सहनशक्तिम्, अथवा भूमिं, मां लक्ष्मीं, भवनं गृहं, सूतिं सन्ततिं, च व्रजतु गच्छतु प्राप्नोतु, हे भद्र ! भवान् त्वं मां बोधतां बोधस्व।

भो मानव ! मत्पठनेन त्वं कुशलं विक्रमं सम्पदं विद्यां भक्तिं जयं भोगं भोजनं यज्ञाचरणं कीर्तिं क्षमां श्रियं गृहं सन्तानं च प्राप्नुहि। मां सर्वेभ्यो बोधय" इति काव्यमाशास्ते।

తా॥ ఓ మానవుడా! నన్ను జదువుము. దానివలన క్షేమమును నగరజన వశీకరణమును, గజహయాద్యైశ్వర్యమును, ఆత్మజ్ఞానమునిచ్చు వేదవిద్యను, పూజ్యులందు భక్తిని, భగవద్భక్తిని యుద్ధరంగములందు జయమును, భోగానుభవమును,

In Public domain. Digitization Muthulakshmi Research Academy

భోజనమును, యజ్వలయాచారమును మంచి కీర్తిని, ఓరిమిని, భూమిని, లక్ష్మిని, గృహమును, సంతానమును పొందుము. నన్నితరులకు బోధింపుము, అని యీ కావ్యమాశీర్వదించుచున్నది.

సూచన :- ఈ చక్రబంధ పద్యమున మూడవచక్రమున "నారాయణదాస" అను కవినామము, ఆరవచక్రమున 'విజయనగరం' అను నివాసస్థానము ఉపనిబద్ధములు.

"Oh man! read me, for sure you would attain safety, control, over the city folk, the riches like elephants and horses, the education of the Vedas that bestows the knowledge of the self and devotion in the great people and God, victory in the battlefield, enjoyment of all pleasures, good food, good conduct, good fame, patience, earth, wealth, horses and progeny. Teach me to others too" - Thus this Kavya Tarakam blesses us.

एवं ब्राह्मीभूषण ब्रह्मश्री राम्भट्ल लक्ष्मीनारायणशास्त्रिविरचितायां भावार्थदीपिकाख्यायां व्याख्यायां पञ्चमस्सर्गः।

सम्पूर्णमिदं काव्यं

ओं तत्सत्

In Public domain. Digitization Muthulakshmi Research Academy

चक्रबन्धः



(तृतीयचक्रे) नारायणदासः

(षष्टचक्रे) विजयनगरम्

In Public domain. Digitization Muthulakshmi Research Academy

अक्षरक्रमानुगतश्लोकसूची

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
प्रथमस्सर्गः		
अजस्रमौष्ण्यं तनुते दिनेशः	३३	25
अम्बान्यशब्दो नहि वाक्प्रपञ्चे	४८	36
अमम्रदत्त्वीयमनस्सुमाद	५८	42
अस्मिन्कलौ सत्यदयातिरिक्ताः	२३	18
अवाप्तकामं सततात्मतृप्त	४१	31
आनन्दयिष्यामि मदीयभक्ता	२५	19
आयाहि पुत्रेति यदा स्वपित्रा	५२	38
आह्वायि तातेन स जीवकेति	३९	29
इतस्ततस्सुन्दरलोलदृष्टि	५३	39
इत्थं स्तुवन्तं प्रमदाश्रुमन्तं	२१	17
उन्मीलनं तस्य निमीलनं	३१	23
उरूदकुम्भं सहसा दृणन्तं	५७	41
एकं पिबन्मातृपयोधरं स	४२	31
एकत्वसङ्ख्याप्रतिपादकाङ्को	२०	16
कान्भाग्ययुक्तानिह तावकीन	१८	14
कुमारकस्सम्यचिचत्स्वरूपं	५५	40
गत्वा स पीठं कुलदेवताया	३७	28
तदुन्नसं सुन्दरमन्दहासं	४५	34
तस्मादहं तान् बहुमूढचित्ता	२४	19
तौ दम्पती निर्मलशीलयुक्तौ	१०	8

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
तं तस्य पत्नी सुदती प्रशान्ता	८	7
त्रातारमेवार्दयति प्रकृत्या	४६	34
त्वदीक्षणेनात्मनि विश्ववारो	१९	15
त्वया विना किं सुखमस्ति तत्र	१६	13
दृश्याऽप्यदृश्या सदसत्स्वरूपा	१५	12
धरा मनुष्यैः परमार्थदूरैः	१४	12
नखाग्रवज्रैरलकेन्द्रनील	५६	41
नत्वा महादेवमिति ब्रुवन्तं	२८	21
नन्दामि हे देवसभ ! त्वदीय	२२	17
नवरसरुचिवेदी सर्वभूतानुवादी	५९	43
निजात्मनो यस्य कदापि नान्य	३५	26
पुण्यात्मनोस्सद्गृहिणोस्तयोरु	११	9
प्रत्यग्रसान्द्राऽऽनतकैशिकेन	५०	37
प्रभो महादेव दयामयेश	१२	10
प्रवर्धते येन चराचरं तं	२९	22
प्रशस्तयोगान्वितजातकस्य	४०	30
बाल्यं गुरोरध्ययनेन तस्य	७	6
भक्त्यैव तेऽधीश्वर देवताऽपि	१७	14
भक्ताय मूढाय विचक्षणायो	२७	20
भर्त्रा यथा सा कथितं पुराणं	९	8
भूत्वा यथेच्छं प्रकृतेरधीनो	५४	40
भेदो यथा काण्डतरङ्गयोर्न	१३	10

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
मायानिबद्धं मनुजायुरेवं	३०	22
मुखे पदाङ्गुष्ठमसौ निधाय	४४	33
मुदन्वितस्सन्ततसाक्षितत्त्व	३४	26
मुदा यथाशक्त्यतिथीनतर्पीत्	६	5
मुहुर्मयिच्छं कृतमन्दहासै	३८	28
यथार्थवाक्सन्नुतदिव्यतेजा	५	5
यो रक्षकोऽभूद्भुवनस्य जोष	३२	24
यो वेदविश्वासयुतस्समस्तं	४७	35
वक्रालकालङ्कृतफालभागं	४९	36
विन्ध्यप्रदेशे क्वचिदस्ति चञ्च	४	4
विस्मृत्य तत्त्वं मम नित्यसत्य	२६	19
व्योमैकलक्ष्यां स्वदृशं निवर्त्य	३६	27
स देवताधीनमनःप्रवृत्तिः	३	3
सा देवभाषाऽखिललोकमान्या	१	1
स्यात्स्वापनिघ्नस्सकलश्चराणां	५१	38
स्वभावपाण्डित्यबलेन कुर्वे	२	2
हिताहितं सोऽविगणय्य नित्यं	४३	32

द्वितीयस्सर्गः

अकुरुत कुलबाह्यः स्वैरिणीवञ्चको	१६	57
अतुलललितरूपस्सर्ववेदः प्रशान्तः	५	49
अनयदिह कुमार्गं धर्मशून्याधिकारी	१३	55
अनिशमिह पुरा मे क्षत्रियोऽधत्त नाम	३५	71

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
अनुपदमपि वर्णी कथ्यमानं स वृद्धै	११	53
अपि परमरहस्यं ज्ञानवित्तं गुरुभ्योऽ	४	48
अभिनवरुचिरोहाचित्रसत्काव्यसृष्टे	५३	84
अभिनववयसा प्रक्षीबितो न्यायकर्ता	१४	56
अवनिपतिकुमारो धारुणीदेवमौलिं	४१	75
अहरह इह मेषान्कुक्कुटान्योधयित्वा	१८	59
उडुगण इव शिष्टाचारवारोऽप्यराज	४६	79
उदभवदिव कल्यं प्रेम वेदाधिकारेऽ	५५	85
उदवहदिह वृद्धो निर्घृणः क्षीरकण्ठा	३०	67
उरुतरमिह दत्तं पादपूजाधनं चे	२७	65
ऋणमिह पिशुनेनादीयत स्वार्थवृद्ध्यै	२१	61
कवितिलकमुपास्याऽथाच्छगत्यास्य सख्यं	५४	84
करयुगल उदग्रं पर्णदण्डं वलग्रे	२	46
किमपि हितमपश्यन् जीवनोपायमन्यं	२६	64
क्वचिदरमत सोऽयं जालिकव्याधनीचैः	१९	59
गगनमणिरिव स्वच्छन्दभावोऽतिरस्य	४५	78
चतुरतरधरित्रीदेवता वाजिराजं	४७	80
जगदधिपतिमन्वभूय गोपायितुं स्वे	५८	88
जननि तव जनोऽतिक्रम्य वेदोपदेशं	३४	70
जननुतकुलतोऽहं जातवानित्यहंयु	१७	58
तदुपनयनकर्माऽथाकरोत्तस्य तातः	१	1
तरुणपुरुषरत्नं सर्वविद्यासनाथं	४४	77
द्विजतनयमुदारं सर्वविद्यावतारं	५१	82

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
द्रुतलयपरिमेयं गीतमुद्धुद्धतारं	४२	76
नहि कुलगुणविद्याः प्राभवन्गौरवाय	१५	56
निजगुरुपदभक्तं सर्वविद्यानुरक्तं	३	47
परपरिहृतवित्तं सा यथातथ्यवृत्तं	१२	54
परिजन उभयोरन्योन्यसख्यं चिकीर्षो	४३	76
प्रतिहतकुवदानां गन्ध आत्मम्भरीणां	९	52
बहुधनपरधूर्तैः पूरिते धर्मगेहे	२८	65
बहुलधनयुतश्रेद्दीर्घनामाभिधाय	२५	63
मधुरवनपरीता स्वादुपानीयपूता	७	50
रुचिरतरुणदासीमेलको वाजिमेधः	२०	60
रुचिरमुदमनायन्तार्यमालोक्य केचित्	५२	83
रुचिरमुरुगभीरार्थान्वितं तन्निशम्य	३६	72
ललितकुलसतीभिस्साधुशीलान्विताभि	८	51
विकसितलपनेनानन्तरं जाङ्घिकेन	३७	72
विधिनियमितकर्माक्षिप्य शश्वच्छ्ववृत्त्या	२४	62
विनयनमितमूर्धद्वार्स्थितानीक्षमाणः	३९	74
श्रुतिनिगदितमार्गं नाजहान्निर्विशेषं	३२	68
श्रुतिरिपुकुलजाय स्वीयसम्पत्कुमारी	२३	62
श्रुतिसमुदितकन्यादानकालेऽपि मद्यं	२२	61
स उपवनविशेषानद्भुतान्दर्शनीयान्	३८	73
स जगदुपचिकीर्षुस्तर्कयन्नित्युदारः	३३	69
सकलनिगमपुञ्जस्यायमस्यां मृषार्थं	३१	68

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
सकलनिगमबह्यं कर्षकं द्यूतकारं	२९	66
सततमनुचरन्तौ सर्वशास्त्रप्रमाणं	५६	86
सततशमितभावः प्राभवद्भूमिदेवः	१०	53
सपदि स कृतकृत्यं पण्डितं भोजयित्वा	५०	82
समतरुणवयस्कं स्वीयरूपानुकारं	४०	75
सवयसमनिरुद्धं रूपवन्तं कुलीनं	४९	81
स्वयमचिरमुपज्ञावैभवेनोपलभ्या	५७	87
सहजवशमुपेतो लीलया गूढतेजा	६	49
सांयात्रिकमातरेणाऽप्रियेतां नाविकोत्तमम् ।	५९	88
हयवरमथ हित्वा स्वस्तिकं सोऽतिरिच्या	४८	80

तृतीयस्सर्गः

अथैकस्मिन्सुप्रभाते मित्रेण सह तारकः ।	२५	105
अध्यासीनं भद्रपीठं पृच्छन्तं मन्त्रिणः कृतीः ।	५४	121
अन्तर्दधौ मही दूरे प्रज्ञान इव संसृतिः ।	४	92
अन्तस्समुद्रे भूमीध्रास्तस्थुर्नौकापकारिणः ।	१२	98
अन्योन्यमैत्रीं कुर्वन्तस्सञ्जानन्तो यथायथम् ।	३२	109
अन्वग्भावं तरिं निन्ये सत्पथं सखिवन्मरुत् ।	१०	97
अरुच्यं लवणङ्कारं जघान सतृणं जनः ।	२०	103
आकाशयानानि धूमशकटांस्तौ मनोजवान् ।	४२	114
आलोक्य सार्वभौमस्तौ प्रत्युत्थानपुरस्सरम् ।	५५	121
उत्तानेऽब्धिस्सकालुष्याऽस्थिरताऽडम्बरान्वितः ।	९	96

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
उदीच्यां द्योतनं भानोरवाच्यां प्रतिवारणं ।	१८	102
उपरिष्ठात्पार्श्वतोऽधो दर्पणीभूतवारिधेः ।	८	95
उररीकृत्योपहारं नमस्कारपुरस्सरम् ।	५७	122
एकतानास्सांयुगीना वाग्मिनो हृदयालवः ।	३५	111
कालः परस्परालापैर्भूतभाव्यर्थचिन्तनैः ।	१७	101
चक्रपत्रे विधुन्वानः चलदुच्चूडचूडवान् ।	२	90
चकासामास सीतेव तोयरेखा तरीकृता ।	१५	100
चन्द्रिका धवलच्छायास्तत्रत्या रेजिरे जनाः ।	३१	108
चन्द्रद्वीपे नित्यभद्रां स्वतन्त्रप्रभुपालिताम् ।	२८	107
चारित्रतोऽतिगृध्नन्तो व्यथमाना न वृत्ततः ।	३४	110
जन्मस्थाने स्वाधिपानां विहर्तुमुपचक्रमे ।	२७	106
जीवनक्षयसन्देहो बडिशानाय वेदना ।	१६	100
डोलायामिव वीच्यां स्त्री डोलयामास कच्छपी ।	१३	98
तत्सौन्दर्यं तदौन्नत्यं तत्तेजस्तत्पराक्रमः ।	४५	116
ततः पौरान्वशीकर्तुं गेयं तद्देशभाषया ।	४३	115
तत्रत्यिका बभूव स्त्री वीरमाता सुलक्षणा ।	३९	113
तौ चार्वनुपदीनाविराजच्चरणसारसौ ।	५१	119
दरिद्रैरिव सम्पत्तीरुग्युतैरिव वार्तता ।	२४	105
दिक्सूचियन्त्रमनसा कर्णधारात्मनाऽन्विता ।	७	94
द्वितन्त्रगौलक्षणिकमीमांसकसवार्तिकान् ।	४६	116
धुन्वन्तौ देहसौख्याभिमानं धूममिव द्विजौ ।	१	90
नूत्नकाल मनुष्याणां समावेशस्सविस्मयैः ।	११	97

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
पञ्चयोजनविस्तीर्णा शतलक्षजनावृता ।	३०	108
पारसीकौ वयस्यौ तावारुह्य द्राङ्गनस्विनौ ।	५२	120
पूर्णेन्दुबिम्बसदृशी पश्यन्तोऽपि मुहुस्तयोः ।	५६	122
प्रवेशयामास ततो गर्भं निर्विण्णयात्रिकान् ।	२२	104
प्रसाधितौ तौ रोचिष्णू वेषेण समयोचितौ ।	४९	118
प्रोवाह पृथुलाऽवाच्यां चन्द्रकान्तेति विश्रुता ।	२९	107
बहुगम्भीरमध्येऽब्धे रासाञ्चक्रे तिमिङ्गिलः ।	१४	99
भयङ्करस्तदा जज्ञे प्रतिकूलः प्रभञ्जनः ।	२१	103
भेदं भेदं कूपकेन दिवमभ्याधरातलम् ।	६	94
महाभिरूपौ विनयान्वितौ तौ वदावदौ भारतवर्षदीपौ।	५८	123
महाधननिशाराप्रपदीनांशुकसुन्दरौ ।	५०	119
यातायातोडुपश्रेणी नौका तीरान्तराम्बुधेः ।	२६	106
लोकैकवीरौ तौ सर्वतन्त्रौ स्वातन्त्र्यशालिनौ ।	४७	117
वयः परिणयं स्त्रीणां विद्याभ्यासं स्वतन्त्रताम् ।	३७	112
वातप्रकोपं शमयन्दीपयञ्जठरानलम् ।	३	91
वायुसङ्क्षुभिताम्भोधिर्यदा शान्तिमुपेयिवान् ।	२३	104
विद्यया समयाकृत्य प्रियाकृत्य मुहुर्गुरून् ।	३३	109
वीथीर्विशाला अमला जलयन्त्रपरिष्कृताः ।	४०	113
समानपङ्क्तिभोक्तारस्समवर्णविभूषिताः ।	३६	111
सर्पिर्निधायं हित्वा स पानीयं क्लिष्टमानसः ।	१९	102
सामाजिका आस्तिकास्सत्कुलीना धार्मिका बुधाः ।	३८	112
सायाहनि सुपन्थानं गच्छन्तौ दशकिस्सह ।	५३	120

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
समुन्नतौ तावाजानुबाहू सर्वाङ्गसुन्दरौ ।	४४	115
सौधास्समुन्नता रम्या अद्भुतारामदीर्घिकाः ।	४१	114
हैयङ्गवीननिष्ठानकूर्चिकामस्तु संयुतम् ।	४८	118
क्षयवृद्धी आशयस्य जन्मभूम्यन्यराष्ट्रयोः ।	५	93

चतुर्थस्सर्गः

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
अग्रतो रिपून् स्वमित्रसैनिका	२४	148
अतुलाहम्पूर्विका विभीषणाहमहमिका ।	३०	154
अनशिष्यमहं स्वबलेन समं	४६	172
अभ्यमित्र्यौ सांयुगीनौ धीरौ भरतवर्षजौ ।	२८	152
अमात्यास्सर्वज्ञाः पिपुरति सदा कर्मसचिवा	११	136
अवश्यकार्याण्यचिरेण कृत्वा	४८	173
अष्टाविंशत्यक्षौहिणीद्वेषिसेनां	५४	179
अस्मत्स्वामी सहजसदृशस्सार्वभौमानुजोऽयं	४०	166
आचन्द्रतारकं विन्दे	५९	183
आत्मन्यधिकाविति मन्यमान	१४	139
आप्तासुरत्यद्भुतवैद्यदत्त	४३	169
आश्चर्यं जगतीपते तव दुर्हृदां किमुपेषणं	२१	146
आसन्नविंशयोजन	२७	151
इतःपरं ब्रह्मणस्या	५८	183
उल्कावद्धुतप्तसीसगुलिकाश्रेणी	२९	153
कुमारिकाः प्रियौ कुलाङ्गनास्सहोदरौ सुहृ	१९	143

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
कुलस्त्रीं हरन् भूमिदेवं प्रणिन्दन्	९	134
कृत्तपदोऽपि प्रतिभटमवधीद्योधवरः	३३	158
क्वचित्केशाकेशि व्यथितचिकुरो भिक्षुक इव	३४	159
चोर इव प्लवोऽम्बुपिहितस्तरी	२५	149
जङ्घालो नृपतिभटो न्यवेदयत्तां	६३	186
ताभ्यां कारिष्यमाणं स्वविषयसुभग	१८	142
तिलकयकृत्प्लीहकशेर्वान्त्ररुधिरपललहृदयमन्या	४२	168
दिवस्पृथिव्यावजस्रं प्रशासितुं शक्त एषः ।	६१	185
दृग्यन्त्रेण प्रेक्ष्यानीकं स्वमखिल	४९	174
द्विजातिमणिमुर्वीभृद्धतंसो	३९	165
धर्मं सदान्ववसितेन भवत्खगेन	२	126
न नृबलिः क्वचिदप्युरुभीकरः	५	129
नृसिंहौ मत्प्राणत्राणदीक्षागरिष्ठौ	४४	170
निम्नगाः प्रतिहताः कठिनाल्या	७	131
पशूनां विना हिंसयैवातिदूरं	६	130
पाणौकृत्य जयार्थं रक्षन्तौ पृतनां मां	४७	173
पादातकौन्तिकभटक्षतृहास्तिपक	३६	162
पुरः पश्चाच्छत्रुर्नृपतिमुदधिश्लिष्टसरिति	२३	147
पूर्वाह्णेऽसावगमद्राजधानी	५२	177
बहुश्रेयान्कालोचितसकलकृत्यान्यवनिपः	५३	178
भगवन्तं नित्यतृप्तं जीवन्मुक्तं द्विजोत्तमम्	५६	181
भृशमभिजनोऽस्माकं यस्ते कृपाप्रतिपालितो	१२	137

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
भारतवर्षं तदखिलमेषोऽ	६२	185
मज्जनोन्मज्जनैर्लोहनौका पयो	२६	150
महाब्रह्मं नत्वा विजयमुदितं क्षत्रियमणिं	५१	177
महारणभुवि तृटितपादयुगलै	३१	155
मासोऽयासीत्तयोरत्रेव क्षणो राजकीयो	२०	144
मुदाऽद्य प्रभृत्यस्म्यहं युष्मदीयो	१७	142
यथेष्टमतवृत्तयस्तवजना भजन्ते मुदं	१०	135
युवराजमथेक्षितुं क्षत	३७	163
व्याकुलयुद्धे परस्परमेव	३२	156
वेगोद्यद्धूमाऽनोऽभेद्यं	३५	160
शय्याधीनं नीरपिपासुं क्षतबाहुं	३८	164
शस्त्रचिकित्सां झटिति स कुर्वन्	४१	167
शिष्टिं भूपस्य लब्ध्वा भूदेवताक्षत्रवीरा	२२	140
श्रुत्वा वाचो नृपतिरमुयोर्भावगूढा मनोज्ञा	१३	138
षट्कर्मावगता द्विजातय इला	८	132
सकलधरणिपालका अनु त्वां	३	127
सञ्जातौ मे महति भवाद्दग्वीरौ	१६	141
समस्तविद्यानिधिरिद्धकीर्ति	५७	182
सर्वस्वतन्त्रो बहुसाधुकर्मा	६०	184
सहस्रनावरूप्यसैन्यतल्लजं जयध्वजा	५०	176
साम्राज्यं कीर्तिरावीत्थं सार्वभौमस्य दुर्हृ	४५	171
सिंहलाब्धौ मौक्तिकन्ति तुहिनन्ति हिमालये ।	४	128

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
सुलभौ देवाविव मे सम्प्राप्तौ सर्वथेह मयि साधू ।	१५	140
सृष्ट्यादावाविरासीत्तरुविमृगनृणां	१	123
स्यात्तज्जन्म सदाप्यनर्थकं	५५	180

पञ्चमस्सर्गः

अन्योन्योचितगुणरूपयौवनाढ्यौ	१७	200
अन्योन्यान्तरकलहैर्निजात्मजानां	३९	217
अस्थान्यामिति स उवाच भूमिदेवः	३७	215
आकीटं कृशमपि भौमवस्तुजालं ।	४३	219
आकाशाध्वनि युवराजमुद्धरन्	४२	219
आशंसे जननुतवीरसूर्भवेस्त्वं	१८	201
इत्थं प्राज्वलदनिवार्यकोपवह्नि	३२	211
इत्थं सा बहु भवितव्यमूहमाना	६	192
उद्यानं तत इव चैत्रिकस्स्वगेहं	५७	229
उद्वोढुं प्रभवसि चक्रवर्तिकन्यां	११	195
एषा त्वत्पदकमले सदोपकर्तुं	२३	204
कामो मे त्वमिव करेण नाङ्गनाऽन्या	१९	201
कार्यज्ञाविति पितरौ वधूमणेस्तौ	२२	204
कारुण्यादिह सुदिवा वयं स्वतन्त्राः	५२	226
गव्यूतिद्वयपरिमेयनिष्कुटान्ते	२८	208
गोविप्रानव निगमोक्तधर्मरीत्या	४९	224
जामातुः प्रियतमकर्मभूमिलक्ष्मीं	४१	218

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
तद्वीर्यं तदमलराजवर्चसं	४	190
तस्मै मे स्पृहयति मानसं मदीयं	३	189
त्वत्पत्नी भवति पतिंवरा सुशीला	२४	205
तां जीवान्तकशकबणपातितां	३८	216
तिष्ठद्वु क्षितिपसुतं स चक्रवर्ति	४८	223
द्वेष्टा त्वामिह यदि कोऽपि मन्दभाग्य	५६	229
पित्र्यं सच्छुतमपि हन्ति पादघातं	३४	213
मित्रस्य प्रियतमभावपद्धतिं तां	१०	195
नूनं तावतुलितदिव्यशक्तिमन्तौ	३१	210
नूनं यत्प्रभृति मया विराडलोकि	५	191
पीत्वा खल्वनवसरद्विजाप्तिहालां	३३	212
पश्यन्ती नृपतनया सभां गवाक्षा	१	188
पाणीक्षाहृदययुगानि मेलयन्तौ	२०	202
पार्षद्या द्विजयुगलं विलोककाश्श्री	२९	209
पाषाणः प्लवत इतः पयस्सु चित्रं	३०	210
पुण्येनाखिलभारतावनीजनानां	४७	222
प्रालेयाद्रिलसदुदङ्गिनतम्बदेशं	१३	197
प्राव्राजीद्दति न कोऽपि पुण्यभूमौ	५८	230
बान्धव्यं रिपुकुलपीडनाय चन्द्र	४०	217
भव्यं नागरविक्रमं गजहयं ज्ञानब्रुवाणश्रुतिं ।	५९	231
भोभोस्सुप्रजस इलेश्वरा महान्तः	५१	225
भूदेवोत्तमरचितोरुयन्त्रपक्षी	३६	214

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
मन्मित्रं मम शरणं मदिष्टदैवं	५४	227
मह्यं कोऽपि मम विराण्मणिस्सतीर्थ्यः	१४	198
मात्राऽस्या मुहुरहमित्यभाषिषीयं	१५	198
राजन्यं स्म वदति सार्वभौम इत्थं	१२	196
राजन्यो जननुतसार्वभौमपुत्री	५०	224
वामाक्षीं नृपतिकुमारिकां सुगुल्फां	९	194
वामोरूर्निजजनकेन भाष्यमाणा	८	193
शुभ्रांशुं रविरिव मामधीदिपद्यो	५३	226
शृङ्गारस्तरुणसभासदां तरुण्याः	७	192
श्रुत्वा तद्धितकरचक्रवर्तिवाक्यं	१६	199
सन्ध्यायामुदवसितानि राण् निदेशा	२६	206
सन्मालामभिनवसार्वभौम इत्थं	५५	228
सम्पूर्णोडुपकलिता यथा त्रियामा	२१	203
सम्भूयान्नृपतनयस्य तारकस्ये	४४	220
सुप्त्वा सम्मदपरिपूरितस्त्रियामां	२७	207
सोत्कण्ठौ रुचिरमलङ्कृतौ सखीभि	२५	206
स्यात्तच्चेज्जगति तथाऽहमेव धन्या	२	189
स्वच्छन्दं श्रुतिगदितं यथेष्टकर्मा	४६	221
स्वाचारं जनपतिनाऽवलम्बयेते	३५	214
स्वाधीनेऽत्र सकलचक्रवर्तिसैन्ये	४५	221

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमालापराख्या

In Public domain. Digitization Muthulakshmi Research Academy

दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

गुण्डेराव हर्करे, अनुमुल वेङ्कटशेषकविः, अल्लंराजु रङ्गशायिकविः, अष्टकाल नरसिंहरामशर्मा, आणिविल्ल वेङ्कटशास्त्री, एलेश्वरोपाध्यायुलु, ओगेटि परीक्षिच्छर्मा, काशी कृष्णाचार्युलु, श्रीभाष्यं विजयसारथिः, कुण्टिमद्दि शेषशर्मा, गडियारं वेङ्कटशेषशास्त्री, गरिकपाटि मल्लावधानी, गोल्लापिन्नि वासुदेवशास्त्री, तेल्कपल्लि रामचन्द्रशास्त्री, दुव्वूरि वेङ्कटरमणशास्त्री, दोर्भल विश्वनाथशर्मा, दोर्भल प्रभाकरशर्मा, पञ्चाग्नुल आदिनारायणशास्त्री, पल्ले पूर्णप्रज्ञाचार्युलु, पिण्डिप्रोलु लक्ष्मणकविः, पुष्पगिरि तिम्मन्नः, पेराल भरतशर्मा, मण्ड कामेश्वरकविः, मण्डपाक पार्वतीश्वरशास्त्री, मल्लम्पल्लि शरभय्यशर्मा, मेडवरमु सुब्रह्मण्यशास्त्री, मेडेपल्लि वेङ्कटरमणाचार्युलु, विक्राल शेषाचार्युलु, वेदान्तदेशिकुलु, वेदान्तं कुमारस्वामी, सामवेदं राममूर्तिशर्मा, पुल्लेल श्रीरामचन्द्रुडु इत्यादयो महान्तो मूर्धन्याः तेलुगुदेशीयाः संस्कृतकवयः बहवो विलसन्ति। अमीषु चतुष्पञ्चान् विहाय अन्ये संस्कृतजगति अप्रसिद्धाः। अमीषां संस्कृतकृतयः तेलुगुलिप्या मुद्रिता इत्यनेन हेतुना कृतीस्तेषां तेलुगुदेशे एव प्रचुरं प्राचुर्यं लेभिरे।

एतादृशान् कवीन् परिचाययितुं संस्कृतपरिषदा अष्टादशीति परियोजनामाध्यमेन प्रकाशनानि विदधाति। इयं परियोजना राष्ट्रियसंस्कृतसंस्थानमिति पूर्वनाम्नः केन्द्रियसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। संस्कृत– अकाडमी – षष्ठ्यब्दग्रन्थमालापराख्यायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनायाः अन्तर्गतत्वेन प्रकाशयितुमनुमताः ग्रन्थाः।

1. रामकृष्णयुधिष्टिरविजयचम्पूः
2. शतकद्वयम् (काशीशतकम, रामचन्द्रशतकम्), कर्ता – ब्रह्मश्रीः अज्जाडादिभट्टनारायणदासः
3. तारकम्, कर्ता – ब्रह्मश्रीः अज्जाडादिभट्टनारायणदासः
4. हरिकथामृतम्, कर्ता – ब्रह्मश्रीः अज्जाडादिभट्टनारायणदासः
5. अभिज्ञानशाकुन्तलम् , व्याख्याता – श्रीमान् मृत्युञ्जयनिश्शङ्कभूपालः
6. आन्ध्रकाव्यकथाः, कर्ता – श्रीमान् सन्निधानं सूर्यनारायणशास्त्री
7. श्रीवेङ्कटेश्वरचम्पूः, कर्ता – श्रीमान् पेरुसाण्ड्ल आचार्यः
8. सप्तशतीसारसङ्ग्रहः, कर्ता दृ हालः, व्याख्याता – पेदकोमटि वेमभूपालः
9. विक्रमोर्वशीयम्, व्याख्याता – श्रीमान् मृत्युञ्जयनिश्शङ्कभूपालः
10. युधिष्ठिराश्वमेधचम्पूः, कर्ता – श्रीमान् वेङ्कटशास्त्री
11. रसेन्द्रमङ्गलम्, कर्ता – सिद्धनागार्जुनः
12. यादवराघवीयम्, कर्ता – वेङ्काटाध्वरिः, तेलुगु–आङ्ग्लव्याख्यासहितम्
13. श्रीनिवासचम्पूः, कर्ता – श्रीमान् तिरुवेङ्गलाचार्युलु, श्रीमान् रामकृष्णमाचार्युलु
14. सन्निधानं सूर्यनारायणशास्त्रिणां लघुकाव्यसङ्ग्रहः (कीरसन्देशः, त्रिवेणी, कादम्बरीकथासारः, वेङ्कटेश्वरवचनशतकम्, पूर्णपात्रम् , कचदेवयानीयम्)

दशलक्षमितां परियोजनां संस्कृतपरिषदे प्रदानाय अङ्गीकृतवद्भ्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यश्च नमोवाकान् वितरति संस्कृतपरिषत्परिवारः।

ISBN 978-93-80171-46-3